M. T. B. COLLEGE, SURAT

Manuscripts Library

No Ref.
Ser. 403

Title: Vidhan Parijat

403

विधान पारिजातः ~~Incomplete~~

:	Vidhana Parijata	: Title
:	: Ananta Bhatta son of	: Author
:	: Nāgadeva Bhatta	: Editor
:	: प्रथम स्तबकः	: Year, Vols.
:	:	: Publisher
403 :	: ~~Ends abruptly~~	: Remarks

403

५५९

अथविधानपारिजातेप्रथमस्तबकः

॥ श्रीगणेशाय नमः ॥ वंदे श्रीमदनंतसंज्ञगिरिपं लक्ष्मीनिवासं हरिं विघ्नध्वांतदिवाकरं सु-
रगुरुं सर्वार्थसिद्धिप्रदं ॥ ब्रह्माद्यावसुरेंद्रपूर्वकसुरा यस्य प्रसादात्सदा सर्वार्थं समासि-
१ षी गुरमलं मदं शदेवं परं ॥१॥ नत्वाक्षीरोद्भिजा जानिं तथा ब्रह्मादिकान्सुरान् ॥ गणेशं
विघ्नहर्तारं नंदे हिमवतीसुतं ॥२॥ चतुर्दशसु विद्यासु निष्णातः शुद्धमानसः ॥ अपरोक्ष
ब्रह्मतत्त्वा जंयंति गुरवो मम ॥३॥ श्रुतिसकलरहस्यं विदितं यस्य चित्ते सुकुरद्रवविशु-
द्धे दोषमालिन्यशून्ये ॥ स्वपदविमलभक्त्या पस्य तुष्टोरमेशो जनकजनकपद्मं मद्वमेनं ज्ञना-
स्मि ॥४॥ जातो हमेतस्य मनोरथेन यस्यानुकंपामृतदृष्टिपुष्टः ॥ पारंगतः श्रारिवव दर्शना- रा.मः
नां नागेशभट्टं जनकं नतोस्मि ॥५॥ वंदे भागीरथीमंबां गुरौ रंबे बशालिनां ॥ यत्प्रसादादहं म- १
प्राज्ञः संजातो जडधीरपि ॥६॥ श्रीमत्कारावकुलाब्धिशीतकिरणो विद्याकलीनां निधिः श्री-
मद्दिक्षुपराश्रितः सरसमुद्विद्विचकोरप्रियः ॥ मद्भ्रंद्रमं पिव्यं क्षमिन्यानंतदासः
सुधीर्नाना शांतिविधानसुरतरुं व्यारोपयत्सोषके ॥७॥ विधानपारिजातोयं पंचस्तबकसंयु-

तः ॥ नानाविधानगंधोच्चैः संसेव्यो विबुधैरिह ॥८॥ प्रथमे स्तबके स्वस्तिवाचनादिकमुच्यते ॥
द्वितीये दुष्टऋक्षादिजातशांतिकर्म्मीर्यते ॥ तेमल्या तृतीये गुरुशांत्यादिव्रतबंधविवाहयोः ॥ प्रकी-
र्णानि विधानानि कीर्त्यंते च चतुर्थके ॥१०॥ मरणस्य विधानानि कथ्यते पंचमे ऋतु ॥ जननादिकमे-
णैव शांतिक्रमदहेरितः ॥११॥ न पांडित्याभिमानेन न च वित्तस्य वांछया ॥ निबंधो रच्यते किं-
तु विदुषां परितुष्टये ॥१२॥ यत्किंचिन्मम चापल्यं चेद्धस्म्यं तो विचक्षणाः ॥ गुणग्रह्याः सदा सं-
तो बालस्यपितरा इव ॥१३॥ ग्रंथस्थानि विकीर्णानि विधानानि समंजसा ॥ संगृह्य भिस्तां-
पीन्येतेन प्रीणातु केशवः ॥१४॥ सधारणविधानानि प्रोच्यंते सर्वशाखिनां ॥ असाधारणकल्प-
स्य मुज्ञानात्स्वस्वगृह्यतः ॥ तत्र तावत्सविभषा प्रकरणं ॥ दिशामनुक्तौ प्राचीस्यात्तथा हस्तात्र-
दक्षिणः ॥ शुभे काले शुभे देशे शांतिकर्म समाचरेत् ॥२॥ नैमित्तिकविशेषण विहितं त्वन्यथा-
पि च ॥ यथा मृत्वादिका शांतिः कर्यापि पृष्ट्यादिपूजनं ॥२॥ प्रवृत्तमन्यथाकुर्याद्यदि मोहात्क्र-
मं च न ॥ यतस्तदन्यथाभूतं तत्समभ्य पुनरारेत् ॥३॥ प्रधानस्याक्रिया यत्र सांगं तत्क्रियते पुनः ॥

नदंगस्य क्रियायां तु नावृत्तिः सर्वकर्मसु ॥४॥ यज्ञोपवीतिना कार्यं प्रागुदक्कुर्यं तु नो वृत्तिः
२ स्थिता तथा ॥ शुद्धेन कर्म किंचिद्व्यं विद्धनुस्मरण स्मरणपूर्वकं ॥५॥ ईषद्धौतं नवं श्वेतं सदशं यन्न
धारितं ॥ निर्लेजिका क्षाक्षालितं यदहतं वास उच्यते ॥६॥ सर्वेषु धर्मकार्येषु पत्नी दक्षिणतः शु
भा ॥ अभिषेके वाम भागे संस्कार्य श्रेवे दक्षिणे ॥७॥ आर्षं छंदो दैवतं च विनियोगस्तथैव च ॥
वेदितव्यं प्रयत्नेन ब्राह्मणेन विपश्चिता ॥८॥ अविदित्वा तु यः कश्चिद्याजनाध्यापनं जपं ॥ यद
न्यत्कुरुते किंचित्तत्सर्वं निष्फलं भवेत् ॥९॥ अग्निप्रतिष्ठाकर्मादि स्वशाखोक्तं समाचरेत् ॥
विशेषविहितं यच्च रुद्रस्य सर्वेषामपि चोच्यते ॥१०॥ यच्चाम्नातं स्वशाखायां पारक्यमविरोधि यत् ॥ विद्व
द्भिस्तदनुष्ठेयमग्निहोत्रादिकर्मवत् ॥११॥ पुण्याहवाचनं मातृस्थापनं श्राद्धमेव च ॥ शां शर्मः २
तिकर्माणि मुद्दिष्टं शौनकस्य वचो यथा ॥१२॥ स्वस्तिवाचमेवैकेऽत्र पुः ॥ शांतिककर्मणि ॥ वृद्धि
व्यं श्राद्धं न कर्तव्यं बोधायनवचो यथा ॥१३॥ शाखांतरे स्वशाखायां यच्छोक्तं सादिकमीरितं ॥ स्वशाखो
क्तमिदं कार्यं परोक्तं न समाचरेत् ॥ स्वशाखाश्रयमुत्सृज्य परशाखोक्तमाचरेत् ॥ शाखारंडः

स विज्ञेयः सर्वकर्मबहिष्कृतः ॥१४॥ बह्वृचस्य त्वाश्वलायनगृह्योक्तं यथावत्सचोदितं ॥ तेन तत्तावति शास्त्रार्थे कृ
ते सर्वः कृतो भवेत् ॥१५॥ इति कात्यायनेनोक्तमन्यैश्चैव तथा विभिः ॥ अथ होमस्य द्रव्यस्य प्रमाणं
दीहक्ष्यते ॥१६॥ खंडत्रयं तु मलानां फलानां स्वप्रमाणतः ॥ ग्रासमात्रमथान्नस्य पंचसूत्राणि
होमयेत् ॥१७॥ पनसस्य फलस्याथ शतभागाः प्रकीर्तिताः ॥ शतं चैव भागाश्च कूष्मांडस्य प्रकीर्ति
ताः ॥१८॥ नारिकेलस्य विदद्भिर्भागाः प्रोक्ताः स्फुषोडशाता वंत एव भागाः स्युः कदलस्य कदलीत्तमे ॥
॥१९॥ स्वर्जूरफलभागाश्च पंच प्रोक्ता मनीषिभिः ॥ पत्रमेकैकमेवं स्यात्तथा पुष्पं च गृह्यते ॥२०॥
तिला ह्यशीतिसंख्याकास्तथा षष्टिर्यवाः स्मृताः ॥ व्रीहयश्च शतं ग्रासा गोधूमाः षष्टिसंमिताः ॥२१॥
प्रियंगवश्च विज्ञेया विडालपदमात्रकाः ॥ तथैव तंदुलाः प्रोक्ता होमलक्षणकोविदैः ॥२२॥ फलानि ब
दरादीनि पंचपंचैव हावयेत् ॥ पर्वमात्राश्च होमे स्युः पल्लवाः कोमैरातीनि लास्मृताः ॥२३॥ शर्करा
श्च गुडाश्चैव विडालपदमात्रकाः ॥ अतिसूक्ष्माणि बीजानि फलानि च तथैव च ॥२४॥ यत्नतश्च
ज्ञासिध्यर्थं वस्त्रमात्राणि हावयेत् ॥ चतुर्दशबीजपूरा शिदाडिमानि तथैव च ॥२५॥ कंदास्त्वेकैकशः

३

प्रोक्ता आर्द्रमंकुरमेव च॥ कंदस्य पिपिशोषान्तु स्वरणो दशधा भवेत्॥२६॥ जंबीरामलकद्राक्षास्तथा
नेद्रनतकाः कणाः॥ मद्यामयाम्रउवद्याः प्रोक्ता होमे कैकशो यजेत्॥२७॥ हव्यास्त्रिस्त्र स्त्रहोतव्याः स
मिथस्त्वेकिकाः स्मृताः॥ आज्यं च तृष्ण त्यच दधिदुग्धं तथैव च॥ दधिमिश्रितमाज्यं तृष्णदाज्य
॥२८॥ स्रुवेव क्रमशो मार्णां तु होतव्यं यज्ञकोविदैः॥ एवं हस्यतेरु चिरयमुद्रा निगद्यते॥२९॥ म
यूरी कुकुटी हंसी सूकरी च मृगी तथा॥ पंचमुद्रा विजानीयाद्धोम्यद्रव्यग्रहे बुधैः॥३०॥ न्युब्जेन
पाणिना द्रव्यं तर्जनीरहितेन यत्॥ आदाय हूयते विप्रैर्मयूरी तां विदुर्बुधाः॥३१॥ अंगुष्टायंत्रि
ताः सर्वा अंगुल्युत्तानकुञ्चिताः॥ हूचर्ना क्रियते ज्ञानिः कुकुटी सा प्रकीर्तिता॥३२॥ चिकनिष्ठा तु
हंसी स्यान्मुकुला मा च सूकरी॥ मध्यमानामिकांगुष्ठैर्मृगी मेवोच्यते बुधैः॥३३॥ फूलमूलयज्ञो रामः ३
श्रेष्ठा मुद्रा ज्ञेया शिखंडिनी॥ आरणे मारणे चैव कुकुटी च प्रशस्यते॥३४॥ वश्ये चाकर्षणे सर्वा
णां कर्मणां सूकरी मता॥ शांतिके पौष्टिके कार्ये मृगी हंसी प्रशस्यते॥३५॥ कुकुटा पत्रपुष्पाणां शा
लिहोमे तु सूकरी॥ यवानां च तिलानां च हंसी प्रोक्ता मनीषिभिः॥३६॥ या यत्र विहिता मुद्रा तया

तत्र तु होमयेत्॥ अन्यथा जुहुयाद्यस्तु न कर्मफलभाग्भवेत्॥३७॥ द्रवद्रव्यं स्रुवेणैव पाणिना कठि
न हविः॥ स्रुचा वित्तं तथा मांसं लाजानंजलिना यजेत्॥३८॥ इत्यागमग्रंथउक्तद्रव्यमानं मयोच्यते
॥ जालसूर्यमरीचिस्थं त्रसरेणुरजः स्मृतं॥ तेष्टौ लिक्षा तु तास्तिस्रो राजसर्षप उच्यते॥ गौरस्तु ते च
यः षड्यवो मध्यस्तु ते त्रयः॥ कृष्णलः पंच ते माषास्ते सुवर्णस्तु षोडश॥ पलं सुवर्णाश्चत्वारः पंच
वापि प्रकीर्तितमिति॥ अस्यार्थः॥ जालांतरगते भानौ यत्सूक्ष्मं दृश्यते रजः॥ प्रथमं तत्प्रमाणानां
त्रसरेणुं प्रचक्षत इति वचनात् जालांतर्गतसूर्यकिरणसंबंधि सूक्ष्मं रजः त्रसरेणुसंज्ञं भवति॥ ते
ष्टौ त्रसरेणवो लिक्षा भवति॥ ताः तिस्रो राजसर्षपो भवति॥ तेत्रयो राजसर्षपा एको गौरसर्षपः॥ तेष
ड्गौरसर्षपा एको मध्यमो यवः॥ ते मध्ययवास्त्रयः कृष्णलः॥ कृष्णलो गुंजेति पर्यायः॥ ते कृष्णलाः
पंच माषाः॥ ते षोडश माषा एकः सुवर्णः॥ चत्वारः सुवर्णा एकं पलं॥ यद्वा पंच सुवर्णा एकं पलमि
ति ज्ञातव्यं॥ इति हेमपरीमाणं॥ शतमानं तु दशभिर्धरणैः पलमेव वा॥ निष्कं सुवर्णाश्चत्वारः
कार्षिकस्ताम्रिकः पणः॥ इति योगीश्वरणोक्तः कृष्णलः पंचगुंजकाः॥ रूप्यमाने नियोक्तव्याः॥ ध्या

व्रीहयश्च यवाश्चैव गोधूमाः कङ्गुसर्षपाः॥माषामुद्गा१

न्यमानमथोच्यते॥सप्तमाश्च अष्टमाश्च कुलत्थकाः॥श्यामाकाश्चैव नीवारा जर्त्तिलाः सगवेधुकाः
॥कोविदारसमायुक्ताः क्रोष्या वेणुयवाश्च ये॥ग्राम्यारण्यास्स्मृता ह्येते ओषध्यश्च चतुर्दश॥पल
४ द्वयं नु प्रसृतं मुष्टिरेकं पलं स्मृतं॥अष्टमुष्टिर्भवेत्किंचित् किंचिदष्टौ तु पुष्कलं॥पुष्कलानि च च
त्वारि आढकः परिकीर्त्तितः॥चतुराढको भवेद्द्रोणः कुंभो द्रोणद्वयं स्मृतः॥ ॥इति भविष्यपुरा
णोक्तं उरवारी द्रोणास्तु षोडश॥यद्वा॥पलं च कुडवः प्रस्थ आढको द्रोण एव च॥धान्यमानेन बो
धव्याः क्रमशो मी चतुर्गुणाः॥इत्येवं धान्यमानोक्तिर्भूमिमानमथोच्यते॥परमाणुपरं सूक्ष्मं
त्रसरेणुर्महीरजः॥वालाग्रं चाथ लिक्षा च यूका चाथ यवोङ्गुलं॥क्रमाद्दशगुणान्याहुर्यवानष्टत
तोङ्गुलं॥षडंगुलं पदं प्राहुर्वितस्तिर्द्विगुणः स्मृतः॥द्वे वितस्ती ततो हस्तो वह्नितीर्थादि चेष्टता रामः ४
॥चतुर्हस्तो धनुर्दंडो नाडिकेति युगेन तु॥क्रोशो धनुःसहस्रे द्वे गव्यूतिश्च चतुर्गुणा॥द्विगुणं
योजनं तस्माद्ब्रह्मा संख्याविशारदैः॥दशहस्तेन वंशेन त्रिंशद्दंडाभिवर्त्तनं॥दशतान्येव गोचर्म
मानमाहुः प्रजापतिः॥इति मत्स्यपुराणोक्तिरथ कृच्छ्रादि कथ्यते॥एकभक्तेन नक्तेन तथैवायाचिते

न च॥उपवासेन चैकेन पादकृच्छ्रः प्रकीर्त्तितः॥यथाकथंचित्त्रिगुणः प्राजापत्योयमुच्यते॥प्रातः
पंचदशग्रासाः सायं तु द्वादश स्मृताः॥चतुर्विंशतिरायाच्या परं निरशनं स्मृतं॥इति मासपरी
माणं मुख्या विकृतिकारणं॥एकैकग्रासमश्नीयादहानि त्रीणि पूर्ववत्॥अहं चोपवसेदसमति
कृच्छ्रं चरन्नरः॥ ॥इत्यादिधर्मशास्त्रोक्तमथान्यत्परिभाष्यते॥संमार्जिते प्रदेशे षोडशं वाष्टहस्त
कं॥३॥मंडपं वाथ कूटं वा कृत्वा वेदिं प्रकल्पयेत्॥मंडलं सर्वतोभद्रं स्वस्तिकं पद्ममेव वा॥४॥रजोभिः
पंचवर्णैस्तु लिखित्वा तत्र धान्यकं॥राशीकृत्य तथा कुंभं यवकुंतत्र निक्षिपेत्॥४॥उदकेनाथ संपूर्य
औषधानि च निक्षिपेत्॥मदनं मधुपुष्पाणि पत्रपालाशसर्षपाः॥५॥अपामार्गो गुडूची च विडंकोशी
रपुष्पीका॥विष्णुक्रांता सहदेवी सर्वौषध्यः शतावरी॥६॥यद्वा॥कोष्ठं मांसं हरिद्रे द्वे सुशैलेयचं
दनं॥वचा कचोरी मुस्ता च सर्वौषध्यः प्रकीर्त्तिताः॥७॥सर्वासामप्यलाभे तु शतमूली प्रशस्यते॥
यद्वा यथायथं प्राप्तं वस्तु तत्र विनिक्षिपेत्॥८॥न्यग्रोधपिप्पलोदुंबरप्लक्षचूततरूद्भवाः॥पल्ल
वाः पंचैते स्युस्त्वचस्तेषामपि क्षिपेत्॥९॥वज्रमौक्तिकवैडूर्यप्रवालं चेन्द्रनीलकं॥उक्तानि पं

५ चरत्नानि नारदेन महर्षिणा ॥१०॥ यद्वा ॥ मुक्ताफलं हीरकं च वैडूर्यं पद्मरागकं ॥ पुष्परागं च गोमेदं नीलं म-
गारुत्मतं तथा ॥११॥ प्रवालयुक्तान्येतानि महारत्नानि वै नव ॥ अभावे सर्वरत्नानां हेम सर्वत्र योजये-
त् ॥१२॥ यवव्रीहितिलामाषाः कंगुश्यामाकमुद्गकाः ॥ इमानि सप्तधान्यानि गदितानि महर्षिभिः
॥१३॥ अश्वस्थानाद्गजस्थानाद्वल्मीकसंगमाद्ध्रदात् ॥ रथ्यागोष्ठाद्धृताश्चैव मृदः सप्त प्रकीर्त्ति-
ताः ॥१४॥ पंचामृतानि गव्यानि मत्स्यादीनि विक्षिपेत् ॥ पूर्णपात्रं न्यसेत्तत्र राजतं ताम्रमेव वा
॥१५॥ यद्वा वंशमयं पात्रं धान्यपूर्णं तिथैन च वस्त्रयुग्मं न्यसेत्तत्र कलशे वरुणं यजेत् ॥१७॥
प्रतिमां विन्यसेत्तत्र कर्षार्द्धार्द्धविनिर्मितां ॥ तस्य लिंगमंत्रेण कर्म कार्यं विचक्षणैः ॥१८॥ तेने- रा॰म॰
दं कर्म कार्यं मंत्रेण नियमो यदि ॥ तेन मंत्रेण तत्कर्म कार्यं नान्येन निश्चयः ॥१९॥ इदं कार्यमने- ५
नेति न क्वचिद्दृश्यते विधिः ॥ लिंगादेवेदमर्थं च मेषा ते मंत्रसंज्ञकाः ॥२०॥ प्राजापत्य उपांशु-
स्यान्मंत्रः सावित्र एव च ॥ इत्युक्तं शौनकीये तु शौनकेन महर्षिणा ॥२१॥ इत्येवं सर्वकर्मोपयोगि
शास्त्रं समीरितं ॥ विशेषो वक्ष्यते तत्र शांतिकर्मणि सर्वशः ॥२२॥ अथाग्निनामानि ॥ लौकिकः पाव-

कोग्निः प्रथमः परिकीर्त्तितः ॥ अग्निस्तु मारुतो नाम गर्भाधाने प्रकीर्त्तितः ॥ पुंसवे चमसो नाम शोभनः
शुभकर्मसु ॥ सीमंते मंगलो नाम प्रगल्भो जातकर्मणि ॥२॥ पार्थिवो नामकरणे प्राशने त्वस्य वै
शुचिः ॥ सभ्यनामा तु चूडायां व्रतादेशे समुद्भवः ॥ गोदाने सूर्यनामास्य केशांते पावकः स्मृतः
वैश्वानरो विसर्गे स्याद्विवाहे वनदः स्मृतः ॥ चतुर्थीकर्मणि शिखी धृतिरग्निस्तथापरे ॥ अपरे
कर्मणि ॥ आवसथ्यस्तथाधाने वैश्वदेवे तु पावकः ॥ ब्रह्माग्निर्गार्हपत्यः स्याद्दक्षिणाग्निस्त्वे-
श्वरः ॥ विष्णुराहवनीयः स्यादग्निहोत्रे त्रयोग्नयः ॥ लक्षहोमे वह्निदः स्यात्कोटिहोमे महाश-
नः ॥ एकेचतां चिपिप्राहुरग्निव्यानपरायणाः ॥ रुद्रादेतु मृडो नाम शांतिके शुभकृत्तथा ॥ आ-
दिशब्दाद्धव्यपुरुद्भमहातिरुद्रके ॥ पौष्टिके वरदश्चैव क्रोधाग्निश्चाभिचारिके ॥ वश्यार्थे
वराहोत्रो क्को वनहेदो तु पावकः ॥ उदरे जाठरो नाम नो क्रव्यादः शवभक्षणे ॥ समुद्रे वाडवोऽ-
ग्निर्लये संवर्त्तकस्तथा ॥ सप्तविंशतिसंख्याता अग्नयः कर्मसु स्मृताः ॥ तं तमावाह्य होतव्य-
योयत्र विहितो नवाः ॥ अन्यथा विफलं कर्म सर्वं तद्राक्षसं भवेत् ॥ आदित्यादिग्रहाणां च सांप्र-

तं ह्यग्निरुच्यते॥ आदित्ये कपिलो नाम पिंगलः सोम उच्यते॥ धूमकेतुस्तथा भौमे जठरोग्निर्बुधे
६ स्मृतः॥ बृहस्पतौ शिखी नाम शुक्रे भवति हाटकः॥ शनैश्चरे महातेजा राहौ केतौ हुताशनः॥
कराली धूमिनी श्वेता लोहिता नीललोहिता॥ सुवर्णा पद्मरागी च सप्त जिह्वाः प्रकीर्तिताः॥ इति
विधनयारिजातेग्निनामानि पाद्मे॥ ॥इति परिभाषाप्रकरणं॥ अधुना ह्यस्य माणसर्वविधा
नोपयोगि जलयात्राविधानं॥ वसिष्ठः॥ शांतिके पौष्टिके वापि जलयात्रां विना बुधः॥ कुरुते य
दि वा मोहात्कर्यं तस्य च निष्फलं॥१॥ तडागादिप्रतिष्ठासु देवतायतनादिषु॥ लक्षहोमे कोटि
होमे मोघुतहोमे तथैव च॥२॥ व्रतोत्सर्गे महादाने यज्ञे वा वितते शुभे॥ व्रतोत्सर्गे व्रतोद्याप रा॰म॰
ने इत्यर्थः॥ जलयात्रां पुरा कृत्वा श्रेष्ठ कर्म समाचरेत्॥३॥ अथातः संप्रवक्ष्यामि जलयात्रावि ६
धिं शुभं॥ यज्ञशालामतिक्रम्य शुचिभिर्ब्राह्मणैः सह॥४॥ यजमानः सपत्नीकः सुहृद्बंधुज
नैर्युतः॥ अश्वारूढो गजारूढो रथस्थो वेलांकारभूषितः॥ गृहीत्वोपस्करं सर्वं गंधपुष्पाक्षता
दिकं॥ जलाशयं ततो गच्छेद्गीतवादित्रनिःस्वनैः॥ अग्निं चैव ह्रदं गच्छेन्नदां वाथ समुद्रगां॥

सुवासिन्यो मतः कृत्वा सर्वालंकारभूषिताः॥ हेमराजतताम्रान्वा मृन्मयान्वा कलशान्बुभानु॥
गृहीत्वा गंधपुष्पाद्यैरर्चितान्सुदृढान्नवान्॥ जलाशयं समासाद्य तीरे गोमयलेपिते॥
चतुरस्रे कृते क्षेत्रे तत्र स्वस्तिकमालिखेत्॥ यवैर्वा तंडुलैर्वापि पद्ममष्टदलं लिखेत्॥ चत्वारः
कलशाः स्थाप्याश्चतुर्दिक्षु विचक्षणैः॥ तावंतश्च पुनः स्थाप्या उक्कोणेषु च समाहितैः॥ तत्रैसं
पूजयेद्देवं वरुणं यादसांपतिं॥ जलमातृश्च संपूज्य जीवमातृस्तथैव च॥ कलशाग्नेयकोणे च स्व
स्तिकादिकमंडले॥ मत्सी कूर्मी वाराही च दर्दुरी मकरी तथा॥ जलूकी तंतुकी चैव सप्तैता जल
मातृकाः॥ कुमारी धनदा नंदा विमला मंगला बला॥ पद्मा चेति च विख्याताः सप्तैता जीवमातृकाः
॥ उर्मिर्लक्ष्मीर्महामाया पानं देवी तथैव च॥ वारुणी निर्मला गोधा सप्तैताः स्थलमातरः॥ एता
अपि प्रकल्प्याथ दिक्पालान्दिक्षु चार्चयेत्॥ दीपं समंतात्प्रज्वाल्य देवतानां विसर्जनं॥ घृतेन
वाथ दध्ना वा लेदद्यात्ततो बलिं॥ अभ्यः स्वाहेत्यादिमंत्रैर्दद्यादिशस्त्रु वकेशात्तु॥ ते च मंत्रा वागस
नेपके उग्घमेथ प्रकरणे थीताः॥ ॐ॥ अभ्यः स्वाहा वार्भ्यः स्वाहा उदकाय स्वाहा तिष्ठंतीभ्यः स्वाहा

८ स्त्रवंतीभ्यः स्वाहा स्यंदमानाभ्यः स्वाहा कूप्याभ्यः स्वाहा सूद्याभ्यः स्वाहा धार्याभ्यः स्वाहा अर्णवाय स्वा
हा समुद्राय स्वाहा सरिराय स्वाहेति ॥ यथा देवते योगः कार्यः ॥ ततो वरुण प्रार्थना ॥ अनी
चीशान नमस्तुभ्यं सर्वविघ्नविनिसूदन ॥ पवित्रं कुरु घा देवेस सर्वकार्येषु सर्वदा ॥ ज्ञानतोऽज्ञानतो वा
पि मन्गवांयन्मया कृतं ॥ तत्सर्वं पूर्णमेवास्तु त्वत्प्रसादाद्गुणाधिप ॥ ज्ञानतोऽज्ञानतो वापि मा वान्वि
यिरनुष्ठितः ॥ स सर्वस्त्वत्प्रसादेन इष्टयो भवचंपापते ॥ गृहीत्वा तु ततः कुंभान्यंच पद्मवसंयु
तान् कृत्वा सुवासिनी दोष्णु गीतवादित्रनिःस्वनैः ॥ दोःषु हस्तेषु यायी गन्तारिं समागच्छन्म
ध्ये मार्गे बलिं क्षिपेत् ॥ उपलिप्य तथा भूमिं तेनाम्भे नवा तथा ॥ तत्र मंत्रः ॥ ॐ नमो भगवते क्षेत्र राम्ः ७
पाल भासुर त्रिनेत्राय ग्रामुरवज्ञ अवतर ॥ अवतर कपिल पिंगल ऊर्ध्वकेश जिह्वा लालन ॥ धिं
धिधिधि ॥ निधि निधि कुरु कुरु ॥ मुरु मुरु ॥ चल चल ॥ लंलः ह्रूँ ह्रीं क्लः बलिं गृहाण स्वाहेति ॥
यज्ञमंडपद्वारे च कुर्यान्नीराजनं ततः यज्ञमंडपमध्ये च स्थापयेद्वेदिको परि ॥ कुंभानितिरोषः
द्वारेण पश्चिमेनैव प्रवेशो नेत्तरेण क्षितिजलिमां त्रा ॥ अथ सीर्वकिमांगमृतं पुण्याहवाचनं वि

धानं ॥ तच्च येषां शाखायां कल्पसूत्रादौ विस्तृतं संक्षिप्तं वाऽभिहितमस्ति ॥ तैस्तदैवानुष्ठातव्यं
॥ वह्वल्पं वा स्वशाखोक्तं यस्य यावत्प्रचोदितं ॥ तेन तावति शास्त्रार्थे कृते सर्वः कृतो भवेदिति छं
दोगपरिशिष्टे कात्यायनस्मारणात् ॥ येषां वाऽत्यन्ते पि नेव प्रति शाखीनां गृह्यादौ नोक्तं तैस्तु व
ह्वृचपरिशिष्टोक्तं शौनकाद्युक्तं वा ग्राह्यं ॥ सर्वशाखाप्रत्ययमेकं कर्मेति जैमिनिस्मरणात् ॥
यत्राम्नातं स्वशाखायां पारक्यमविरोधि यत् ॥ विद्वद्भिस्तत्तदनुष्ठेयमग्निहोत्रादिकर्म
वदिति संग्रहवचनाच्च ॥ स्मृतिप्रोक्तं मन्वादीनां सर्वसाधारण्येन प्रवृत्तेश्च ॥ ॥ अथ
पुण्याहवाचनं ॥ स्मृतिसंग्रहे पुण्याहानि तु संप्राप्ते विवाहे चौलके तथा ॥ व्रतबंधे च मरा दे
तथा जननकर्मणि ॥ गृहारंभे धनप्राप्तौ तीर्थाभिगमने तथा नवग्रहमखे शांतौ वस्तुतानां तथै
व च ॥ गृहप्रवेशने चैव ग्रामस्याभिनिवेशने ॥ गजबंध तुरंगाणां दासेराणां च संग्रहे ॥ स्व
वैष्णुकर्मणां त्रेषु प्रारंभे पुण्यवाचनं ॥ अवृद्धि श्राद्धमात्रेषु न कुर्यात्पुण्यवाचनं ॥ वाचनीया
द्विजाः सम्यक् वेदशास्त्रपरायणाः ॥ न मंत्रकुनखीकाणो हीनांगोऽधिकस्तथा ॥ क्षयरोगीच

कुष्टी च श्यावदंतो भिस्नकः ॥ वंध्यश्च विधुरो वाग्मी क्रूरश्च खलसेवकः ॥ चक्रवृत्तिश्च दंभी च हेतुकोज्ञा
८ न्दुर्बलिः ॥ सहोपपतिरुन्मत्तो व्यसनी सोमविक्रयी ॥ कंसाविक्रयकृद्राज्ञि विक्रायी पिशुनोन्नतः ॥ द्वे
कदुष्टः पराधीनो राजद्रोहपरायणाः ॥ एते चान्ये च विप्राश्च न वाच्याश्चास्वस्तिवाचने ॥ तांबूलमक्ष
ताद्रव्यं दूर्वपुष्पाणि चंदनं ॥ कुंकुमाक्तानि पात्राणि अक्षताः कुंकुमान्विताः ॥ पुण्यतीर्थोदकं सम्
म्यक्निधाय कलशे शुभे ॥ सुवर्णं फलपुष्पादि द्रव्यमात्रं निधापयेत् ॥ उदङ्मुखः प्राङ्मुखो वा
यजमानः समाहितः ॥ नियतो मंगलोपेतोपविष्टा अन्ये द्विजातयः ॥ सुदूर्वापाणयः सर्वे शुचयः
शुचिवाससः कालज्ञानादिकं कुर्यादनुज्ञातो द्विजातिभिः ॥ उदकस्य सपिधानं तु कलशं हेमहरितं रा.अ: ८
॥१ प्रक्षासने समाविष्टो नमस्कुर्यात्प्रयत्नतः ॥ पुण्याहवाचनं पूर्वं सतार ब्राह्मणस्य चा तद्देवेच
रोंकारं कुर्यात्क्षत्रियवैश्य ~~हवाचनं पूर्वंसिताय~~ योरिति पारिजाते यमः ॥ अवनिकृतजानुमंड
लइत्यादि हेमाद्रियोक्तं सर्वकर्मसाधारणं पुण्याहवाचनं ॥ तथा शौनकीये ॥ पुण्याहवाच
नविधिं वक्ष्यामो यथाविधि प्रयोक्तव्यः कर्मणामादौ अंते चोदयसिद्धये ॥ अर्चिता ब्राह्मणाः

गंधमाल्यैः सदक्षिणैः तिष्ठेयुः प्राङ्मुखा युग्मा वक्तारो दर्भपाणयः ॥२॥ उदङ्मुखो वाचयिता ति
ष्ठेत्तेभ्यस्तु दक्षिणे ॥ विन्यस्य सर्वमन्यं कुंभे पिहिताननमर्चितं ॥३॥ तत्राहो वाचयिष्ये एवं वदेद्वाचयि
ता ततः ॥ वक्तारोपि शिवा आपः संत्विति एवं ब्रुवे सथ्य ॥४॥ गंधा इति वदेदेकः सुमंगल्यमितीतरे ॥ व
देत्पूर्वं सुमनसः इत्येवमपरे पिच ॥ सौमनस्यमिति ब्रूयुरस्तु शब्दांतमंत्वतः ॥५॥ पश्चादक्ष
तं इत्येवं पाद्याचयिता ततः ॥ अन्ये अक्षतं चारिष्टं चास्त्विति एवं ब्रूयुरर्चिताः ॥६॥ ततो वाचयिता
विप्रो दक्षिणा इत्युदीरयेत् ॥ स्वस्ति शब्दाद्यमुच्चार्य दक्षिणाः पांत्वितीतरे ॥७॥ बहुदेयमि
ति ब्रूयुरस्तु शब्दांतमत्वराः ॥ केचात्र दक्षिणां जानु पातयित्वा महीतले ॥ उदङ्मुखोयं जपेत्स
कृत् श्रद्धये इत्येवमादिकं ॥ जपित्वा स्थापयेत्कुंभं विष्णुतिष्ठन्तु उदङ्मुखः शमनसः समायीपतामित्येवं वा
चयित्वा वदेत् ॥ समाहितमनसस्म इत्येवं ब्रूत सर्वथा ॥ प्रसीदंतु भवंत इत्यस्य वाचयिता वदेत् प्रस
न्नाः स्म इति प्रीतात्प्रतिब्रूयुरितीतरे ॥ शांति पुष्टिस्तुष्टि वृद्धिरविघ्नमित्यनुक्रमात् ॥ आयुष्य
मारोग्यमिति शिवं कर्मनित्यापि च ॥ कर्मसमृद्धिर्वेद शास्त्र धनधान्येष्ट संपदः अस्तु शब्दांते मुच्चार्य

वाचयित्वा तथा परे ॥ प्रजापतिः प्रीयतामित्येवं वाचयिता वदेत् ॥ परे प्रथममुच्चार्य प्रीयतां भगवानिति
। पश्चात्प्रजापतिरिति त्रियुः । प्रयतत्मानसाः पुण्याहं वाचयिष्ये हमिति वाचयिता वदेत् ॥ वाच्यतां
१० मिति भाषं तेवत्कार स्वस्तु चेत्ततः अयोज्ञाते वंशकुले सामगायसि पूर्वकं ॥ ऋचः सर्वे सहब्रूयुस्ततो
वाचयिता द्विजः । ॐ भुक्तिपूर्वं पुण्याहं भवंतु इति भाषसे ॥ परे बुवं चिंति ब्रूयुरों पुण्याहमिति तीतरे
॥ पुनरप्येवमेव द्विः कृत्वा पुण्याहवाचनं । ततः स्वस्ति न इंद्रेति लतु ॥ पश्चात्स्वंतर इति च ब्रुवति ।
ति भाषते । ॐ स्वस्तीति तत्थैवान्ये प्रतिब्रूयुरतः परं ॥ प्राग्दिशि तं च तुर्थ्येलिकाकर्मवाचयिता ॥ रा॰ म॰
ततः स्वस्ति सार्वबुवं त्वत्काल्लं पूर्वं वृस्समुदीरयेत् ॥ वत्कार स्त्र तुर्थ्यंतं तत्कं मौक्तिपूर्वकं ॥ स्वस्ती १०
ति च प्रतिबुधुस्य सर्वेपि ते द्विजाः ॥ ऋध्यास्तोममिस्यादि ऋवं ब्रूयुः सहोच्चकैः ॥ ततो वाचयिता
ऋद्धिं भवंतिपूर्वकं । ब्रूवंत्यिति वदस्ये ब्रूपुरों ऋध्यतामिति ॥ एवमेवोभयेपि द्विरभ्यसेपुरिदं पुवः
पुण्याहादि स्थिरभ्यासे मंद्र मध्योच्चनिःस्वनं ॥ आश्रवे रस्मियेस्सर्वे यथागम परंपरं ॥ ततो वाच
यिता कुंभे जलं संस्कार्यम्नि धाननि ॥ किं चिसिं चेत्तद्वैवान्ये ब्रूयुस्त्र विविधाशिषः ॥ आपो हिष्ठादेय

स्तिस्रः शंनो देवीरस्त्वेकया ॥ ईशाना वार्याणामिति ॥ शुद्धवत्यघमर्षणं । तरत्समंदीतिसूक्तं सर्वपा
पप्रणोदनं । पवस्व सोमयादिक्षाभिः प्रोक्ष्य सम्मततः पुण्याहं वाचयित्वैवं सर्वकर्म्याणवाप्नु
वेत् । स्वस्तिवाचनमत्तुत्त्वस्य वेषामृद्धिकर्मणां ॥ आदानं तेच कर्तव्यमिति यज्ञविदो विदुः ॥ इति
शौनकाये पुण्याहवाचनविधानं ॥ प्रयोगपरिजाते हारीते चात्र विशेष उक्तः ॥ गोमयेनोपलिप्या
वीणं वहित्रिकया चर्चयेत् ॥ प्रस्थधान्योपरिस्थाप्यं पूर्णं हि कलशद्वयं ॥ दक्षिणोचोत्तरे चैव सु
वर्णेन समन्वितं ॥ तत्प्रमाणमुक्तं च चिह्नमुच्यमोत्तरे ॥ याचोदाह प्रतिष्ठादौ कुम्भाः स्युरभिषेचने ॥
पंचदशांगुलविपुलमुत्सेधे षोडशांगुलं ॥ द्वादशांगुलकं मूलं मुखमष्टांगुलं स्मृतं ॥ पुण्याह
वाचनं चैव ब्राह्मणस्य विधीयते ॥ तदेव च निरोंकारं कुर्यात्क्षत्रियवैश्ययोरिति पुण्याहवाचनवि
शेषविधानं ॥ ॥ अथ सर्वकर्मांगभूतं विनायकशांतिविधानं ॥ तस्या निष्टनिवृत्तिफलत्वेन
काम्यत्वपि ॥ एवं विनायकेश्वरस्यस्य ह्येव विधानतः ॥ कर्मणां फलमाप्नोतीति याज्ञवल्क्ये
तसर्वकर्मांगत्वोक्तेः ॥ याज्ञवल्क्यः ॥ विनायकः कर्मविघ्नसिद्ध्यर्थं विनियोजितः ॥ गणानां

मांपिपसेचरुदेण ब्रह्मणा तथा॥ तेनोपसृष्टो यस्तस्य लक्षणानि निबोधत॥ स्वप्नेऽवगाहतेऽत्य
र्थं जलं मुंडांश्च पश्यति। काषायवाससश्चैव क्रव्यादांश्चाधिरोहति॥ अंत्यजैर्गर्दभैरुष्ट्रैः स
१० हैकत्रावतिष्ठते॥ व्रजन्नपि तथात्मानं मन्यतेनुगतं परैः॥ विमना विफलारंभः संसीदत्यनि
मित्ततः॥ तेनोपसृष्टो लभते न राज्यं राजनंदनः॥ कुमारी न च भर्त्तारमपत्यं गर्भमंगना॥ आ
चार्यत्वं श्रोत्रियश्च न शिष्योऽध्ययनं तथा॥ वणिग्लाभं न चाप्नोति कृषिं चापि कृषीवलः
॥ अथ प्रयोगः॥ स्नपनं तस्य कर्त्तव्यं पुण्येऽह्नि विधिपूर्वकं॥ गौरसर्षपकल्केन साज्येनोत्सादि
तस्य तु॥ सर्वौषधैः सर्वगंधैर्विलिप्तशिरसस्तथा भद्रासनोपविष्टस्य तु स्वस्तिर्वाच्या द्विजैः शु रामः
भैः॥ अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्ध्रदात्॥ मृत्तिकां रोचनां गंधान्गुग्गुलं चाप्सु नि १०
क्षिपेत्॥ या आहृता ह्येकवर्णैश्चतुर्भिः कलशैर्ह्रदात्॥ चंदनागरुकस्तूरीकर्पूरादयः सुग
न्धयः॥ चर्मण्यानडुहे रक्ते स्थाप्यं भद्रासनं ततः॥ सहस्राक्षं शतधारमृषिभिः पावनं कृतं
॥ तेन त्वामभिषिंचामि पावमान्यः पुनंतु मे॥ भगं ते वरुणो राजा भगं सूर्यो बृहस्पतिः॥ भगमिं

द्रश्च वायुश्च भगं सप्तर्षयो विदुः॥ १॥ यत्ते केशेषु दौर्भाग्यं सीमंते यच्च मूर्द्धनि॥ ललाटे कर्ण
योरक्ष्णोरापस्तघ्नंतु ते सदा॥ स्नातस्य सार्षपं तैलं स्रुवेणौदुंबरेण तु॥ जुहुयान्मूर्द्धनि कुशा
न्सव्येन परिगृह्य च॥ मितश्च संमितश्चैव तथा शालकटंकटौ॥ कूष्मांडो राजपुत्रश्चेत्येतैः स्वाहा
समन्वितैः॥ नामभिर्बलिमंत्रैश्च नमस्कारसमन्वितैः॥ दद्याच्चतुष्पथे शूर्पे कुशानास्तीर्य
सर्वतः॥ कृताकृतांस्तंडुलांश्च पललौदनमेव च॥ तिलपिष्टमिश्रं चंदनं इ सर्पः॥ मत्स्यान्प
क्वांस्तथैवामान्मांसमेतावदेव तु॥ पुष्पं चित्रं सुगंधं च सुरां च त्रिविधामपि॥ गौडी पैष्टी माध्वी चे
ति त्रिविधा सुरे सर्पः॥ मूलकं पूरिकापूपांस्तथैवोंडेरकस्रजः॥ ॥ ॥ ॥
दध्यन्नं पायसं चैव गुडपिष्टं समोदकं॥ एतान्सर्वानुपाहृत्य भूमौ कृत्वा ततः शिरः॥ विनायकस्य
जननीमुपतिष्ठेत्ततोंबिकां॥ दूर्वासर्षपपुष्पाणां दत्वार्घ्यं पूर्णमंजलिं॥ रूपं देहि यशो देहि
भगं भगवति देहि मे॥ पुत्रान्देहि धनं देहि सर्वान्कामांश्च देहि मे॥ ततः शुक्लांबरधरः शुक्लमा
ल्यानुलेपनः॥ ब्राह्मणान्भोजयेद्दद्याद्वस्त्रयुग्मं गुरोरपि॥ एवं विनायकं पूज्येति॥ अथास्य

अथ प्रयोगः॥ गौरसर्षपकल्कादिसामग्रीं संपाद्य शुभे मुहूर्ते कृतनित्यक्रियोऽमुकप्रयोजनार्थं
विनायकशांतिं करिष्य इति संकल्प्य कृताध्ययनं तं ब्राह्मणमाचार्यत्वेन वृत्वा चतुरोऽन्यान् ऋत्विजो
११ वृत्वा ऋत्विग्भिः सहाचार्येण कर्म कारयेत्॥ तत आचार्यः शुभे संमार्जिते देशे पंचवर्णैः पि
ष्टैर्भद्रासनार्थमिके स्वस्तिकं कृत्वा तत्र रक्तमानडुहं चर्मोत्तरलोमं प्राग्ग्रीवं संस्थाप्य तत्र श्री
पर्ण्यादिपीठं निधाय श्वेतवस्त्रेणाच्छाद्य तस्य चक्षुर्दिक्षु प्ये तत्र श्रीपीठे कृतस्वस्तिकमंडलेषु
अव्रणाः स्फुटितिकवर्णांश्चतुरः कलशांश्चंदनादिचर्चितान्पुष्पमालावेष्टितकंठान्यस्त्रवेष्टितां रामः
धान्यराशौ निधाय ह्रदोदकेन नदीसंगमोदकेन वा कलशानापूर्य समंत्रकमेनं शं स्थापयित्वा उद्ध ११
तासीति पंचमृदः प्रक्षिप्य गंधद्वारेति चंदनादिगंधान्निक्षिप्य गुग्गुलमपि निक्षिप्य सहका
रादिपद्यत्त्वान्निधाय पूर्णपात्रं विन्यस्य तेषु वरुणं संपूज्य षोडशोपचारैः॥ स्वस्वशा॰
खोक्तां शांतिं पठित्वा भद्रासनस्योत्तरे देशे ईशान्यां पीठादिषु विनायकं अंबिकां च वक्ष्य
माणमंत्राभ्यामावाहनप्रभृतिउपचारैः संपूजयेत्॥ मंत्रौ तु॥ तत्पुरुषाय विद्महे वक्रतुंडाय

धीमहि॥ तन्नो दंतिः प्रचोदयात्॥ सुभगायै विद्महे काममालिन्यै धीमहि। तन्नो गौरी प्रचोदयात्
॥ इति अथ स्वगृह्योक्तविधिनाग्निं प्रतिष्ठाप्य चरुं श्रपयित्वाज्यभागांतं कृत्वा ततो गवाद्वल्मीको
द्धृतेन गौरसर्षपकल्केनोद्वर्तितांगं सर्वौषधिचूर्णैः श्रीचंदनागरुकस्तूरिकादिभिश्चानुलि
प्तांगं यजमानं भद्रासने उपवेश्य स्वगृह्यादिमार्गेण स्वस्तिवाचनं कुर्यात्॥ तत्र पूर्वदिशाव॰
स्थितं कुंभमादाय सहस्राक्षं शतधारं ऋषिभिः पावनं कृतं॥ तेन त्वा॥ मभिषिंचामि पावमान्यः
पुनंतु त इति मंत्रेणाभिषिच्य॥ ततो दक्षिणं कुंभमादाय भगं ते वरुणो राजेत्यादि सप्तर्षयो
विदुस्तेन मंत्रेणाभिषिच्य॥ ततो पश्चिमदिगवस्थितं कुंभमादाय यत्ते केशेषु दौर्भाग्यमित्या
दि आपस्तद्घ्नंतु सर्वदेत्यभिषिच्योत्तरं कुंभमादाय सहस्राक्षमित्यादिभिर्मंत्रैरभिषिचेत्॥
अथाचार्यः स्वसव्यपाणिगृहीतकुशांतरिते यजमानशिरसि सार्षपं तैलमौदुंबरस्रुवे
णाद्यः हुतीर्जुहुयात्॥ ते मंत्राः॥ ॐ मिताय स्वाहा॥ यथादैवतं त्यागः कार्यः॥ ॐ संमिताय
स्वाहा॥२॥ ॐ शालाय स्वाहा॥३॥ ॐ कटंकटाय स्वाहा॥४॥ ॐ कूष्मांडाय स्वाहा॥५॥ ॐ राज

पुत्राय स्वाहा ॥६॥ इति यजमानशिरसि हुत्वा एतैरेव षड्भिर्मंत्रैस्तस्मिन्नग्नौ पूर्ववत्कृतं चरुं हुत्वा हो
मशेषं समाप्याग्नेः समंतात्प्रागादिदिक्षु इंद्रादिब्रह्मांतेभ्यो दशदेवेभ्यस्तत्तल्लिंगकैर्मंत्रैः स
१२ सदीपान्बलीन्दत्वा यजमानं स्नापयेत् ॥ अथ स्नातः शुक्लांबरधरो यजमानो गुरुणा सहितो
विनायकायांबिकायै च किंचिदवहुतं संपूर्णीवहूत तंडुलांस्तिलपिष्टमिश्रितोदनेन पक्वान्म
त्स्यांस्तथादिविधं मांसं समूलकं पूरिकाः ॥ अपूपानेवर्चुलिपिष्टविकारान् उंडेरकास्तस्रजः ।
दध्यन्नं पायसं सगुडपिष्टमोदकांश्चोपहारत्वेन दद्यात् ॥ गंधे शांबिकयोः विचित्राणि पुष्पाणि त्रि
विधसुरां समूलमपि निवेदयेत्प्रत्येकं ॥ मत्स्यस्थाने माषादिः सुरास्थाने लवणसहितं क्षीरं रामः
देयमिति वेद्य विनायकमुपतिष्ठेत् ॥ उपस्थानमंत्रः ॥ रूपं देहि यशो देहि भगं भगवन्देहि मे मं १२
गं ॥ पुत्रान्देहि धनं देहि सर्वकामांश्च देहि मे ॥ अथांबिकोपस्थानं ॥ रूपं देहि यशो देहि भगं
वं भगवति देहि मे ॥ पुत्रानित्यादि समानं ॥ अथाचार्यः ॥ शुद्धैः कुशानास्तीर्य उपहारशेषेण कृ
ताक्षततंडुलादिमोदकांत तत्र निधाय चतुष्पथं गत्वा तत्रोपलिप्य वक्ष्यमाणमंत्रैर्बलिं नि

दध्यात् ॥ मंत्राश्च ॥ बलिं गृह्णंत्विमं देवा आदित्या वसवस्तथा मरुतो याश्विनौ रुद्राः सुपर्णाः पन्नगा ग्र
हाः ॥ असुरा यातुधानाः पिशाचा मातरस्तथा ॥ शाकिन्यो यक्षवेतालाः योगिन्यः पूतना शिवा
॥ जृंभकाः सिद्धगंधर्वा नागा विद्याधरा पंनगाः ॥ दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः ॥ जग
तो शांतिकर्तारो ब्रह्माद्याश्च महर्षयः ॥ मा विघ्नं मा च मे पापं मा संतु परिपंथिनः ॥ सौम्या भवंतु
तृप्ताश्च भूतप्रेताः सुखावहाः ॥ इति ॥ एवं बलिं दत्वा गृहमेत्याचम्य वस्त्रद्वयं सहितां दक्षिणां सप्र
तिमां आचार्याय दत्वा ऋत्विग्भ्यश्च दक्षिणां दत्वा ब्राह्मणान्भोजयित्वा तदाशिषो गृह्णी
यादिति विनायकशांतिविधानं ॥ ॥ श्रीसीतारामचंद्राभ्यां नमः ॥ अथ सर्वकर्मांगीभूतग्रहशां
तिविधानं लिख्यते ॥ तस्य श्रीकामः शांतिकामो वेति फलसंयोगेपि ॥ एवं विनायकं पूज्य ग्रहांश्चै
व विधानतः कर्मणां फलमाप्नोतीति याज्ञवल्क्येन सर्वकर्मसाधारण्योक्तेः तच्च येषां शाखितो
स्वगृह्ये स्वादावभिहितं तं स्तदेवानुष्ठेयं ॥ बह्वल्पं वा स्वगृह्योक्तमिति स्मृतिः येषां च स्वगृह्ये ग्रहयज्ञो
नोक्तस्तैर्याज्ञवल्क्योक्तः ॥ श्रीकामः शांतिकामो वा ग्रहयज्ञं समाचरेत् ॥ वृष्ट्यायुःपुष्टिकामो वा तथै

वाभिचरन्नपि॥ सूर्यः सोमो महीपुत्रः सोमपुत्रो बृहस्पतिः॥ शुक्रः शनिश्चरो राहुः केतुश्चेति ग्र-
ताः॥ ताम्रकात्स्फटिकाद्रक्तचंदनात्स्वर्णकादुभौ॥ रजतादयसः सीसात्कांस्यकार्या ग्रहाः क्रमात्
१३ स्ववर्णैर्वा पटे लेख्या गंधैर्मंडलकेषु वा॥ यथावर्णं प्रदेयानि वासांसि कुसुमानि च॥ गं-
बलयश्चैव धूपो देयश्च गुग्गुलुः॥ कर्त्तव्या मंत्रवंतश्च चरवः प्रतिदैवतं॥ आकृष्णेने-
अग्निर्मूर्द्धा दिवः ककुत्॥ उद्बुध्यस्वेति च ऋचो यथासंख्यं प्रकीर्तिताः॥ बृहस्पते अ-
दयस्तथैवान्नात्परिस्रुतः॥ शंनो देवीस्तथा काडात्केतुं कृण्वन्निमस्तथा॥ अर्कः पलाशः ख-
दिरस्त्वपामार्गोथ पिप्पलः॥ उदुंबरः शमी दूर्वा कुशाश्च समिधः क्रमात्॥ एकैकस्यात्व- राम: १३
ष्टशतमष्टाविंशतिरेव वा॥ होतव्या मधुसर्पिर्भ्यां दध्ना क्षीरेण वा युताः॥ गुडौदनं पाय-
सं च हविष्यं क्षीरषाष्टिकं॥ दध्योदनं हविश्चूर्णं मांसं चित्रान्नमेव च॥ दद्याद्ग्रहक्रमादे-
तद्द्विजेभ्यो भोजनं बुधः॥ शक्तितो वा यथालाभं सत्कृत्य विधिपूर्वकं॥ धेनुः शंखस्तथानड्वा-
न्हेम वासो हयः क्रमात्॥ यस्य यस्य यदा दुःस्थः स तं यत्नेन पूजयेत्॥ ब्रह्मणैषां वरो दत्तः

पूजिताः पूजयिष्यथ॥ ग्रहाधीना नरेंद्राणामुच्छ्रायाः पतनानि च॥ भावाभावौ च जगतस्तस्मा-
त्पूज्यतमा ग्रहाः॥ अन्यच्च सर्वमंगजातं द्वितीयस्तबके वक्ष्यते॥ ॥ इति याज्ञवल्क्योक्तग्रहशांति-
विधानं॥ ॥ अथ सर्वकर्मोपयोगि सर्वतोभद्रमंडलादि उच्यते॥ तदुक्तं शारदातिलके॥ चतुर-
स्रे चतुष्कोणे कर्णसूत्रसमन्विते॥ चतुर्थ्यपि च कोष्ठे च कोणसूत्रचतुष्टयम्॥ मध्ये मध्ये प-
श्चा मत्स्या भवेयुः पातयेत्तथा॥ पूर्वापरायते द्वे द्वे मंत्री याम्योत्तरायते॥ पातयेत्तेषु मत्स्येषु सम-
सूत्रचतुष्टयं॥ एवं कृते कोणकोष्ठेषु कर्णसूत्राणि पातयेत्॥ तद्भूतेषु मत्स्येषु दद्यात्सूत्रचतु-
ष्टयं॥ ततः कोष्ठेषु कर्णसूत्राणि पातयेत्प्रागुदीच्योर्गता रेखाः कुर्यात्सिसदृशे वतु॥ एवं शतद्व-
यं मंत्री षट्पंचाशद्द्वयान्यपि॥ तावत्तैव विधिना तत्र सूत्राणि पातयेत्॥ षड्विंशतापदे मध्ये
लिख्येत्पद्मं सलक्षणं॥ बहिः पंक्त्या भवेत्पीठं पंक्तियुग्मेन वीथिकाः॥ द्वारशोभोपशोभास्रा-
ण्णां तु शिष्टाभ्यां परिकल्पयेत्॥ शास्त्रोक्तविधिना मंत्री ततः पद्मं समालिखेत्॥ पद्मक्षेत्रस्य सं-
त्यक्त्वा द्वादशांशं बहिः सुधीः॥ तन्मध्ये विभजेद्वृत्तैस्त्रिभिः समविभागतः॥ आद्यं स्यात्कर्णिकास्था-

नं केसराणां द्वितीयकं ॥ तृतीयं तत्र पत्राणां मुक्तांशेन दलाग्रकं ॥ बाह्यांतरालं तस्य मानं तद्विधि
ना सुधीः निधाय केसराग्रेषु परितोर्द्धनिशाकरान् ॥ लिखित्वा संधिसंस्थानि तत्र सूत्राणि
२४ पातयेत् ॥ दलाग्राणां च यन्मानं तन्मानाद्वृत्तमालिखेत् ॥ तदंतरालं तन्मध्यसूत्रस्योभयतः
सुधीः ॥ आलिखेद्द्वादशहस्तेन दलायामं ततः ॥ दलमध्ये तु युगशः केसराणि प्रकल्पयेत्
एतत्साधारणं प्रोक्तं पंकजं तंत्रवेदिभिः ॥ यद्वा त्रीणि पादार्थं पीठकोणे पुनार्जयेत् ॥ अवशि
ष्टैः पदैर्विद्धि नां त्राणि परिकल्पयेत् ॥ पादानि वीथिसंस्थानि मार्जयेत्संख्यानेद्दतः ॥ द्विसुद्वारा रा.त.
णि रचयेद्द्विचतुष्कोष्ठकैस्ततः ॥ पदैस्त्रिभिरथैकेन शोभाः स्युर्द्वारपार्श्वयोः ॥ उपशोभाः स्यु २४
रेकेन त्रिभिः कोष्ठैरनंतरं ॥ अवशिष्टैः पदैः षड्भिः कोणानां स्याच्चतुष्टयं ॥ रंजयेत्पंचभिर्वर्णैर्मं
डलं तन्मनोहरं ॥ पीतं हरिद्राचूर्णं स्यात्सितं तंडुलसंभवं ॥ कुसुंभचूर्णमरुणं कृष्णं दग्धपु
लाकजं ॥ बिल्वादिपत्रकं श्याममित्युक्तं पंचवर्णकं ॥ अंगुष्ठेनैव तर्जन्या रुधेन वा ॥ शुक्लवर्णानि प
त्राणि तत्संधीन् श्यामलेन च ॥ रंजनं सारं जपेन्मंत्री यद्वापीतेन कर्णिका ॥ केसराः पीतवर्णाः स्युः ॥

रक्तारुणानि दलानि च ॥ संधयः कृष्णवर्णाः स्युः पीतेनाप्यसितेन वा रंजयेत्पीठगात्राणि पादाः स्यु
ररुणप्रभाः ॥ गात्राणि तस्य शुक्लानि वीथीषु च तथैव हि ॥ आलिखेत्कल्पलतिकादलपुष्प
फलान्वितं ॥ वर्णैर्नानाविधैश्चित्रैः सर्वदृष्टिमनोहरं ॥ द्वाराणि श्वेतवर्णानि शोभा रक्ताः
समीरिता ॥ उपशोभा पीतवर्णाः कोणान्यसितभानि चेति स्तोरे रेखा बहिः कुर्यात्सितरक्तासि
ताः क्रमात् ॥ मंडलं सर्वतोभद्रमेतत्साधारणं स्मृतं ॥ चतुरस्त्रं भुवं भित्त्वा दिग्भ्यो द्वादशधा
सुधीः ॥ पातयेत्तत्र सूत्राणि कोष्ठानां दृश्यते शतं ॥ चतुश्चत्वारिंशदाढ्यं पश्चात्षड्विंशतां बु
धः ॥ कोष्ठैः प्रकल्पयेत्पीठं पंक्त्यानेवान्यवीथिका ॥ द्वाशौरभे यथापूर्वमुपशोभान दृश्यते ॥ अ
वशिष्टैः पदैः कुर्यात्षड्भिः कोणानि तंत्रवित् ॥ विदध्यात्सर्वविद्वेषमेवं वा मंडलं शुभं ॥ चतुर
स्त्रे चतुष्षष्टिपादान्यारचयेत्सुधीः ॥ पद्मं त्वष्टभिः पद्मं स्यान्मध्ये तत्त्वद्विरितः पुनः ॥ वीथी
स्यात्तत्र सः कुर्वीत मंडलं तावसानिकाः ॥ दिगातेषु चतुष्कोष्ठेषु पंकजानि समालिखेत् ॥ विदिगात
तुष्कानि भित्त्वा षोडशधा बुधः ॥ मार्जकेस्वस्तिकाकारः श्वेतपीतारुणासितैः ॥ रजोभिः पूरये

त्वानि स्वस्तिकानि शिवादितः प्राक्तोक्तेनैव मार्गेण शेषमन्यत्समापयेत् ॥ नवनाभमिदं प्रो-
क्तं मंडलं सर्वसिद्धिदं ॥ पंचाब्जमंडलं प्रोक्तमेतत्स्वस्तिकवर्द्धितं ॥ दीक्षायां देवयज्ञे च मं-
१५ चं मंडलानां चतुष्टयं ॥ सर्वतंत्रानुसारेण प्रोक्तं सर्वसमृद्धिदं ॥ ॥ इति सारदातिलके सर्वतोभ-
द्रादि मंडलप्रकारः ॥ अथ स्कंदपुराणोक्तसर्वतोभद्रं ॥ प्रागुदीच्यां गता रेखाः कुर्यादेकोनविंश-
तिं ॥ खंडेंदुस्त्रिपदः कोणे पंचपादा तु शृंखला ॥ ॥ एकादशभिर्देवल्यो नवभिः पार्श्वभद्रकं
॥ ॥ चतुर्विंशपदा वापी परिधिर्विंशता वदेत् ॥ मध्ये षोडशभिः कोष्ठैः पद्ममष्टदलं स्मृतं ॥ सितें-
दुशृंखलिका पीतवल्लिका ॥ गौरा कृष्णा तथा पीता तथैव च ॥ इमानि पंच वर्णानि च भद्रादिक्र- रामः
मतो न्यसेत् ॥ परिधित्रयसंयुक्तं वाह्ये सत्वरजोसितैः ॥ अथ मंडलदेवताः कथ्यंते ॥ ॥ सं- १५
ग्रहे ॥ ब्रह्मस्थानं स्मृतं मध्ये सोमस्तस्योत्तरे भवेत् ॥ ईशान्यामीश्वरः प्रोक्त इंद्रं पूर्वे प्रपूजय-
त् ॥ आग्नेय्यामग्निमावाह्य दक्षिणस्यां यमं जपेत् ॥ नैर्ऋत्यां निर्ऋतिः प्रोक्तः प्रतीच्यां वरुणं य-
जेत् ॥ वायव्यां चैव वायुं च सोमं चैवोत्तरे न्यसेत् ॥ ईशोधाता भगः पूषा मित्रोथ वरुणो यमः

॥ अंशुर्विवस्वांस्त्वष्टा च विष्णुर्वसव एव च ॥ इंद्रादित्यौ च सोमश्च कुजज्ञौ गुरुभार्गवौ ॥ शनी
राहुः केतुरभिः पूर्वपरिधिदेवताः ॥ क्रतुर्दक्षो वसुः सत्यः कालः कामो निलोनलः ॥ अंगिरा पुल-
हश्चैव क्रतुः प्राचेतसस्तथा ॥ वसिष्ठश्च भृगुश्चैव तथा नारद एव च ॥ एताश्च देवताश्चैव
दक्षिणे पंक्तिदेवताः ॥ ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ॥ माहेश्वरी द्रा चैव चामुंडा
वरुणः सरितां पतिः ॥ इक्षुदश्च सुरोदश्च दध्योदो गुडसागराः ॥ घृतोदः क्षीरसिंधुश्च पश्चि-
मे पंक्तिदेवताः ॥ ध्रुवो धरश्च सोमश्च सुउउआप नलोनिलः ॥ अजैकपादहिर्बुध्न्यो विरू-
पाक्षो थ रैवतः ॥ पशुपश्च प्रभासश्च कुबेरश्चैव देवताः ॥ एता उत्तरतः पूज्याः सर्वतोभद्रदेव-
ताः ॥ इंद्राग्निमध्ये स्थाने च अश्विनौ परिपूजयेत् ॥ आग्नेययमयोर्मध्ये विश्वेदेवान्सपैतृकान् ॥ य-
मनैर्ऋतयोर्मध्ये सप्तयक्षांश्च पूजयेत् ॥ नैर्ऋत्यं वरुणयोर्मध्ये सप्तनागांश्च पूजयेत् ॥ वरुण-
वायव्ययोर्मध्ये गंधर्वाप्सरसस्तथा ॥ वायव्यसोमयोर्मध्ये वसवोष्टौ तु कारयेत् ॥ सोमस्ये-
शानमध्ये च रुद्रानेकादशान्यजेत् ॥ ईशानस्येंद्रयोर्मध्ये तु आदित्यान्द्वादशैव तु ॥ स्वयंभ्

सोमयोर्मध्ये महादेवं प्रपूजयेत्॥ स्कंदं नंदीश्वरं चैव तत्रैव च पूजयेत्॥ द्रुहिणेशानयोर्म
ध्ये दक्षादीन्संप्रसंप्रजेत्॥ परमेष्ठीन्द्रयोर्मध्ये दुर्गां विष्णुं प्रपूजयेत्॥ द्रुहिणाग्नेययोर्मध्ये स्वधां
चैतत्र पूजयेत्॥ विरिंचियमयोर्मध्ये मृत्युरोगांश्च पूजयेत्॥ ब्रह्मनैर्ऋत्ययोर्मध्ये पूजयेच्च ग
णाधिपतिं॥ ॥विरिंचिवरुणयोर्मध्ये अपां स्थानं विदुर्बुधाः॥ ॥ब्रह्मवायव्ययोर्मध्ये मरुत
स्तत्र संजेयत्॥ ॥ब्रह्मणः पादमूले तु पृथिवीं पूजयेद्यथा॥ ॥गंगा गोदावरी कृष्णा यमुना च
सरस्वती॥ ॥तापी च नर्मदा चैव यजेत्तत्रैव सर्वकं॥ ॥उत्तरेणास्य दिक्पालान्सप्तसागरांस्त
त्रैव यजेत्॥ ॥कर्णिकोपरि मेरुः स्यात्सत्वेपरिधिकेन्दुतः॥ सोमादिसंनिधौ चैव आयुधा
निक्रमेण तु॥ गदां त्रिशूलं वज्रं च शक्तिं दंडासि पाशकं॥ अंकुशं चिन्तयेत्तद्वास्य उत्तरादिक्र
मेण तु॥ गौतमो भरद्वाजो विश्वामित्रोथ कश्यपः॥ जमदग्निर्वसिष्ठश्च अत्रिश्चैवाथ
सप्तमम रुंधत्यष्टमी चैव पयष्टव॥ अर्च्यांतिमे॥ परिधौ प्राक्क्रमेणैव ऐंद्राद्याश्चैव मा
तरः मंडलस्य बहिर्मेहन्कान्पूजेत्॥ स्थाप्येवं देवता सर्वाः संपूज्यं च यथाविधि॥ कुंडे वा

स्थंडिले वाग्निं प्रतिष्ठाप्याथ होमयेत्॥ तिलाज्येर्द्दसहस्रख्याकाआहुतीः प्रतिदेवतां॥ क्षीरोद
दनं ब्रह्मणे तु इंद्रादीनां यथाविधि॥ बलिं दद्यात्प्रयत्नेन यथालाभं निचक्षणः॥ एवं मंडलदे
वांश्च पूजयेन्मंडले शुभे॥ तस्य देवाः प्रसीदंति कृतं कर्म शुभावहं॥ अनिष्टं मंडले देवाः कर्म
शांतिकपौष्टिकं॥ यः करोति स दुर्मेधा मोघं तत्तस्य चेष्टितमित्ति॥ ॥इति न सर्वत्तोभद्रादिमं
डलविधानं॥ ॥अथ स्त्रीसंबंधिविधानान्युच्यते॥ तत्रादावपुष्पवतीत्वहरविधानं॥ महे
श्वर उवाच॥ पितामहः॥ क्षुत्पिपासातुया नारी भर्त्तारि मवमन्यया॥ मिष्टान्नं स्वयमश्नाति
तेन पुष्पवती भवेत्॥ तस्याः शांतिं प्रवक्ष्यामि सुविधानं द्विजोत्तमे॥ पायसं जुहुयात्तत्र म
धुसर्पिसमन्वितं॥ अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा॥ दुर्गासिंपूजनीयात्र नववस्त्रहेतु
पुरःसरं मिथुनानि च पंचाशद्भोजयेन्मिष्टमन्नकं॥ दद्यात्सौभाग्यवस्तूनि तेभ्यः शक्त्यानु
सारतः॥ इक्षवः स्तवराजं च हरिद्रं चैव धान्यकं॥ विकारवच्च गोक्षीरं कुसुमं कुसुमं तथा॥
लावण्यं चाष्टमं ह्येतत्सौभाग्याष्टकमुच्यते॥ तवराजं सौभाग्यकरं वसुतं द्रावकं द्रव्यं॥ कर्पूरं शर्क

राबा विकारवक्रोष्ठीरं आमिक्षां दधि वा ।। एवं कृते त्रिधाने तु चेद्रजोदर्शनं भावस्तदा शक्त्यनुसा
रेण कर्मणा आवृत्तिः कार्या ।। इति पुष्पवतीत्वहरविधानं ।। प्राग्रजोदर्शनात्सर्वा नैर्यात्वापस्था कु
२७ तयः ।। व्यायीकारेण स्नुक्रस्य ब्रह्महत्यामवाप्नुयादिति प्रयोगपारिजाते निहितत्वादवश्यं र
जोदर्शनार्थं कर्त्तव्यं तिमिति भावः ।। ।। अथ प्रथमरजोदर्शनविधानं ।। तत्रादौ शुभाशुभनि
रीक्षणं ।। कर्त्तव्यं ज्ञातिभिः सम्यग्धर्मशास्त्रविधानतः ।। अथ वस्त्रफलं ।। शुभाय श्वेतवस्त्राद्या त
रोहिणी रक्तवाससा ।। नीलांबरधरा नारी विधवा जायते ध्रुवं ।। भोगिनी पीतवस्त्राणी ।।
।। आलोहिते भवेद्दुःख्या श्वेतवर्णे च पुत्रिणी ।। कृष्णे च विधवा नारी रजस्येतत्तुल्यफलं ।। ऊर्ध्वं राम:
संवत्सरार्धेन मासे पक्षे तथा खलु ।। रजस्तु दृश्यते स्त्रीणां सर्वदैवाशुभावहं ।। अथ तिथि २७
धावा नारी प्रतिपच्चरतांस्त्रजा ।। वैधव्यं द्वितीयायां पुत्रवर्द्धनी ।। सौभाग्यदा तृतीया
चतुर्थी सुखनाशिनी ।। पंचमी सुभगा चैव षष्ठी संपत्तिनाशनी ।। सप्तमी धननाशाय पुत्र
दा सौख्यदाष्टमी ।। नवमी क्लेशदा स्त्रीणां दशमी च सुखप्रदा ।। एकादशी ऽर्थनाशाय द्वाद

शी रतिवर्द्धनी ।। त्रयोदशी शुभा ज्ञेया दुर्भगा च चतुर्दशी ।। पौर्णमासी त्वमावास्य दुःखरोगा वि
वर्धनी ।। अथ मासफलं ।। तत्रैव ।। चैत्रमासि विशेषेण वैधव्यं लभते ध्रुवं ।। वैशाखे बहुपुत्राढ्या
ज्येष्ठे रोगावृता भवेत् ।। आषाढे मृतप्रजा प्रोक्ता श्रावणे धनिनी भवेत् ।। भाद्रे तु दुर्भगा ह्याश्वा
श्विने च पस्विनी ।। कार्त्तिके निर्द्धना बाला मार्गशीर्षे बहुप्रजा ।। पौषे स्यात्स्वैरिणी नारी मा
घे पुत्रसुखान्विता ।। फाल्गुने सर्वसंपन्ना प्रथमर्त्तौ फलं स्मृतं ।। अथ फलं वार ।। आदित्ये वि
धवा नारी सोमे दैन्यमवाप्नुयात् ।। मंगले ह्यात्मघाताय बुधे च धनिनी भवेत् ।। गुरौ च मह
सुखदा कन्या पुत्रप्रसूर्भृगौ ।। पौंश्चल्यकरणं मंदे क्रियते भर्तुरन्यतः ।। ।। अन्यच्च अन्यथा पि
रोगी पतिव्रता दुःखा पुत्रिणी भोगभागिनी ।। पतिव्रता क्लेशभागी सूर्यवारादिषु क्रमात् ।। अ
३ शेकवर्द्धन ।। थ वेलाफलं ।। प्रातःकाले रजस्त्रीणां प्रथमे संगवे सुखसंततौ मध्याह्ने धनसंततौ ।। अपराह्ने
वा धनी प्रतिसायाह्ने मध्यमफलं ।। पूर्वरात्रे सुखफलं मध्यरात्रे धनक्षयः ।। अपररात्रेऽर्थनाशाय
प्रथमर्तुफलं स्मृतं ।। अथ स्थानफलं ।। गृहमध्ये सुखावाप्तिर्गृहद्वारे वियोगिनी ।। राथ्योद्या

सुखादा भर्त्सा बनेका पसस्संततिः॥ अथ दृष्टफलं॥ पुरं व्यादृश्यते यत्तु रजः स्त्रीणां सुखाय तत्
॥ विश्वस्तया तु मद्दृष्टं रजो वैधव्यदं स्मृतं॥ रजः पश्यति चेत् कन्या पुमांस्त्वा तत्सुखं भवेत्॥ स्वयं
१८ दृष्टं तथा स्त्रीणां आत्माघाताय कल्पते॥ पितुर्गृहे रजो दैन्यं विदृष्टा निपि तुः कुले॥ देवस्थाने
पितृस्थाने निचस्थाने ऽन्यवेश्मनि॥ मार्गभित्ते वियोगं च चंडाला द्घमृतप्रजा॥ अथ नक्ष
त्रफलं॥ अश्विनी सुखदा स्त्रीणां भरणी कामवर्द्धनी॥ कृत्तिका दैन्यदा ज्ञेया रोहिणी सुखदा
भवेत्॥ मृगस्तु कामभोगाय सुखदं रुद्रदैवतं॥ अदितिस्तु सुखं दद्यात् पुष्यं सुखवर्द्धनं॥
आश्लेषा सुखनाशाय मघा वैधव्यदा स्मृता॥ पूर्वाफाल्गुनिका पुत्रकन्यादि सुखवर्द्धनी॥ उत्त राम: १८
रा ह्यर्थनाशाय हस्तः पुत्रविवर्द्धनः। चित्रा चित्रतनुं नारीं कुरुते नात्र संशयः॥ स्वाती शुभाय
नारीणां विशाखा सुखनाशिनी॥ अनुराधार्थभोगाय ज्येष्ठा भर्तृवियोगदा॥ शुभं याप्यमु
नं मूलं पूर्वाषाढार्थनाशिनी॥ सुखदा चोत्तराषाढा श्रवणः सुखवर्धनः धनिष्ठा पंचकं स्त्रीणां
प्रथमं चौ सुखमदं॥ ॥ तिथिरेकगुणा प्रोक्ता नक्षत्रं च चतुर्गुणं॥ वारः षष्ठगुणो ज्ञेयो मासा सा—

ष्टगुणः स्मृतः॥ वस्त्रं दशगुणं विद्याद्दर्शनं च ततोऽधिकं॥ शुभं चेद्रजः स्त्रीणां प्रथमर्तौ हि दृश्यते॥
विधानं तत्र कर्त्तव्यमरिष्टघ्नं च विशेषतः इति॥ ॥ अथ रजस्तु स्वरूपं॥ नाभिमूले स्थितं पुष्पं चतुर्द्द
लसमन्वितं॥ तस्मिन्नस्त्वाश्रि द्दृश्यते गर्भसंभवकारणं॥ अधोमुखं स्थितं स्त्रीणां नद्यां ल्पे मुकु
लीकृतं॥ बाल्यत्वयप्राप्तो मुकुलं विकसत्त्वं भवेत्तु॥ उत्फुल्लपद्मं स्त्रीणां स्वभावेन स्रवेद्रजः॥ तदाप्र
वृत्ति सर्वासां मासि मासि [illegible] त्रतु भवेदिति॥ अथ योगफलं॥ परिघस्य तु पूर्वार्द्धे व्यतीपाते च
वैधृतौ॥ संध्याप्लप द्वय वे विष्टया मशुभं प्रथमार्त्तवं॥ विष्टिर्भद्रेत्यर्थः॥ अन्यत्रापि ज्ञमासं क्रांति
विघ्नादो व्यतीपाते च वैधृतौ॥ परिघस्य तु पूर्वार्द्धे षट्षट् गंडातिगंडयोः॥ व्याघाते नव शूले तु
ना ऽः पंच तु दर्शने॥ वैधव्यमर्थहानिं च सुतनाशं महद्भवेत् वैधव्यं रानुवृद्धिं च दारिद्र्यं स्त्रीणां जीव
नं॥ तज्ञो हानिं समायांति एवं पुष्पवती क्रमात्॥ अथ राशिफलं॥ मेषे स व्यभिचारा स्याद्वृष
भे परभोगिनी॥ मिथुने धनभोगाढ्या कर्कटे व्यभिचारिणी॥ पुष्पाढ्या सिंहराशौ तु कन्यायां स्त्री
णां॥ तथा॥ विलक्षणा तु लायां तु वृश्चिके तु पतिव्रता॥ दुश्चारिणी धनुः पूर्वे अपरे च पतिव्रता।

...न हीना च कुंभे निर्द्धनं वध्यता ॥ मीने विद्वत्पणो लग्ने ग्रहसंस्था विवाहवत् ॥ अथ लग्नफलं
...तही ये ॥ लग्नस्य सप्तमस्थाने सूर्ये वैधव्यकारकः ॥ पुत्रहानिं केतुश्चारो बुधः सत्पुत्र
१८ दो भवेत् ॥ आरो मंगल इत्यर्थः ॥ रहस्यं तिधनी पुष्पं भृगुः सापत्न्यकारकः ॥ शनिश्चरे चा वध्या
स्यात् ग्रहैस्तु मरणं ध्रुवं ॥ ॥ अथ गुरुशुक्रोदयफलं ॥ आयुः श्रीः प्रीतिरारोग्यमुदिते गुरुभार्ग
वे ॥ मंदोदये विरोधः स्यात् क्लेशः स्यात्तामसोदये ॥ तामसो राहुः ॥ अन्यच्च ॥ ॥ समो दुर्दिनाष्टकोत्त
णाग्निर्द्धपन्निस्तोदयानां कुलटा तदा स्यात् ॥ स्वोपभोगे तपसि स्थिता चेद् दृष्टं रजो भाग्यवती तदा रा॰म॰ः
स्यात् ॥ इत्यादि सर्वं ज्योतिःशास्त्रतोवगंतव्यं ॥ ॥ अथ प्रमत्तौ मंगलाचारः ॥ प्रयोगपारिजातस्मृ
तिचंद्रिकायां ॥ प्रथमर्तौ तु पुष्पवत्याः पतिपुत्रवतीस्त्रियाः ॥ अक्षतैरासनं कुर्यात्तस्मिंस्तामुपवे १८
शयेत् ॥ हरिद्रा गंधपुष्पाद्यैर्दद्यात्तांबूलकंकणं ॥ आशिषो वाचयेयुस्ताः पतिपुत्रवती भव ॥
दीपैर्नीराजनं कुर्याद्दीपिवासद्गृहे ॥ नाःसर्वं पूजयेत्सम्यग्गंधपुष्पाक्षतादिभिः ॥ लवणापू
पमुद्गादि दद्यात्ताभ्यः स्वशक्तितः ॥ अन्यत्र ॥ दक्षः ॥ आर्त्तवाभिप्लुता नारी नैकावेश्मनि संवि

शेत् ॥ न संसर्गं व्रजेत्सद्भिःस्नात्वा पापात्प्रमुच्यते ॥ अंगिराः ॥ नान्यजनेस्नानं प्रवासं दंतधावनं ॥ न कुर्यात्सा
र्त्तवा नारी ग्रहाणामीक्षणं ॥ तथा शरखानां कृंतनं रज्जुतालपत्रादिबंधनं ॥ नेत्रनुयज्यते ॥ दग्धेश
रावे चुलीतपेयं चांजलिना पिबेत् ॥ ॥ अथ प्रगाढरजस्वलास्पर्शशुद्धिविधानं ॥ ॥ स्मृतिरत्नावल्यां
दक्षः ॥ उदक्ये द्वे सगोत्रे वा सवर्णे वा पुनः ॥ तयोः स्नानं मिथः स्पर्शे पिंचगव्यं ततः पिबेत् ॥ स
वर्णयोनिसंबंधे सगोत्रे च रजस्वले ॥ मिथः स्पर्शे दमत्या तु स्नानमात्रेण शुध्यति ॥ मत्स्यैकरात्रं
नाश्नीयात्पंचगव्यं पिबेत्ततः ॥ उदक्ययोर्यदान्योन्यमसंबंधः सवर्णयोः ॥ स्पर्शे दमत्या स्नात्वा
च तस्मिन्नाशुचिर्भवेत् ॥ तस्मिन्नुस्पर्शदिने मत्सा तु नाद्यात् शुद्धे मुक्तो चेत्प्रतिवासरं ॥ उपोष
तां तदा केचिदाहुस्त्वादिनसंख्यया च शक्ता चेत्समं दानमाचरेत् ॥ संभाषेतां स्पृशेतां वा ब्राह्मण
तेये चरजस्वले ॥ आस्नानकालान्नाश्नीतो ह्युभे मत्स्यामिषः क्वचित् ॥ स्नात्वोपवासं कुर्यातां पंचग
व्येन शुध्यतः एवमभ्यासतः [illegible] प्रायश्चित्तं समाचरेत् ॥ तत्पारजस्वलान्योन्यं वृषली ब्राह्मण
[illegible] राहरीता ब्राह्मण्याः कृच्छ्रमेकं तु शूद्रा पादेन शुध्यति ॥ कश्यपः ॥ रजस्वला सूतिका वा चांडा

लं यदि संस्पृशेत्॥ आस्नानकालं नाश्नीयादिति कृच्छ्रं समाचरेत्॥ चंडालं सार्त्तवा नारी संस्पृशेत्क्रो
जनात्तरे॥ वाग्यता बहिरासीना स्नानकालाद् उपोषणं प्रजापसंचरेत्सर्वं पंचगव्यं ततः पिबेत्॥
२० विप्रान् द्वादशसंख्यान् भोजये॥ जपित्वा विशुध्यति॥ पुष्पिणीं संस्पृशेन्मोहात् दग्धशुद्धं वा नरास्त्रियं॥ स्ना
त्वाद्भिः भुंजीत भुक्त्वा कृच्छ्रं समाचरेत्॥ स्पृष्ट्वोदक्याश्च नरयानि शौचं कृत्वा स्पृष्ट्वान्यं स्पृशेत्॥ अंड
जानि च सर्वाणि नाचोदास्नानेन सरात्॥ पाराशरः॥ रजस्वलायदा दष्टा शुना जंबुकरासभैः
। पंचरात्रं निराहारा पंचगव्येन शुध्यति॥ ऊर्ध्वं अनुद्धिगुणं नाभेर्वक्त्रे चतुर्गुणं तथा॥ चतुर्गुणं
स्मृतं न्यूर्द्धि दंशेन्यत्रावतीर्भवेदिति॥ कृच्छ्रप्रकारस्तु मिताक्षरायां॥ एकभक्तेन नक्तेन तथैवाया रामः
चितेन च॥ उपवासेन चैकेन पादकृच्छ्रः प्रकीर्त्तितः॥ यथाकथंचित्त्रिगुणः प्राजापत्योपमुच्यत २०
इत्याद्युक्तस्तत्प्रत्याम्नायोपि तत्रैव द्रष्टव्यः॥ ग्रंथबाहुल्यभीत्यान लिख्यते कृच्छ्रादि व्रतं तु स्ना
नोत्तरकार्यं॥ नैमित्तिकस्नानप्रकारस्तु स्मृत्यर्थसारे॥ स्नाने नैमित्तिके प्राप्ते रजोदर्शने
पात्रांतरिततोयेन स्नात्वाद्भिः सिक्तगात्रासां गोपांगा वस्त्रसंनिष्पीड्यान्यवस्त्रधारणं कृत्वा व्रतं

चरेदिति॥ अथ शुद्धस्नानं स्मृत्यर्थसार एव॥ रजस्वला षष्टिमृत्तिकाभिः शौचं कृत्वाक्षत्रियादि
स्त्री पादशून्यून मृत्तिकाभिर्विधवादिगुणमृद्भिः शौचं कृत्वा मलं प्रक्षाल्य दंतधावनपूर्वकं सं
गवे स्नायात्॥ इति॥ अथ स्नानानंतरमपि रजःस्रावे विशेषोभिधीयते॥ कात्यायनः॥ रज
स्वला यदा नारी त्रिरात्रमशुचिर्भवेत्॥ प्रथमेहनि चांडाली द्वितीये ब्रह्मघातिनी॥ तृतीये र
जकी प्रोक्ता चतुर्थेहनि शुध्यति॥ भर्त्तुः शुद्धा चतुर्थेह्नि स्नाता नारी रजस्वला॥ दैवे कर्मणि पि ३
त्र्ये च पंचमेहनि शुद्ध्यतीत्युक्ताभिरिति॥ रागजं रोगजं चैव द्रव्यजं कालजं कालजं तथा॥
यथा गरोग द्रव्योत्थं तत्र कुशोह भौर्गवः॥ कालजं तु रजः संज्ञं तस्मात्तत्रैव साशुचिः॥ एषां ल
क्षणानि॥ अर्वाक्यस्तेरु यत्रोभेदो वंध्यांगनासु यत्॥ न प्रागजमिति प्रोक्तं प्रजोद्रेकसमु
द्भवं॥ पित्रादिदोषवैषम्यादसकृत्संप्रवर्त्तते॥ रोगजं गसमुद्दिष्टमथ द्रव्यजमुच्यते॥ रोगे
णयद्रजः स्त्रीणां मन्वहं संप्रवर्त्तते॥ नाशुचिस्त्री तत्र स्तेन यतो वैकारिकं मलं॥ द्रव्यजं धातु
वैषम्य हेतु द्रव्योपभोगजमिति॥ आरभ्य चार्त्तवदिनाद् एकविंशति वासरे॥ मासा दूर्ध्वं रजो

यस्यास्तः कालजमुदाहृतं॥ रजस्वला यदा नारी पुनरेव रजस्वला॥ सा विंशतिदिनादूर्ध्वं त्रिरा
त्रमशुचिर्भवेत्॥ ततः पूर्वं तु रजस्वला यदि स्नाता पुनरेव रजस्वला अष्टादशादिनादर्वा
२९ गशुचिर्न विद्यते॥ एकोनविंशतेरर्वागेकाहं स्यात्ततो द्व्यहं॥ विंशत्प्रभृतसु तरेषु त्रिरात्र
मशुर्नवेदिति॥ काश्यपस्तु॥ रजस्वला सती नारी पुनरेव रजस्वला अष्टादशाहात्प्रागर्वा
प्यशुचिः स्यात्त्रिरात्रकं॥ त्रयोदशदिनादूर्ध्वं रजसा ज्यते यदा॥ अष्टादशाहात्प्राग्वा॥
पि त्रिरात्रमिति निश्चयः॥ एकादशे त्वहोरात्रं द्विरात्रं द्वादशेहनि॥ ऊर्ध्वं त्रिरात्रं विज्ञेयमि राम:
यमिति कुंडलिचोदितमित्यादिपरस्परविरुद्धवचनं जातिगुणवयोवस्थादेशभेदेन व्य २९
स्थास्थापनीयं॥ रजःकालाज्ञाने प्रजापतिवरहा॥ अविज्ञाते मलेसाच मलवद्दसना यदि
॥ छतं गेहपुजुर्ह स्याच्छुद्धिस्तस्यास्त्रिरात्रतः॥ रजःप्राप्तिकालं संदेहेपिसस्पएवाहा॥ निः
संदेहे परिज्ञाते आर्तवे शुद्धिकारणं॥ संदेहमात्रे स्नानं स्यादित्युवाच प्रजापतिरिति॥
अथ रात्रौ रजोदर्शने विशेषः॥ अर्द्धरात्रपर्यंतं पूर्वदिनगणना वा॥ त्रिभागायां रात्रेर्भागद्व

यं पूर्वदिनांतर्गतमित्यन्ये॥ सूर्योदयावधि पूर्वदिनमित्यपरे॥ तदाह काश्यपः॥ उदिते तु यदा
सूर्ये नारीणां दृश्यते रजः॥ जननं वा विपत्तिर्वा यस्याहस्तस्य शर्वरी॥ अर्धरात्रावधि कालः॥
सूतकादौ विधीयते॥ रात्रिं कुर्यात्त्रिभागां तु द्वौ भागौ पूर्वगामिनौ॥ उत्तमोंशः प्रभातेन युज्य
ते मृतसूतके॥ रात्रावेव समुत्पन्ने मृते रजसि सूतके॥ पूर्वमेव दिनं ग्राह्यं यावन्नाभ्युदितो
रविरिति॥ अत्रापि देशाचाराद्विनाव्यवस्था द्रष्टव्या॥ ॥अथ रजस्वलाया ज्वरादिरो
गसंभवे शुद्धिविधानं॥ ॥स्मृत्यर्थसारे॥ रजस्वलां ज्वरितां च चतुर्थेहनि सचैलमगौ वेद्दो
च मध्ये दश कृत्वो द्वादश कृत्वो वान्या तां स्पृष्ट्वाचामेदिति॥ उशनापि॥ ज्वराभिभूता या ना
री रजसापि परिप्लुता॥ कथं तस्या भवेच्छौचं शुद्धिः स्यात्केन कर्मणा॥ चतुर्थेहनि संप्राप्ते
स्पृशेदन्या तु तां स्त्रियं॥ सा सचैलावगाह्यापः स्नात्वा स्नात्वा पुनः स्पृशेत्॥ दशद्वादशकृ
त्वो वा आचामेच्च पुनःपुनः॥ अंते च वाससां त्यागस्ततः शुद्धा भवेत्तु सा॥ दद्याच्छक्त्या ततो
दानं पुण्याहेन विशुद्ध्यति॥ आतुराणां तु वै स एषा मेवं शुद्धिर्विधीयत इति॥ अथोदक्या॥

स्पृष्टानां चेतनानां सचैलस्नानं अचेतनपीठादीनां प्रक्षालनं॥ तत्रोदक्यादिस्पृष्टाचेतनस्प
र्शे आचमनं॥ उदक्याऽशुचिभिः स्नात्वा संस्पृष्टस्तैरुपस्पृशेदिति याज्ञवल्क्यस्मरणात्॥ उदक्या
२२ दिस्पृष्टचेतनस्पर्शे द्वितीयस्यापि स्नानमेव॥ यथाह मनुः॥ ॥ दिवाकीर्तिमुदक्यां च पतितं
तं सूतिकां तथा॥ शवं तत्स्पर्शिनं चैव स्पृष्ट्वा स्नानेन शुध्यति॥ तृतीयस्य त्वाचमनं॥ यथाह सं
वर्त्तः तत्स्पर्शनिस्पृशो यस्तु स्नानं तस्य विधीयते॥ ऊर्ध्वमाचमनं प्रोक्तं द्रव्याणां प्रोक्षणं तथेति
॥ एतदमतिविषयं॥ बुद्धिपूर्वस्पर्शे तु॥ तृतीयस्यापि स्नानमेव॥ पतितचंडालसूतिको
दक्याशवस्पर्शितत्स्पृश्युपस्पर्शने सचैलमुपस्पर्शनाच्छुध्येदिति॥ गौतमस्मरणात् रा.म. २२
चतुर्थस्याचमनं॥ यथाह देवलः॥ उपस्पृश्याशुचिस्पृष्टं तृतीयं चापि मानवः॥ हस्तौ पा
दौ च तोयेन प्रक्षाल्याचम्य शुध्यति॥ अशुद्धस्योदक्यादिस्पर्शे तु देवलः॥ अशुद्धान्स्व
यमप्येतानशुद्धस्तु यदि स्पृशेत्॥ स शुध्यत्युपवासेन तथा कृच्छ्रेण वा पुनः॥ स्पा
दिस्पर्शे तूपवासः कृच्छ्रस्तु स्वपचादिके इति॥ एवं प्रासंगिकं परिसमाप्य प्रकृतमुच्यते॥

विष्णुधर्मोत्तरे॥ ॥ पंचमे दिवसे स्नात्वा द्वाभ्यामप्यथ मंगलैः॥ द्वाभ्यां दंपतीभ्यां तु दद्याच्च वारिभिः
कोष्णैः पंचपल्लवसंयुतैः॥ तिलतैलेन शुद्धेन शुभकल्केन वै पुनः॥ आह्निकं च विधिं कृत्वा विधा
नेन समाचरेत्॥ शुभाचारसमायुक्तः श्रद्धया परया युतः॥ स्थंडिले तु ततः कृत्वा स्वस्तिवा
च्यं द्विजोत्तमैः॥ अग्निप्रतिष्ठापूर्वं च हवनं तत्र कारयेत्॥ अष्टोत्तरसहस्रं च जुहुयात्तिल
सर्पिषा॥ प्रधानं पायसं प्रोक्तं संघृतं च सशर्करं॥ आकृष्णेनेति मंत्रेण मूर्द्धानमिति वा
पुनः॥ सूर्यसूक्तेन यद्विद्वान्विष्णुसूक्तं तथैव च॥ सूर्यपूजा पूर्वकं च कुसुमैः करवीरकैः॥ सु
रकैर्गुग्गुलैर्दीपैर्धूपार्घ्यदीप एव च॥ वस्त्रैरुत्तरतो विद्वान्स्थापयेत्कदलीं शुभां॥ हेमजां पं
चपलाद्यां च पलस्यापि सुलक्षणां॥ पलार्धेन तदर्धेन तदर्धार्धेन वा पुनः॥ सुस्तंभां पंच
पत्राढ्यां कदलैश्च विराजितां॥ राशौ द्वात्प्रतिष्ठां तु तंडुलानां नृपोत्तम॥ तंडुलानां परीमा
णं मंडकानां चतुष्टयं॥ दद्यात्तां विप्रवर्याय ससवस्त्रां च सदक्षिणां॥ अलंकृतां यवि
श्रोत्रियाय कुटुंबिने॥ ॥ ॥ दानमंत्रस्तु॥ ॥ सुपत्रे सुभगे देवि रंभे भास्करव

हव्यमे॥ ॥रक्षसां रजसो दोषात् दुष्टस्यास्य विगर्हिता॥ दानेन तव देवेश सविता सप्तवाह
नः॥ प्रीतोऽस्तु मे सदा दोषहरस्तु दुष्टजं॥ अथाचार्यप्रार्थनामंत्रः॥ आचार्यस्त्वं महाभाग रजो
२३ दोषं विनाशय॥ दानस्यास्य प्रभावेन रजोदोषाच्च पाहि मां॥ ॥आचार्यं द्विजयेत् भक्त्या वस्त्रैर्गंधै
श्चतोषयेत्॥ ततो वंशपात्रदानं॥ गोधूमैः पूरयेद्वंशपात्रं पुष्पफलान्वितं॥ तांबूलैः ताडपत्रैश्च
सौभाग्यद्रव्यसंयुतैः॥ मंत्रः॥ अरिष्टविनिवेसार्थमास्मावंशाभिवृद्धये॥ रजोदोषापनुत्त्यर्थं सौभा
ग्यं देहि मे सदेति॥ ततोऽभिषेचनं कार्यं दंपत्योश्च विशेषतः॥ वेदविद्भ्योऽथ न देयं यथाशक्त्या
चतर्पणं॥ यस्मिंश्चास्य स्थितं दुष्टरजोदुष्टं मया वहं॥ तद्वासो यत्न तत्याज्यमतः शांतिकरं भ राम: २३
वेत्॥ पुत्रपौत्रादिसंयुक्तो धनधान्यसमन्वितः॥ पत्न्या सह चिरंजीवेज्जीववत्सा च मोदत र
ति विद्वद्भिः धर्म्मोत्तरोक्तं रजोदर्शनशांतिविधानसमाप्तं॥ ॥अथ शौनकोक्तं॥ ॥आर्तवान्नो
तु नारीणां शांतिं वक्ष्यामि शौनकः॥ तिथिवारर्क्षयोगेभ्यो लग्नसंक्रमसतमात्॥ मंदेभ्यो दुः
स्थितेभ्यश्च तत्तद्दोषक्षयाय च॥ अत्र पुत्रादिलाभाय दंपत्योरभिवृद्धये॥ पंचमेऽह्नि च तु

र्थे वा ग्रहोतिथ्यपुनःस्सरं॥ तस्मिन्नह्नि कर्त्तव्यस्तु होमविधानतः॥ आचार्यं वरयेत्प्राज्ञं भुवनेश्व
र्यनुष्ठितं॥ होमार्थं च जपार्थं च वरयेदृत्विजो बहून्॥ यजमानो द्विजैः सार्द्धं शांतिहोमं समाच
रेत्॥ गृहाद् ईशानदिग्भागे देवतापूजनाय च॥ द्रोणप्रमाणधान्येन व्रीहिराशित्रयं भवेत्॥
कुंभत्रयं न्यसेत् तत्र शोभनं तंतुवस्त्रादिवेष्टितं॥ पूरयेत्तीर्थसलिलैः प्रतिकुंभं पृथक् पृथक्॥ स्वकेनो
धनप्रसुवआपस्तथा ऋचाथाः प्रवृत्तस्तं दृष्टायस्या चततः क्रमात्॥ मध्यकुंभे क्षिपेद्दा
न्यमौषधानि च हेम च॥ ततश्च पंचरत्नानि गंधपुष्पाक्षतादिकान्॥ औषधानि च वक्ष्यंते मु
निभिः शांतिकारणात्॥ औदुंबरं कुशा दूर्वा राजी चंपक बिल्वकाः॥ विष्णुक्रांता च तुलसी
बर्हिषं शेरवपुष्पिका॥ शतावर्यश्च गंधा च निर्गुंडी सर्षपद्वयं॥ अपामार्गपलाशौ च पनसो
जीवकस्तथा॥ प्रियंगवश्च गोधूमा व्रीहयोऽश्वस्य एव चाक्षीरं च दधिसंमिश्रं पद्मपत्रं तथो
त्पलं॥ कुरंटकत्रयं गुंजा वचा भद्रकं मुस्तको॥ द्वात्रिंशदोषधीरेनी यथासंभवमाहरेत्॥ ग
जाश्ववल्मीकसंगमाद् ह्रदगोकुलात्॥ राजद्वारप्रवेशाच्च मृदमानीय निक्षिपेत्॥

२४ कुंभोपरिन्यसेत्तेसोत्सात्रं कांस्यं वा ताम्रमेव वा ॥ मृन्मयं वेणुपात्रं वा रचयस्य वित्तानुसारतः पात्रो
परिन्यसेद्वस्त्रं प्रतिमां भुवनेश्वरीं ॥ ॥तन्मूर्त्यां न्यसेत्तत्रं इंद्राणीं च पुरंदर ॥ ॥आचार्यः
पूजयेद्देवीमंगाद्यावरणानि च ॥ अन्यो वा पूजनं कुर्याद्धि यथा मंत्रसारया ॥ इंद्राणीं पू-
जयेद्देवीमिंद्राणीमासुनारिषु क्रमेण पूजयेदिंद्र ॥ ४१ कुंभस्थापनमिंत्याद्यास्तु तन्मंत्रे
णका ॥ ॥ ॥ स्ये तु ॥ मृत्तिकां चौषधादीनि मंत्रेण प्रक्षिपेत्क्रमात् ॥१ इमस्त्वोषमंव
यं ॥ अनेन विधिनाचार्यः पूजयेद्देवतात्रयं ॥ आवाहनादिसकलै रुपचारैः पृथक् पृथक्
॥ तन्मध्ये संस्पृशन् कुंभं मंत्रेण भुवनेश्वरी ॥ जपेदाचार्य आं ह्रीं क्रों इति ऋक्चं जपेत्ततः ॥ स्पृ राम:
शन्वै दक्षिणं कुंभं ज्ञाविगेको जपेत्तथा ॥ चत्वारि रुद्रसूक्तानि चतुर्मंत्रोत्तराणि च ॥ संस्पृ २४
शन्नुत्तरं कुंभं क्षीरा प्रस्तु सू संख्यया ॥ शन्न इंद्राग्नी सूक्तं च तत्रैव च स्पृशन् जपेत् ॥ कुंभस्य
पश्चिमे देशे शांतिहोमं समाचरेत् ॥ अन्वाधानं ततः कुर्यात् ॥ होमं तत्र समाचरेत् ॥ प्र
णीपात्र निधानांतं कृत्वा यो द्विजोत्तमः सेहाः दूर्वाभिस्तिल गोधूमैः पायसेन घृतेन च ॥ पाय

संश्रपयेत्तत्र सावित्रं हि हविश्च ततः ॥ कृत्वाज्यभागपर्यंतं हविरुद्धमनादिकं ॥ तिसृभिश्चैव दूर्वा
भिरेकैकाचाहुतिर्भवेत् ॥ आभिर्मंत्रप्रमुक्ताभिर्गायत्र्या जुहुयात्क्रमात् ॥ अष्टोत्तरसहस्रं
तु शतमष्टोत्तरं तु वा ॥ तिलमिश्रैश्च गोधूमैर्द्रव्येणाज्याहुतीर्हुनेत् ॥ जुहुयात्पायसेनैव आ
ज्येनैव हुनेत्क्रमात् ॥ हविश्च तुष्टमेनैव प्रत्येकं स्वमसंख्यया ॥ गायत्र्येन तु होतव्यं हावि
र त्रचतुष्टयं ॥ ॥ ततः स्विष्टकृतं हुत्वा रजुमहरणं तथा ॥ अयाश्चेत्यादिभिर्हुत्वा समु
द्रादूर्मिस्सूक्तेजतः ॥ संततामाज्यधारां तां पूर्णाहुतिमथाचरेत् ॥ ॥ ॥ परिषेचनप
र्यंतं होमशेषं समापयेत् ॥ सहोषधिस्थितैस्तत्र प्रतिकुंभस्थितोदकैः ॥ कृत्तुमयाः स्त्रि
याः ॥ शांत्यै दंपतीभ्यां सुखाय च ॥ अथाभिषेकमंत्राश्च प्रोच्यंते शौनकादिभिः ॥ आपो
हिष्ठेति नवभिः सूक्तेन च ततः परं इंद्रोऽग्नचेनौ वपानमानैः क्रमेण तु ॥ उभयं शृणव
चनः स्वस्तिदा विशएकया ॥ त्र्यंबकेन मंत्रेण जातवेदसएकया ॥ समुद्रज्येष्ठा इत्यादि चा-
तुर्भिश्च प्रसिद्धकैः ॥ आयंतामिति मंत्रैश्च त्रिभिश्चैव यथाक्रमं ॥ इदमापस्सूचेनैव देवस्य

त्वेति मंत्रतः॥ मंत्रेणाथ तमीशानं त्वमग्ने रुद्र इत्यथ॥ तमुष्टुहीति मंत्रेण भुवनस्य पितरं तथा॥
२९ या ते रुद्रेति मंत्रेण शिवसंकल्पमंत्रतः॥ इंद्रं त्वा वृषभं पंचमंत्रैश्चैवाभिषेचयेत्॥ सा च वस्त्रांत
रं धृत्वा पुनश्चोपवसेत्सती उपवासोऽत्र समीपायस्थानं॥ विप्रानभ्यर्च्य विधिवद्गंधपुष्पा-
क्षताभिः॥ धेनुं पयस्विनीं दद्यादाचार्याय च भूषणैः॥ दक्षिणामप्यनड्वाहं प्रदद्याद्रुद्रजा
पिने॥ ऋत्विग्भ्यश्चापि सर्वेभ्यो दद्याद्वै दक्षिणां ततः॥ महाशांतिं प्रजप्याथ विप्राशीर्व
चनं ततः ब्राह्मणान्भोजयेत्पश्चात्स्वयं भुंजीयात्स्वजनैः सह॥ तदनिष्टं तु सकलं सद्य एव वि
नश्यति॥ ॥ ॥प्रयोगपारिजाते त्वत्र विशेष उक्तः॥ ॥ एवं प्रसूतदोषहरो शांतिकृ रा.म.:
त्वा प्रशस्ततिथ्यादि पुनर्जातु दर्शनपर्यंतं गमनं वर्जयेदित्युक्तं निर्णयसिंधौ॥ प्रसूतदो २९
षे यदि दृश्यते॥ तत्सुख्यं ततः शांतिककर्म कार्यं॥ विसर्जयेद्देवतं येकशय्यां यावद्रजोद
र्शनं निषिद्धकाले इति॥ ॥इति शौनकीये रजस्वलाशांतिप्रयोगविधानं॥ ॥अथ जी
वपुत्रोत्सादनं॥ शौनकीये॥ यस्य जाताः प्रमीयेरन्पुत्रा ने च भवंति वा॥ ऋतुकालदिने

चैव दंपती समलंकृतौ॥ कृत्वाभ्युदयिकं श्राद्धं स्वस्तिवाचनपूर्वकं॥ कृत्वा पात्रनिधानांतमु
पलेपादिपूर्ववत्॥ श्वेतायाः श्वेतवत्सायाः गोः क्षीरेण चरुं पचेत्॥ कृत्वाज्यभागपर्यंतमा
ज्यस्योत्पवनादिकं॥ जुहुयात्पायसं तत्र ऋग्भिः पंचदशाहुतीः॥ प्रजावत्सूक्तपंचभिर्जीवपुत्र
स्य पंचभिः॥ नेजमेषेति तिसृभिः सोमो धेनुमृचैकया॥ इंद्रेहि वस्थमृचो चैका ततः स्विष्ट
कृदादिकं॥ उपस्थं त्वेति मंत्राभ्यां होमशेषं च दंपती॥ प्राश्नीयेतां तत आचम्य दंपती नाभिमा
लभेतां॥ पिशंगभृष्टिमित्यृचा तां नु भो वाभिमंत्र्य च॥ प्रायश्चित्तादि सकलं होमशेषं समा
पयेत्॥ सवत्सां दक्षिणां धेनुं च गां दद्यात्पयस्विनीं॥ पुत्रार्थमाचरेद्दानं विप्रेभ्यो हेमव
स्त्रयं॥ रात्र्यां तु पश्चिमे यामे शयीतां दर्भसंस्तरे॥ मनसा चतुर्होतारमनुद्रुत्य मित्ति ब्रुवन्
॥चतुर्होतृ मंत्रस्तु॥ पृथिवी होता द्यौरध्वर्युः॥ रुद्रोग्नीदित्यादि वाचस्पत यदस्सत स्वेत्तरी
ये प्रसिद्धः॥ उपगम्य ततः पत्नीं व्यवसायश्च यद्या विधिः॥ एवमुत्सादिताः पुत्रा न तु प्यंते
कदाचनेति शौनकीये मृतप्रजा जीवत्पुत्रोत्सादनविधानं प्रसंगादिदमुक्तं॥ ॥अथ चरु

सूर्यग्रहणे रजोदर्शने विधानं॥ शौनकीये॥ ग्रहणे चंद्रसूर्यस्य प्रसूतिर्यदि जायते॥ व्याधिपीडा स्त
दा स्त्रीणां मासे तु ऋतुदर्शनात्॥ इत्यादेः स जायते यस्तु तस्य मृत्युर्न संशयः॥ व्याधिपीडा च
२६ रिद्रं च शोकश्च कलहो भवेत्॥ शांतिं तेषां प्रवक्ष्यामि नराणां हितकाम्यया॥ यस्मिन्नृक्षे
विशेषणात् ग्रहणं यदि जायते॥ तन्नक्षत्राधिपं रूपं सुवर्णेन प्रकल्पयेत्॥ यथाशक्त्यनुसारे
ण वित्तशाठ्यं न कारयेत्॥ सूर्यग्रहे सूर्यरूपं सुवर्णेन स्वशक्तितः॥ चंद्रग्रहे चंद्ररूपं रज
तेन विशेषतः॥ राहुरूपं प्रकुर्वीत नागेनैव विचक्षणः॥ नागेन सीसेन सर्पः स्युश्चोक्ते शेषप्रयत्ने
न गोमयेन प्रलेपयेत्॥ तस्योपरि न्यसेद्धीमान्नवं वस्त्रं सुशोभनं॥ त्रयाणां चैव रूपाणां स्था शानः २६
पनं तत्र कारयेत्॥ रक्ताक्षतं रक्तगंधं रक्तपुष्पांबराणि च॥ सूर्यग्रहे प्रदातव्यं सूर्यप्रीति
कराय च॥ श्वेतवस्त्रं श्वेतमाल्यं श्वेतगंधाक्षतादिभिः॥ चंद्रग्रहे प्रदातव्यं चंद्रप्रीतिकरा
य च॥ राहवे चैव दातव्यं कृष्णपुष्पांबराणि च॥ दद्यान्नक्षत्रनाथाय श्वेतगंधानुलेपनं॥
सूर्यसंपूजयेद्धीमानाकृष्णेनेति मंत्रतः॥ चंद्रग्रहे तथा सम्यगाप्यायस्वेति मंत्रतः॥ स्व

र्भानोरिति मंत्रेण राहुयत्नेन पूजयेत्॥ एवं संपूज्य तद्धीमान्समिद्भिश्चार्कसंभवैः॥ चंद्रग्रहे
च पालाशसमिद्भिर्जुहुयान्नरः॥ ॥दूर्वाभिर्जुहुयाद्धीमान्राहोः संप्रीणनाय च॥ समिद्भिर्बिल्व
वृक्षोत्थैर्हशाय जुहुयात्तु बुधः॥ आज्येन चरुणा चैव तिलैश्च जुहुयात्ततः॥ पंचगव्यैः पंच
रत्नैः पंचकृत्वपंचपल्लवैः॥ जलैरौषधवल्कैश्च समहितैः फलशोदकैः॥ अभिषेकं प्रकुर्वीत
यजमाने प्रयत्नतः॥ मंत्रैर्वारुणसंभूतैरापोहिष्ठादिभिस्त्रिभिः॥ इमंमेगंगेति परैस्तावै
त्वायामीति मंत्रकैः॥ अभिषेके निवृत्ते तु यजमानः समाहितः॥ आचार्यं पूजयेत्सम्यक् सुशी
लो विजितेंद्रियः॥ तस्मै दद्यात्प्रयत्नेन भक्त्या प्रतिकृतित्रयं॥ दक्षिणाभिश्च संयुक्तं यथा
शक्त्यानुसारतः॥ ब्राह्मणान्भोजयित्वा तु प्रणिपत्य क्षमापयेत्॥ तेभ्योपि दक्षिणां दद्याद्य
जमानः समाहितः॥ अनेन विधिना शांतिं कृत्वा सम्यग्विधानतः॥ अकालमृत्युं शोकं च व्या
धिपीडां न चाप्नुयात्॥ सौख्यं च सौमनस्यं च सौभाग्यं लभते नरः॥ इत्थं ग्रहणजातानां
सर्वारिष्टविनाशनं॥ कथितं भार्गवो शेदं शौनकाय महात्मने॥ इति शौनकीये ग्रहणे प्र

प्रथमरजोदर्शने जनने च शांतिविधानं॥ अथास्य स्पष्टप्रयोगः॥ इयं शांतिः पौर्णमास्यमावास्या र
िक्तामविनामृतत्याज्य इति रिक्तदुष्टवारादिप्रागुक्तशांत्यास समुचीयते॥ निमित्तभेदात्॥ अदृष्टा
२७ कालोस्मिन्नर्थान्वाच्छे॥ एवमन्येपि नानानिमित्तभेदे सति तत्तन्नैमित्तिकविधानं क्रमेण कार्यमिसवगं
तव्यं॥ वारादिदोषे सति नां शांतिमनुष्ठाय दिनांतरे इयं शांतिरनुष्ठेया॥ सद्यातं चेरौ वानुष्ठेया॥
तत्राचार्य उपलिप्ते देशे उष्टदलपद्मं लिखित्वा तत्र कलशं प्रतिष्ठाप्य तदुपरि वस्त्रं संस्था
प्य सूर्यग्रहणे आकृष्णेनेति सूर्यप्रतिमामाप्यायस्वेति स्थापयित्वा सोमप्रतिमां यत्र सोमोसी तन्नि रा॰म॰
मित्तां राहुप्रतिमां स्वर्भानोरिति संस्थाप्य यस्मिन्नक्षत्रे ग्रहणं जातं तन्नक्षत्रदेवतां सुवर्ण २७
मितां तद्विन्नमंत्रेण प्रतिष्ठाप्य रक्तवस्त्रादीनि सूर्याय श्वेतवस्त्रादीनि चंद्राय कृष्णवस्त्रादी
नि राहवे श्वेतवस्त्रादीनि नक्षत्रदेवतायै समर्प्योपचारैः प्रपूज्य पित्वाग्निं प्रतिष्ठाप्य ग्र
हमखं कृत्वा कोटिससमिदाज्यचरुतिलानष्टोत्तरशतादिसंख्यया प्रतिदेवतं हुत्वा कल
शोदकेनाचार्यो यजमानमापोहिष्ठादिमंत्रैरभिषिच्य दानादिकं कारयेदिति ग्रहणे रजोदर्श

न शांतिविधानं समाप्तं॥ अथ बौधायनोक्त दुष्टरजोदर्शनादि शांतिविधानं॥ तच्चाचत खंडः॥ ॥
अथातः संवक्ष्यामि प्रसूतिप्रथमरजस्वलाशांतिकल्पं व्याख्यास्यामः पुण्याहे दंपत्योस्व द्रुतारा
बलान्विते दूर्वाहिंद्रे दंपतीमंगलस्नानं कृत्वा ब्राह्मणानाहूय पुण्याहं वाचयित्वा यजनः पीठोपवि
ष्टः प्राणानायम्य मम पत्न्या दुष्टनक्षत्रेदेवताप्रीत्यर्थं शांतिकर्म करिष्य इति संकल्प्य वेदवंतं कु
टुंबिनो वित्तहीनं समाचारवंतं ब्राह्मणमाचार्यत्वेन नियोज्ये वंउपनसंपन्नं ब्रह्मत्वे नियोज्ये वंगु
णविशिष्टांसौरगाणपसम्प्रसुं जजयजातवेदसेनामत्रयाश्वस्यम दक्षिणास्त्वेनि नमस्कारान्
नवंतः कुर्वंति तितिव चतुरादीन्नियोज्ये वं विशिष्टं चतुरो ब्राह्मणान्रुद्रे अज्ञोमदेः॥ स्वहस्तशी
र्षाणि मस्ते रुद्रमंन्यवइत्यादि प्रपनैर्नं सवायच्चेशानकोणे पुद्वार जपेनियोज्ये वं विशिष्टां श्च
तुरः पंच खंडेकादशवारुद्राभिषेकं नवं ततः कुर्वंति नियोज्य आशिषो वाचयित्वा प्रज्ञास्थानं दिह
स्तमात्रं गोमयेनानुलिप्य स्वस्तिकपंरवपद्मादिरंगवल्लीभिः कृत्वा तत्स्वतोहोमार्थं च
तुरस्रंमात्रं कुंडं स्वभं तत्तच्चतुस्त्रिद्वंगुलविस्तारोत्सेधमेखलात्रययुतं पश्चिमतो योन्युडं स्वा॥

स्यैंद्रसकाशयोनिसंपाद्यमंडपेकल्पोक्तप्रकारेणाष्टौवाकैःस्थंडिलेनस्वस्त्रदेवतौज्ञोकु-
र्यदिवस्येशानदेशेशतच्छिद्रंशुक्लवस्त्रावृतंवहत्कलशंशादाग्नेयादिकोणेष्वोषधीषुचतुरः
२८ कलशांश्चप्रतिष्ठाप्यप्रतिमाशुद्ध्यर्थंपंचामृतैराप्यायस्वदधिक्राव्णःशुक्रमसिमधुवाता
स्वादुःपवस्वेतिमंत्रैःक्रमेणक्षीरदध्याज्यशर्कराभिःस्नापयित्वातेषांमध्येमध्यमापोहि
ष्ठेतिवारुणस्त्तपनमंत्रजपंकृत्वावाहनादिवस्त्रांतंपूजयेत्॥१॥ ॥ ॥अथकलशारा
धनमाकलशेषुसर्वेसमुद्राःस्योनापृथिविरुद्रतिभीमःप्रवोयज्ञोषुसहिरण्यानितस्मिवितु
गंधद्वारामाप्यायस्वदधिक्राव्णःशुक्रमसिमधुवाताःस्वादुःपवस्वकांडात्कांडायाअपधीरो रा०मा०
षमधयःसंवदतइतिमंत्रक्रमेणस्थापनजालासेकस्मृत्तिकापंचपद्मवत्ययत्नगोमूत्रगो २८
मयक्षीरदध्याज्यमधुदूर्वाधान्यशतौषधिफलपुष्पगंधाक्षतानिदत्वेमंमेवरुणतत्त्वायामि
त्वन्नोअग्नेसत्वन्नोअग्नइतिवरुणमावाह्यार्चयित्वापूर्वोक्तऋत्विजपञ्चगुरुषसर्वक्रकदुद्रायेति
यथाक्रममनुजपांश्चकारयित्वाततःकुंडेग्निंप्रतिष्ठाप्यचरुंश्रपयित्वाज्यभागांतेन्वारब्धा

यांसमिदाज्याभ्यांमष्टौवाकैयेश्चरुव्रीहिभ्यांयजमानस्यमृत्युर्नश्यत्वायुर्वर्द्धतामितिव्याहृतिभिर्हो
मयित्वाजपादिब्रह्मविसर्जनांतेऋत्विग्भिःसहाचार्यःस्वस्वकलशमादायशुभप्रदेशेदंपतीउपवे
श्यतयोःशिरःससमापेत्कलशमवगृह्यसुरास्त्वामितिसमुद्रज्येष्ठाःशंनोवातःपवमान
सुवर्जनोक्षीभ्यामित्येतैरनुवाकैरभिषिच्यदंपतीअविलोक्यब्राह्मणमभ्यर्च्यसदक्षिणमा-
ज्यपात्रंसंज्याद्यःपिंडकायांस्तिकवलीयकमादायवीजगर्भमंत्रमुच्चार्यस्थ्युस्वरूपंब्राह्मण
मभ्यर्च्यसदक्षिणंकंदत्वानीराजनमनुभूयगृहंप्रविश्याचार्यब्रह्मर्त्विग्भ्यःफलंप्रतिगृह्य
तेषांदक्षिणांदत्वाऽऽचार्यायप्रतिमादानंकृत्वादशदानानिकृत्वापंगुदीनांधकृपणजनेभ्यः-
तर्प्यशतंपंचाशत्संचाविशंतिवाब्राह्मणान्भोजयेत्स्वयंरिष्टयैशांति॥सएषगास्वतोदिव्यः
सर्वभूतमयोहरिः।वासुदेवइतिप्रोक्तोयस्मादृष्टासिभारतं।।ब्राह्मणैःक्षत्रियैर्वैश्यैःशूद्रै-
श्चकृतलक्षणैः।।सेव्यतेभ्यर्च्यतेचैवनित्ययुक्तैःस्वकर्मभिरिति।।कृतलक्षणैःकृतहरिचि
ह्नैरित्यर्थः।देवोभूत्वादेवान्यजेतेतिश्रुतेः।।हरिवंशेपि।चक्रांकितानमस्मेति।।एवंश्रुतिस्मृ

त्रिपुराणोतिहासागमादिसिद्धत्वाच्छंदकादिकमंकर्त्तव्यमिति॥ननुपवित्रंततरंमादिऋतिस्तप्र
२८ मुद्राधारणेप्रमाणत्वेनोदाहृता॥तन्नोपपद्यते॥वेदभाष्यकृतामाधवाचार्येणान्यथाव्याख्या
तत्वात्॥तथाचतन्मदाष्यंविवित्रंततइतिपंचर्चस्यसूक्तंआंगिरसस्यपवित्रस्यार्षंजगतंपवमा
नसोमोदेवता॥तथाचानुक्रांतं॥पवित्रंतइत्सामिक्षुवेआद्येजगत्योवक्तव्ये॥स्मृतिस्तंच॥५
पवित्रंतेविततंब्रह्मणस्पतइतिद्वितीयस्यार्चंअधिषणाउत्तन्यतेतिच॥तत्रप्रथमा॥पवि
त्रंतइति॥हेब्रह्मणस्पतेमंत्रस्याभिसोम॥तेपवित्रंशोधकंअंगंविततंस्वर्वत्रविस्तृतं॥सप्र
भुःप्रभविताच्छेगाणि॥पातुरंगाणिपर्येषिपरितोगच्छसि॥विस्वतःसर्वतःतवततग्रनित्रं॥अत
प्ततनूःप्रयोव्रतादिनाऽसंतप्तगात्रःअतएवामःअपरिपक्वःनाश्नुते॥नव्याप्नोति॥श्रृतासइ रामः
तूश्रुताएवपरिपक्वाएववहंतोयागंनिर्वहंतः॥तत्पवित्रंसमाशतव्याप्नुवंति॥अथद्विती २८
य॥तपोष्पवित्रमिति॥तपोःशत्रूणांतापकस्यतूचसोमस्यपवित्रंशोधकमंगंतेजोवा॥दि
वस्यदेपुदे॥कस्योद्धितेस्थानेविततंविस्तृतं॥तृतीयस्याभितोदिविसामआसीदिति॥

हिब्राह्मणं॥अस्यतंतवोशवःशोचतोदीप्यमानाःप्वस्थिरनूविवियंतिष्ठंति॥तेपृथिव्यांहृ
वितिर्नवितीस्याहमगवाद्वौधायनः॥ ॥इतिवौधायनीयेशांतिकांडेरजोदर्शनशांतिखंडः॥
रजोदर्शनशांतिखंडः॥अथवौधायनमः॥इदमासांविचक्षणं॥हविरासेरोजुहोतन॥यस्यमांति
रएमयोमस्यकेतन॥यस्येमाविश्वभुवनानिसर्वा॥सकृत्तिकाभिरभिसंवसानः॥अग्निर्नोदेवः
सुवितेदधातु॥१॥प्रजापतेरोहिणीवेतुपत्नीविश्वरूपाबृहतीचित्रभानुः॥सानोयज्ञस्यसुवितेद
धातु॥यथाजीवेमशरदःसवीराः॥रोहिणीदेव्युदगात्पुरस्तात्॥विश्वारूपाणिप्रतिमोदमाना॥प्र
जापतिर्दहविषावर्द्धयंती॥प्रियादेवानामुपयातुयज्ञं॥२॥सोमोराजामृगशीर्षेणआगन्॥शिवंन
क्षत्रंप्रियमस्यधाम॥आप्यायमानोबहुधाजनेषु॥रेतःप्रजांयजमानेदधातु॥यत्तेनक्षत्रंमृग
शीर्षमस्ति॥प्रियंदराजन्प्रियतमंप्रियाणां॥तस्मैतेसोमहविषाविधेम॥शन्नराधिपदेशंचतुष्प
दे॥३॥आर्द्रयारुद्रःप्रथमानएति॥श्रेष्ठोदेवानांपतिराघ्नियानां॥नक्षत्रमस्यहविषाविधेम॥मा
नःप्रजांरीरिषन्मोतवीरान्॥हेतीरुद्रस्यपरिणोवृणक्तु॥आर्द्रानक्षत्रंजुषतांहविर्नः॥प्रमुंचमा

नो दुरितानि तानि विश्वा ॥ अपाघशꣳसन्नुदतामराति ॥ ४ ॥ पुनर्नो देव्यदितिः स्पृणोतु । पुनर्वसू नः पुन
रेतां यज्ञं ॥ पुनर्नो देवा अभियंतु सर्वे ॥ पुनः पुनर्नो हविषा यजामः ॥ एवा न देव्यदितिरनर्वा विश्वस्य भर्त्री
३० जगतः प्रतिष्ठा ॥ पुनर्वसू हविषा वर्द्धयंती ॥ प्रियं देवानामप्येतु पाथः ॥ ५ ॥ बृहस्पतिः प्रथमं जायमानः ॥
तिष्यं नक्षत्रमभिसंबभूव ॥ श्रेष्ठो देवानां पृतनासु जिष्णुः ॥ दिशो नु सर्वा अभयं नो अस्तु ॥ तिष्यः पुर
स्तादुत मध्यतो नः ॥ बृहस्पतिर्नः परिपातु पश्चात् ॥ बाधेतां द्वेषो अभयं कृणुतां ॥ सुवीर्यस्य पतयः स्या
मा ॥ ६ ॥ इदꣳ सर्पेभ्यो हविरस्तु जुष्टं ॥ आश्रेषा येषामनुयंति चेतुः ॥ ये अंतरिक्षं पृथिवीं क्षियंति
॥ ते नः सर्पासो हवमागमिष्ठाः ॥ ये रोचने सूर्यस्यापि सर्पाः ॥ ये दिवं देवीमनुसंचरंति ॥ येषामाश्रेष
अनुयंति कामं ॥ तेभ्यः सर्पेभ्यो मधुमज्जुहोमि ॥ ७ ॥ उपहूताः पितरो ये मघासु ॥ मनोजवसः सुकृ राम: ३०
ताः ॥ ते नो नक्षत्रे हवमागमिष्ठाः ॥ स्वधाभिर्यज्ञं प्रयतं जुषंतां ॥ ये अनग्निदग्धा यमुं लोकं पितरः
क्षियंति ॥ याꣳश्च विद्म याꣳ उ च न प्रविद्म ॥ मघासु यज्ञꣳ सुकृतं जुषंतां ॥ ८ ॥ गवां पतिः फल्गु
नीनामसि त्वं ॥ तदर्यमन्वरुण मित्र चारु ॥ तं त्वा वयꣳ सनितारꣳ सनीनां ॥ जीवा जीवंतु

मुप संविशेम ॥ येनेमा विश्वा भुवनानि संजिता ॥ यस्य देवा अनुसंयंति चेतः ॥ अर्यमा राजाऽजरस्तु
विष्मान् ॥ फल्गुनीनामृषभो रोरवीति ॥ ९ ॥ श्रेष्ठो देवानां भगवो भगासि ॥ तत्त्वा विदुः फल्गुनीस्तस्
य वित्तात् ॥ अस्मभ्यं क्षेत्रमजरꣳ सुवीर्यं ॥ गोमदश्ववदुपसंनुदेह ॥ भगो ह दाता भगदस्प्रदा
ता ॥ भगो देवीः फल्गुनीराविवेश ॥ भगस्येत्तं प्रसवं गमेम ॥ यत्र देवैः सधमादं मदेम ॥ १० ॥ आ
यातु देवः सविता पयातु हिरण्ययेन सुवृता रथेन ॥ वहन् हस्तꣳ सुभगं विद्मनापसं ॥ प्रयच्छंतं पपु
रिं पुण्यमच्छ ॥ हस्तः प्रयच्छत्वमृतं वसीयः ॥ दक्षिणेन प्रतिगृभ्णीम एनत् ॥ दातारमद्य सविता
विदेय ॥ यो नो हस्ताय प्रसुवाति यज्ञं ॥ ११ ॥ त्वष्टा नक्षत्रमभ्येति चित्रां ॥ सुभꣳ ससंयुवतिꣳ रो
चमानं ॥ निवेशयन्नमृतान्मर्त्याꣳश्च ॥ रूपाणि पिꣳशन् भुवनानि विश्वा ॥ तन्नस्त्वष्टा तदु चित्रा
विचष्टां ॥ तन्नक्षत्रं भूरिदा अस्तु मह्यं ॥ तन्नः प्रजां वीरवतीꣳ सनोतु ॥ गोभिर्नो अश्वैः समनक्तु
यज्ञं ॥ १२ ॥ वायुर्नक्षत्रमभ्येति निष्ट्यां ॥ तिग्मशृंगो वृषभो रोरुवाणः ॥ समीरयन् भुवना मातरिश्वा
॥ अप द्वेषाꣳसि नुदतामरातीः ॥ तन्नो वायुस्तदु निष्ट्या शृणोतु ॥ तन्नक्षत्रं भूरिदा अस्तु मह्यं ॥

तन्नो देवासो अनुजानंतु कामं॥ यथा तरेम दुरितानि विश्वा॥१३॥ दूरमस्मच्छत्रवो यंतु भीताः
॥तदिंद्राग्नी कृणुतां तद्विशाखे॥ तन्नो देवा अनुमदंतु यज्ञं॥ पश्चात्पुरस्तादभयं नो अस्तु॥
३१ नक्षत्राणामधिपत्नी विशाखे॥ श्रेष्ठाविंद्राग्नी भुवनस्य गोपौ॥ विषूचः शत्रूनपबाधमानौ॥ अ
पक्षुधं नुदतामरातिं॥१४॥ पूर्णा पश्चादुत पूर्णा पुरस्तात्॥ उन्मध्यतः पौर्णमासी जिगाय॥ तस्यां
देवा अधि संवसंतः॥ उत्तमे नाक इह मादयंतां॥ पृथ्वी सुवर्चा युवतिः सजोषाः॥ पौर्णमास्युद
गाच्छोभमाना॥ आप्याययंती दुरितानि विश्वा॥ उरुं दुहां यजमानाय यज्ञं॥१५॥ ऋध्याम हव्यैर्न
मसोपसद्य॥ मित्रं देवं मित्रधेयं नो अस्तु॥ अनूराधान्हविषा वर्द्धयंतः॥ शतं जीवेम शरदः सवीराः रामः
॥ चित्रं नक्षत्रमुदगात्पुरस्तात्॥ अनूराधा स इति यद्वदंति॥ तन्मित्र एति पथिभिर्देवयानैः॥ हिरण्म ३१
यैर्विततैरंतरिक्षे॥१६॥ इंद्रो ज्येष्ठामनु नक्षत्रमेति॥ यस्मिन्वृत्रं वृत्रतूर्ये ततार॥ तस्मिन्व
यममृतं दुहानाः॥ क्षुधं तरेम दुरितिं दुरिष्टिं॥ पुरंदराय वृषभाय धृष्णवे॥ अषाढाय सहमानो
यमीढुषे॥ इंद्राय ज्येष्ठा मधुमद्दुहाना॥ पराच्येतु निर्ऋतिः पराचा॥ गोभिर्नक्षत्रं पशुभिः समक्तं॥

अहर्भूयाद्यजमानाय मह्यं॥ अहर्नो अद्य सुविते दधातु॥ मूलं नक्षत्रमिति यद्वदंति॥ पराचीं वाचा
निर्ऋतिं नुदामि॥ शिवं प्रजायै शिवमस्तु मह्यं॥१८॥ या दिव्या आपः पयसा संबभूवुः॥ या अंतरि
क्ष उत पार्थिवीर्याः॥ यासामषाढा अनुयंति कामं॥ ता न आपः शं स्योना भवंतु॥ याश्च कूप्या
याश्च नाद्याः समुद्रियाः॥ याश्च वैशंतीरुत प्रासचीर्याः॥ यासामषाढा मधु भक्षयंति॥ ता न आपः श
ं स्योना भवंतु॥१९॥ तन्नो विश्वे उपशृण्वंतु देवाः॥ तदषाढा अभिसंयंतु यज्ञं॥ तन्नक्षत्रं प्रथतां प
शुभ्यः॥ कृषिर्वृष्टिर्यजमानाय कल्पतां॥ शुभ्राः कन्या युवतयः सुपेशसः॥ कर्मकृतः सुकृतो वीर्यावि
तीः॥ विश्वान्देवान्हविषा वर्द्धयंतीः॥ अषाढाः काममुपयांतु यज्ञं॥२०॥ यस्मिन्ब्रह्माभ्यजयत्सर्वमेत
त्॥ अमुं च लोकमिदमू च सर्वं॥ तन्नो नक्षत्रमभिजिद्विजित्य॥ श्रियं दधात्वहृणीयमानं॥ उ
भौ लोकौ ब्रह्मणा संजितेमौ॥ तन्नो नक्षत्रमभिजिद्विचष्टां॥ तस्मिन्वयं पृतनाः संजयेम॥ तं नो देवा
सो अनुजानंतु कामं॥२१॥ शृण्वंति श्रोणाममृतस्य गोपां॥ पुण्यमस्या उपशृणोमि वाचं॥
महीं देवीं विष्णुपत्नीमजूर्यां॥ प्रतीचीमेनां हविषा यजामः॥ त्रेधा विष्णुरुरुगायो विचक्रमे॥

महीं दिवं पृथिवीमंतरिक्षं॥ तद्व्रतीवृषभा वर्द्धमानी॥ पुण्यꣳ श्लोकं यजमानाय कृण्वती॥२२॥
अष्टौ देवा वसवः सोम्यासः॥ चतस्रो देवीरजराः श्रविष्ठाः॥ ते यज्ञं पांतु रजसः परस्तात्॥ संवत्स
३२ रीणममृतꣳ स्वस्ति॥ यज्ञं नः पांतु वसवः पुरस्तात्॥ दक्षिणतोभियंतु श्रविष्ठाः॥ पुण्यं नक्षत्रम
भिसंविशाम॥ मा नो अरातिरघशꣳसागन्॥२३॥ क्षत्रस्य राजा वरुणोधिराजः॥ नक्षत्राणा
ꣳ शतभिषग्वसिष्ठः॥ तौ देवेभ्यः कृणुतो दीर्घमायुः॥ शतꣳ सहस्रा भेषजानि धत्तः॥ यज्ञं नो
राजा वरुण उपयातु॥ तन्नो विश्वे अभिसंयंतु देवाः॥ तन्नो नक्षत्रꣳ शतभिषग्जुषाणं॥ दीर्घमायुः
प्रतिरद्भेषजानि॥२४॥ अज एकपादुदगात्पुरस्तात्॥ विश्वा भूतानि प्रतिमोदमानः॥ त
स्य देवाः प्रसवं यंति सर्वे॥ प्रोष्ठपदासो॥ अमृतस्य गोपाः॥ विभ्राजमानः समिधान उग्रः॥ रामः ३२
आंतरिक्षमरुहदगंद्यां॥ तꣳ सूर्यं देवमजमेकपादं॥ प्रोष्ठपदासो अनुयंति सर्वे॥२५॥ अ
हिर्बुध्नियः प्रथमान एति॥ श्रेष्ठो देवानामुत मानुषाणां॥ तं ब्राह्मणाः सोमपाः सोम्यासः॥
प्रोष्ठपदासो अभिरक्षंति सर्वे॥ चत्वार एकमभि कर्म देवाः॥ प्रोष्ठपदास इति यान्वदंति॥ ते बु

ध्नियं परिषद्यꣳ स्तुवंतः॥ अहिꣳ रक्षंति नमसोपसद्य॥२६॥ पूषा रेवत्यन्वेति पंथां॥ पुष्टिपती पशुपा वाजब
स्त्यौ॥ इमानि हव्या प्रयता जुषाणा॥ सुगैर्नो यानैरुपयातां यज्ञं॥ क्षुद्रान्पशून्रक्षतु रेवती नः॥ गावो नो
अश्वाꣳ अन्वेतु पूषा॥ अन्नꣳ रक्षंतौ बहुधा विरूपं॥ वाजꣳ सनुतां यजमानाय यज्ञं॥२७॥ तदश्वि
नावश्वयुजोपयातां॥ शुभं गमिष्ठौ सुयमेभिरश्वैः॥ स्वं नक्षत्रꣳ हविषा यजंतौ॥ मध्वा संपृक्तौ यजुषा
समक्तौ॥ यौ देवानां भिषजौ हव्यवाहौ॥ विश्वस्य दूतावमृतस्य गोपौ॥ तौ नक्षत्रं जुजुषाणोपयातां
॥ नमोश्विभ्यां कृणुमोश्वयुग्भ्यां॥२८॥ अप पाप्मानं भरणीर्भरंतु ~~निवेशनी यत्ते देवा अदधुः~~ तद्य
मो राजा भगवान्विचष्टां॥ लोकस्य राजा महतो महान्हि॥ सुगं नः पंथामभयं कृणोतु॥ यस्मिन्नक्षत्रे यम
एति राजा॥ यस्मिन्नेनमभ्यषिंचंत देवाः॥ तदस्य चित्रꣳ हविषा यजामः॥ अप पाप्मानं भरणीर्भरं
तु॥ निवेशनी यत्ते देवा अदधुः॥२९॥ अथैषामंत्राणां सर्गः॥ अग्नये स्वाहा कृत्तिकाभ्यः स्वाहा अं
बायै स्वाहा॥ दुघुलायै स्वाहा॥ नितत्न्यै स्वाहा॥ अभ्रयन्त्यै स्वाहा॥ मेघयन्त्यै स्वाहा॥ वर्षयन्त्यै स्वाहा॥ चुपुणीकायै स्वाहेति॥१॥ प्रजापतये स्वाहा रोहिण्यै स्वाहा॥ रोचमानायै स्वाहा प्रजाभ्यः
स्वाहेति॥२॥ सोमाय स्वाहा मृगशीर्षाय स्वाहा॥ इन्वकाभ्यः स्वाहा ओषधीभ्यः स्वाहा राज्याय स्वाहा भि

३३

जित्यै स्वाहेति ॥ ३ ॥ रुद्राय स्वाहा । आर्द्रायै स्वाहा । पिन्वमानायै स्वाहा । पशुभ्यः स्वाहेति ॥ ४ ॥ अदित्यै स्वाहा । पुन
र्वसुभ्यां स्वाहा ॥ भूत्यै स्वाहा । प्रजायै स्वाहेति ॥ ५ ॥ बृहस्पतये स्वाहा । तिष्याय स्वाहा ॥ ब्रह्मवर्चसाय स्वा
हेति ॥ ६ ॥ सर्पेभ्यः स्वाहा । आश्रेषाभ्यः स्वाहा । दंदशूकेभ्यः स्वाहेति ॥ ७ ॥ पितृभ्यः स्वाहा । मघाभ्यः स्वाहा ।
नघाभ्यः स्वाहा । गदाभ्यः स्वाहा । अरुंधतीभ्यः स्वाहेति ॥ ८ ॥ अर्यम्णे स्वाहा । फल्गुनीभ्यां स्वाहा ॥ पशु
भ्यः स्वाहेति ॥ ९ ॥ भगाय स्वाहा । फल्गुनीभ्यां स्वाहा । श्रैष्ठ्याय स्वाहेति ॥ १० ॥ सवित्रे स्वाहा । हस्ता
य स्वाहा ॥ ददते स्वाहा । पृणते स्वाहा ॥ प्रयच्छते स्वाहा । प्रतिगृभ्णते स्वाहेति ॥ ११ ॥ त्वष्ट्रे स्वाहा । चि
त्रायै स्वाहा ॥ चैत्राय स्वाहा । चैत्राय स्वाहा । प्रजापतये स्वाहेति ॥ १२ ॥ वायवे स्वाहा । निष्ट्यायै स्वाहा राम: ३३
॥ कामचाराय स्वाहा । अभिजित्यै स्वाहेति ॥ १३ ॥ इंद्राग्निभ्यां स्वाहा । विशाखाभ्यां स्वाहा ॥ श्रैष्ठ्या
य स्वाहा । अभिजित्यै स्वाहेति ॥ १४ ॥ पौर्णमास्यै स्वाहा । कामाय स्वाहा । आगत्यै स्वाहेति ॥ १५ ॥ मित्राय
स्वाहा । अनूराधेभ्यः स्वाहा । मित्रधेयाय स्वाहा । अभिजित्यै स्वाहेति ॥ १६ ॥ इंद्राय स्वाहा । ज्येष्ठायै स्वाहा ॥ ज्ये
ष्ठ्याय स्वाहा । अभिजित्यै स्वाहेति ॥ १७ ॥ प्रजापतये स्वाहा । मूलाय स्वाहा । प्रजायै स्वाहेति ॥ १८ ॥ अद्

भ्यः स्वाहा । आषाढाभ्यः स्वाहा । समुद्राय स्वाहा । कामाय स्वाहा । अभिजित्यै स्वाहेति ॥ १९ ॥ विश्वेभ्यो देवेभ्यः
स्वाहा ॥ अनपजय्याय स्वाहा । जित्यै स्वाहेति ॥ २० ॥ ब्रह्मणे स्वाहा । अभिजिते स्वाहा । ब्रह्मलोकाय स्वाहा ।
अभिजित्यै स्वाहेति ॥ २१ ॥ विष्णवे स्वाहा । श्रोणायै स्वाहा ॥ श्लोकाय स्वाहा ॥ श्रुताय स्वाहेति ॥ २२ ॥ वसुभ्यः
स्वाहा । श्रविष्ठाभ्यः स्वाहा ॥ अग्राय स्वाहा । परीत्यै स्वाहेति ॥ २३ ॥ वरुणाय स्वाहा । शतभिषजे स्वाहा ॥
भेषजेभ्यः स्वाहेति ॥ २४ ॥ अजायैकपदे स्वाहा । प्रोष्ठपदेभ्यः स्वाहा । तेजसे स्वाहा । ब्रह्मवर्चसाय स्वा
हेति ॥ २५ ॥ अहये स्वाहा । बुध्नियाय स्वाहा ॥ प्रोष्ठपदेभ्यः स्वाहा । प्रतिष्ठायै स्वाहेति ॥ २६ ॥ पूष्णे स्वा
हा । रेवत्यै स्वाहा । पशुभ्यः स्वाहेति ॥ २७ ॥ अश्विभ्यां स्वाहा । अश्वयुग्भ्यां स्वाहा । श्रोत्राय स्वाहा । श्रुत्यै
स्वाहेति ॥ २८ ॥ यमाय स्वाहा । भरणीभ्यः स्वाहा । राज्याय स्वाहा । अभिजित्यै स्वाहेति ॥ २९ ॥ इति नक्षत्रमंत्रः
॥ ॥ अत्रेदमाकूतं ॥ यत्र कर्मणि अनेकसजातीयाः प्रयोगा उपलभ्यंते ॥ यथा रजोदर्शनशांतिकर्म
णि विष्णुधर्मोक्तः प्रयोग एकः ॥ शौनकोक्तो द्वितीयः बौधायनोक्तः स्तृतीयः ॥ तत्र यथारुच्यान्यत
रप्रयोगो ऽनुष्ठातव्यः ॥ व्रीहियववत्सामर्थ्यवत् ॥ यद्वा शौनकोक्तऋग्वेदिनां ॥ बौधायनोक्त आपस्तं

बादितैत्तिरीयाणां॥ तत्तच्छाखोपरि शौनकादीनां प्रवृत्तेः॥ विष्णुयमैत्तिरीयाद्युक्तप्रयोगस्तु इतरेषां शा
खिनां॥ पुत्राणां स्यस्य सर्वसाधारण्येन प्रवृत्तेः॥ अथवा यास्मिन्देशादौ यः प्रयोग आचारविपर्यीभूतः स
३४ एव सर्वैरनुष्ठेयः॥ सर्वशाखाप्रत्ययमेकं कर्मेति जैमिनिसिद्धांतात्॥ ॥ यत्र महाप्रतिबंधनिवृत्तिद्वा
रा महाफलहेतवो नेकविजातीयाः प्रयोगा उपलभ्यंते यथा प्रजोत्सयर्थं रुद्रस्नानबंधानिषेकविष्णु
श्राद्धादयस्तत्र प्रतिबंधतारतम्येन प्रयोगानुष्ठानतारतम्यमवगंतव्यमित्यास्तां विस्तविस्तरः॥
नास्ता ६ अथ गर्भादानविधानं॥ रजोदर्शनं तमाद्यदिवसचतुष्टयं पर्वादि च सहकारी ज्ञेयं सक्कन्छेत्॥
तथा च याज्ञवल्क्यः॥ षोडशर्तुर्निशाः स्त्रीणां तस्मिन्युग्मासु संविशेत् ब्रह्मचार्येव पर्वाण्याद्या॥ राम!
श्चतस्रश्च वर्जयेत्॥ एवं गच्छन्स्त्रियं क्षामां मघां मूलं च वर्जयेत्॥ सुस्थ इंदौ सकृत्पुत्रं लक्ष्यतां ३४
जनयेत्पुमान्॥ यथाकामी भवेद्वापि स्त्रीणां वरमनुस्मरन्॥ स्वदारनिरतश्चैव स्त्रियो रक्ष्याः
प्रयत्नत इति॥ स्कांदे पि॥ ऋतुकालाभिगमनं धर्म्योयं गृहिणः परः॥ स्त्रीणां वरमनुस्मृत्य यथाका
म्यथवा भवेत्॥ दिवाभिगमनं पुंसामनायुष्यं परमं मतं॥ श्राद्धाहः सर्वपर्वाणि यत्नात्साज्यानि धी

मता॥ तत्र गच्छन्स्त्रियं मोहाद्धर्मात्प्रच्यवते परात्॥ ऋतुकालाभिगामी यः स्वदारनिरतश्च यः॥ ससदा
~~सनिस्तत्रश्च~~ ॥ ब्रह्मचारी हि विज्ञेयः स गृहाश्रमी॥ ऋतुः षोडश यामिन्यश्चतस्रस्तासु गर्हिताः॥ पुत्रा
स्त्वासु पियुग्मासु अयुग्मासु च कन्यकाः॥ भवंतीति शेषः॥ ज्योतिःशास्त्रे॥ सपाश्विमघमूलेंद्रपो
ष्णेन्ग्य्यै विगर्हिताः॥ श्रीकामस्तु त्यजेन्नारी पंचम्यामुत्तरात्रयं इति॥ अथ तत्र नक्षत्राणि श्रवणं
रोहिणी हस्तश्चानुराधोत्तरात्रयं॥ स्वाती शतभिषक्पुष्टा निषेके फलदाः स्मृता इति॥ उत्तरात्रयस्य
विहितनिषिद्धत्वाद्विकल्पः॥ तथा॥ नाश्नीतां तु स्त्रियं गच्छेन्नाज्वरां न रजस्वलां॥ नानिष्टां न प्रकुपि
तां नाप्रशस्तां न गुर्विणीं॥ गर्भिणीगमननिषेधः षण्मासादूर्ध्वं॥ आरभ्य षण्मासान्मासान्न गच्छेद्
गर्भिणीं स्त्रियमिति वचनात्॥ वह्वीनां पत्नीनां तु यौगपद्ये गमनक्रममाह देवलः॥ ॥ यौगपद्ये तु ती
र्थानां विवाहक्रमशो व्रजेत्॥ रक्षणार्थमपुत्रां वा ग्रहणक्रमशो पि वेति। तीर्थमृतुस्तद्यौगपद्ये सस
सवर्णासु कर्मक्रमेण गच्छेत्सवर्णास्तु तु विवाहक्रमेण। यदा तु काचित्पुत्रावत्यस्ति तदातामगतो गच्छे
दिति पाराशरमाधवीये व्याख्यातं॥ तच्चाद्भवितावशुचिः पुमान्नृतौ तु गर्भशंकया स्नानं मैथुनिनः

स्नातं ऋतुं विना यस्तु गच्छेद्यो चेत्स्वमूत्रपुरीषवदिति शातातपः॥ एवमृतुकालेऽगच्छतो दोषमाह स एव॥ ऋ-
तुस्नातां तु यो भार्यां स्वस्थः सन्नोपगच्छति॥ स चाप्नोति न संदेहो भ्रूणहत्यामृतावृताविति॥ ऋतावुपेयात्सर्व-
२५ त्र वा प्रतिषिद्धवर्जमिति गौतमस्मरणं॥ अत्र कर्मणि इतिकर्तव्यताविशेषस्तु स्वस्वसूत्रादवगंतव्यः
॥ चुंबनोद्दर्शने चार्तिं न रियाद्येऽसुरतं यदि प्रसूते चतुरं पुत्रं विज्ञेछाद्दस्मन्यथेति रेणुकारिकायां॥ इ-
सनंतभट्टविरचिते गर्भाधानविधानं॥ ॥ ॥ ॥ ॥ अथ पुंसवनसीमंतविधानं॥ तत्रा-
श्वलायनगृह्यसूत्रं॥ तृतीये गर्भमासे तिष्येणेति॥ ॥ कात्यायनसूत्रेपि॥ अथ पुंसवनं पुरा स्पंदत
इति मासे द्वितीये तृतीये वा यदहः पुंसा नक्षत्रेण चंद्रमा युज्येतेति॥ श्रीधरीयेपि॥ ॥ ॥ ॥ ॥ ॥ ॥ राम:
कुर्यात्पुंसवनं प्रसिद्धिविषये गर्भे द्वितीयेऽथवा मासि स्फीतमनोतुषारकिरणे पुष्ये च यावेज्जवेदित्याक- २५
र्केरकेंद्रयुग्ममबलामन्येषु युग्मेतिथौ शुद्धे नैधनधाम्नि शुक्रशशिनां मध्ये दिनं चित्राणां वासरे॥ नैधने अ-
ष्टमस्थाने॥ वित्तवृत्त्या तृतीये मासि गर्भो यदि प्रसिद्धिविषयो न स्यात्तदा चतुर्थे पुंसवनं कुर्यादित्यर्थः
तथा च ज्ञात्वा कर्तव्यं द्वितीये वा तृतीये वा मासि पुंसवनं भवेत्॥ व्यक्ते गर्भे भवेत्कार्यं सीमंतेन सहाथ

वेति द्वितीये वा तृतीये वेति मासस्य प्राधान्येन विहितत्वात् गुरुशुक्रमौढ्यादावपि वपि त्रैव कार्यं॥ तथा च ब-
हस्पतिः मासप्रयुक्तकार्येषु मौढ्यं गुरुशुक्रयोः॥ न दोषकृत्तदा मासलक्षणो बलवानिति मलमासे
पि कार्यमित्याह यमः॥ गर्भे वार्द्धुषिके भृत्ये श्राद्धकर्मणि मासिके॥ सपिंडीकरणे नित्ये नाधिमासं॥
वि विवर्जयेत्॥ ज्योतिर्निबंधेऽपि॥ वृद्धिहास्यं पुंसवनादिप्रेतकर्मानुमासिकानि समास्याधिके तत्तु सर्वं दैवा-
दि चोत्तर इति॥ पूर्वं विचयने गर्भे इति सामान्यनिषिद्धशुक्रमौढ्याद्यभावेपि न दोषः॥ तथैव शिष्टाचारश्च॥
अत्रापीतिकर्तव्यताविशेषः स्वस्वशाखातो व~~शिष्टाद्यास~~गंतव्यः॥ ॥ इति पुंसवनविधानं॥ ॥ अथ सी-
मंतोन्नयनविधानं॥ तत्राश्वलायनसूत्रं॥ ॥ आपूर्यमाणपक्षे यत्पुंसेति॥ कात्यायनसूत्रेपि॥ अ-
थ सीमंतोन्नयनं पुंसवनवत्प्रथमगर्भे मासे षष्ठेऽष्टमे वेति॥ आश्वलायनकारिकापि॥ चतुर्थे मासे स्या-
त्सीमंतोन्नयनक्रिया॥ षष्ठेऽष्टमे वा कुर्वीत सूत्रांतरविधानतः॥ पूर्वस्यासंभवे षष्ठे मासे पक्षाष्टमे न
वेदिति॥ इदं कर्म न प्रतिगर्भमावर्त्तते॥ स्त्रीसंस्कारत्वात्॥ सीमंत उन्नीयते यस्मिन्कर्मणि इत्यन्वर्थ
संज्ञाकरणात्॥ अनन्वयं गर्भसंस्कारो ज्ञायते एतद्गर्भम्य्रे हीयाश्वलायनसूत्रे दर्शनात्॥ स सं। त

१ कुतः प्राधान्यमितिचेत्॥सीमंतोन्नयनमितिसमाख्याबलात्॥१

थापिनावर्त्तते॥आधारसंस्कारस्यप्राधान्यात्गर्भस्य कृतसंस्कृतसंस्काराः सीमंतेनद्विजस्त्रियः॥यं
यंगर्भंप्रसूयंतेससर्वःसंस्कृतोभवेदितिहारीतस्मरणाच्च॥सीमंतोन्नययनंप्रथमेगर्भेचतुर्थेमा
३६ सीत्याप्रस्तंबलवत्त्राच्च॥कार्ष्णाजिनिस्तुआप्रसवात्कर्मकालमाह॥गर्भलंभनमारभ्ययावद्गर्भ
सवस्तदा॥सीमंतोन्नयनंकुर्यात्छिरवस्येवचनंयथेति।मासोत्रसौरसावनयोरन्यतरोग्राह्यः
॥कालविधाने॥चतुर्थषष्ठाष्टममासामान्निसौरेणगर्भेप्रथमेविधेयं॥सीमंतकर्मद्विजभामिनी-
नांमासेष्टमेविहुबुधिंचकुर्यादिति॥चतुर्थेसावनेमासिषष्ठेवाप्यथवाष्टमेइतिवसिष्ठेः।शौनकः॥
शुक्लपक्षेचपुंलिंगनक्षत्रस्थेदिवाकरे।तिष्यःपुनर्वसुर्हस्तोनुराधाश्रवणाश्चपुंगिति॥अ राम: ३६
त्रापिप्रयोगविधिःस्वसूत्रादवगंतव्यः॥जातकर्णः॥सीमंतोन्नयनंकुर्यात्कुर्यात्पुंसवनंयदिपुं
सवंप्राग्विनिर्वर्त्ततः सीमंतमुन्नयेत्॥ ॥ससव्रतः॥मृतोदेशांतरगतोभर्त्तास्त्रीसंस्कृतेपुच
दिवरोवागुरुर्वापिवंश्योवापिसमाचरेत्॥स्त्रीयद्यकृतसीमंताप्रसूयेतकथंचन॥पुत्रंगृही
त्वाविधिवत्पुनःसंस्कारमर्हति॥पराशरः॥ब्रह्मौदनेचसोमेचसीमंतोन्नयनेतथा॥जात

श्राद्धेनवश्राद्धेभुक्त्वाचांद्रायणंचरेद्द्विजः॥इतिसीमंतोन्नयनविधानं॥ ॥अथवंध्यात्वहरविधा
नानि॥तत्रादौरुद्रस्नानं॥ ॥हेमाद्रौभविष्योत्तरे युधिष्ठिरः॥रुद्रस्नानंविधानेनकथयस्वजना
र्दन॥सर्वदुष्टोपशमनंसर्वशांतिप्रदंनृणां॥श्रीकृष्णउवाच॥देवसेनापतिस्कंदंरुद्रपुत्रंषडा
ननं॥अगस्त्योमुनिशार्दूलःसुखासीनमुवाचह॥सर्वज्ञोसिकुमारत्वंप्रसादाच्छंकरस्यवै॥रु
द्रस्नानविधानेनइहिकस्यकथंभवेत्॥स्कंदउवाच॥ ॥मृतवत्सातुयानारीदुर्भगाऋतुवा-
र्जिता॥यास्रतकन्यकावंध्यास्नानंसासोविधीयते॥अष्टम्यांवाचतुर्दश्यामुपवासपरायणा॥रु
तौशुद्धेचतुर्थेह्निप्राप्तेसूर्यदिनेथवा॥नद्योस्तुसंगमेकुर्यान्निर्झानपोविशेषतः॥शिवालये
थवागोष्ठेविविक्तेवागृहांगणे॥आहिताग्निंद्विजंशांतंधर्मज्ञंसत्यशालिनं॥स्नानार्थंप्रार्थ
येदेनंनिपुणंरुद्रकर्मणि॥तमेतस्तुमंडपंकुर्याच्चतुरस्रमुदककलशं॥वद्धचंदनमालंगोमये
नानुलेपितं॥तन्मध्येश्वेतरजसासदलांपद्ममालिखेत्॥मध्येतस्यमहादेवंस्थापयेत्कर्णि
कोपरि॥दद्याद्दलेषुनंद्यादींश्चतुर्थाविधिपूर्वकं॥इंद्रादिलोकपालांश्चदलेष्वन्येषुविन्यसेत्॥

देवीं विनायकं चैव स्थापयेत्तमपार्थिव॥ दत्वार्घ्यं गंधपुष्पं च धूपं दीपं च मोदनं॥ भक्ष्याण्यन्नानि वि
धान्यथा फलानि विविधानि च॥ चतुःकोणे शुभं गारमश्वत्थदलभूषितं॥ तं गारकलशं॥ एकैकं वि
३७ न्यसेद्धन्वन्सर्वौषधिसमन्वितं॥ मंडपस्य चतुर्दिक्षु दद्यान्भूतबलिं ततः॥ आग्नेय्यां दिशि कर्त्तव्यं
मंडपस्य समीपतः आग्निकार्यं शुभे कुंडे पत्रपुष्पैरलंकृते॥ तिलव्रीहियवसर्पिषा युक्तं घृतेन मधुनास
ह॥ मानस्तोकेन जुहुयात्कृतहोमे नवग्रहे॥ द्वितीयस्याग्निकार्यस्य कर्त्ता चिब्राह्मणो भवेत्॥
ऋग्ज्ञाप्यकृदाचार्यं सितचंदनचर्चितं॥ सितवस्त्रपरीधानं सितमाल्यविभूषितं॥ शोभयेत्के राम:
कणैः कुंडलैः कर्णवेष्टांगुलीयकैः॥ मंडपस्य समीपस्थो जपेद्रुद्रान्विमत्सरः॥ यावदेकादशागु ३७
णाः पुनरेव जपेत्तु तान्॥ दिव मंडलवक्रायं द्वितीयं डलं शुभं॥ तस्य मध्ये तु सा नारी श्वेतपुष्पैर
लंकृता॥ श्वेतवस्त्रपरीधाना श्वेतगंधानुलेपना॥ सुखासनोपविष्टां तां आचार्यो रुद्रजापकः
॥ अभिषिंचेत्ततश्चैनामर्कपत्रपुटांबुना॥ अभिद्राणप्यनूना निस्नानार्थं विनियोजयेत्॥
चतुःषष्टिकृचैनैव रुद्रैरेकादशेन तु॥ शतानि सप्तवर्णीनां चतुर्भिरधिकानि तु॥ वर्णानां के

चाभिसंख्यः॥ तासां चतुःषष्टिसंख्यानामेकादशकृत्वः पठितानामियं संख्या॥ अभिदेणेति मंत्रे
ण स्नानार्थं विनिवेशयेत्॥ अश्वस्थानाद्गजस्थानाद्गजस्थानाद्वल्मीकसंगमाद्ध्रदात्॥ वेश्यागार
णाद्राजस्य पात्रद्वातीयथैममृदं॥ सर्वौषधीशे च नाचनदीनां तीर्थोदकानि च॥ एतत्प्रक्षिप्य केशशेशि
वस्रज्ञेसु प्रदीते॥ आपादतलकेशांतं कुक्षिदेशविशेषतः॥ सर्वांगं लेपयेन्मृत्स्नया सुशीलाकाचि
दं गवा॥ रुद्राभिजप्तेन ततः स्नापयेत्कलशेन तां॥ तोयपूर्णाष्टकलशैरश्वत्थदलपूरितैः॥ सर्वतोदि
क्स्थितैः पश्चात्स्थापयेत्कलशाष्टकैः॥ एवं स्नात्वा स्नापकाय दद्याद्गां कांचनं तथा॥ होतुरेवाच
निर्दिष्टा दक्षिणा गौः पयस्विनी॥ ब्राह्मणानामथान्येषां स्वशक्त्या मुनिपुंगवः॥ गोवस्त्रकांचना
दीनि दत्वा दत्वा क्षमापयेत्॥ कृतेनानेन विप्रेंद्र रुद्रस्नानेन भामिनी॥ सुभगा कांतिसंयुक्ता
बहुपुत्रा च जायते॥ सर्वेष्वपि हि मासेषु ब्राह्मणानुमतौ शुभं॥ तस्मादवश्यं कर्त्तव्यं पुत्रार्थी
सुखमृच्छति॥ यास्नानमाचरति रुद्रमिति प्रसिद्धं श्रद्धान्विता द्विजवरानुमतेन तां गी॥ दोम
षान्निहत्य सकलान्स्वशरीरजान्सा जोभनक्तुः प्रियाभवति भारतीजीवस्या॥ ॥ ॥ ॥

इतिहेमाद्रौशान्तिकाण्डेभविष्योत्तरपुराणोक्तरुद्रस्नानमङ्गलवाक्यानि॥ ॥अथास्यस्यप्रयोगः
॥यस्यांकस्यांचिदष्टम्यांचतुर्दश्यांवासंभारान्संभृत्यचतुर्थेह्निकृतस्नातायांस्सूर्यवारेवानदीसं
३८ गमंगत्वातदभावेशिवालयादिकमेत्यपुण्याहंवाचयित्वा॥ ॥आहिताग्न्यादिगुणविशिष्ट
द्विजमाचार्यत्वेनवृत्वाब्राह्मणांश्चवृणुयात्॥अथाचार्योहस्तंचतुरस्रंमंडपंकृत्वातन्मध्ये
तरजसाष्टदलपद्ममालिख्यब्रह्मादीन्मंडलदेवास्तत्रावाह्यपूजयित्वाकर्णिकायांरु
द्रकलशंमंत्रवत्स्थापयित्वादध्यक्षतादिभिःशोभयित्वातत्रमहादेवमावाह्यपूर्वादिच रा.न.
तुर्षुदलद्वयेषुनंदिनंभृंगिरिटिंकालंमहाकालंचक्रमेणावाह्यतेष्वेवाष्टदलेष्विंद्रादीनष्टदि ३८
क्पालांश्चावाह्यमहादेववामभागेपार्वतींदक्षिणभागेविनायकंचावाह्यषोडशोपचारैःपू
जयित्वापश्चाच्चतुःकोणेषुकुंभचतुष्टयंमंत्रवत्स्थापयित्वोदकमा—सिच्याश्वत्थपत्रवादिनि
क्षिप्यावरुणमावाह्यकलशंसंप्रार्थयेत्॥देवदानवसंवादेमथ्यमानेमहोदधौ॥उत्पन्नोऽ
सितदाकुंभविधृतोविष्णुनास्वयं॥त्वत्तोयेसर्वतीर्थानिदेवाःसर्वेत्वयिस्थिताः॥त्वयितिष्ठ

तिभूतानित्वयिप्राणाःप्रतिष्ठिताः॥शिवस्स्वयंत्वमेवासिविष्णुस्त्वंचप्रजापतिः॥आदित्यावसवोरु
द्राविश्वेदेवाःसपैतृकाः॥त्वयितिष्ठंतिसर्वेपियतःकामफलप्रदाः॥त्वत्प्रसादादिमंयज्ञंकर्तु
मीहेजलोद्भव॥सान्निध्यंकुरुमेदेवप्रसन्नोभवसर्वदेति॥ततोमंडपस्याष्टदिक्षुकुंभाष्टकं
स्थापयित्वेंद्रादिसंपूज्यइंद्रादिभ्योबलीन्दत्वाकुंभानस्पृष्ट्वाशान्नेकादशावृत्त्यारुद्रान्जपे
त्॥तस्मिन्कालेब्रह्मापश्चादाग्नेय्यांदिशिकुंडेस्थंडिलेवाग्निमुपसमाधायइध्मिमधुघृतोपे
तंदूर्वाणमाहुतिपरिमितंमानस्तोकेतिमंत्रेणाष्टोत्तरवारंजुहुयात्नवग्रहहोमपूर्वकं॥
ततआचार्योदेवमंडलवत्कांडांतरंकृत्वातत्रयजमानंदंपतीमध्येतवस्त्रावृतौपवेश्यपू
र्वादिकलशेनरुद्राध्यायस्यैकैकमंत्रमुक्त्वार्कपत्रपुटग्रहीतेनाभिषिंचेत्॥चतुःषष्टिवि
भागेन॥एवमेकादशावृत्त्याचतुरधिकसप्तशतानिभवंति॥इयंसंख्यावाजसनेयिशा
खायामसंभवति॥अच्छिद्रेणपवित्रेणेतिअर्कपत्रग्रहणमंत्रः॥अथरुद्रकलशोदके
नसप्तमृत्तिकासर्वौषधिगोरोचनादियुतेनापादतलदेशांतंविशेषः॥कुक्षिदेशेभिषिंचेत्॥

ततोमंडपस्येशदिक्स्थापिताष्टकलशोदकैरभिषिंचेत्॥ एवंस्नातःस्नानवस्त्रंपरित्यज्यवस्त्रां
तरंपरिधायाचार्यायसुवर्णादिदक्षिणांदत्वाहोमकर्त्रेपयस्विनीगौर्देया॥ अन्येभ्यय
३० सीदक्षिणादेया॥ ततोयथाशक्तिब्राह्मणान्भोजयेदितिभविष्योत्तरपुराणोक्तरुद्रस्नानविधा
नं॥ अथबौधायनोक्तरुद्रस्नानविधानंप्रयोगेणोच्यते॥ उदगयनादौगुरुशुक्रास्तादिर
हितेशुद्धेमासिशुक्लपक्षेद्वस्तु। कालेविशेषतश्चतुर्थ्यांह्निअष्टम्यांचतुर्दश्यांवारविवासरे
वाशुभनक्षत्रेचंद्रताराद्यनुकूल्येकार्यं॥ इदंचतुर्विधवंध्यात्वेभवतिविशेषतोन्तापस राम:
त्वेज्ञेयं॥ इदंचमहानद्योर्नद्यौर्वाशोण्यसंगमेसंगमस्मात्रेवाकार्यं॥ तत्रपूर्वकेचासिभार्या ३०
दीर्घायुःसुपुत्रायुसंततिप्रतिबंधकरूपदुरितनिरासार्थंयथाशक्तिप्रायश्चित्तमनुतापयु
क्तःकुर्यात्॥ नचफलंतारम्यावगतदुरिततारम्येनषडब्दव्यब्दसाधर्बिन्दुरूपंचाब्दयतोकृपा
तिकृद्रूपंवाद्रव्यहोमतीर्थब्राह्मणभोजनादिप्रसाम्नायैवकार्यंसम्योयदिष्टं॥ ततःश्री
रुद्रप्रीत्यर्थंकृच्छ्रात्मेकांयेनुशक्त्योपस्करमुनां॥ दिपच्छात्वंदधिवीसचांधिनुःकेशवसंभवा॥

सर्वमृत्युहराणिसमंततः। शांतिंप्रयच्छमेइतिमंत्रेणदद्यात्॥ ततःशक्तौलुद्रांस्तदर्धमयुतंवागायत्री
जपंतद्दशांशेनतिलहोमंचकृत्वानियतक्रियआसनोपविष्टआचांतोमस्युद्धिपूर्वकंप्राणानाय
म्यदेशकालौसंकीर्त्यममसभार्यस्यदीर्घायुःसुपुत्रादिसंततिप्रतिबंधकेनइहजन्मनिअन्य
जन्मनिवाकृतेनाष्टकापर्वादिपितृकनैमित्तिकाकरणेनवापरद्वेषेणवागुरुद्वेषेणवामृ
गशावनक्षणेनवाबालहत्यातेनवारत्नापहरणेनवावत्सवियोजनेनवापितृमातृद्वेषेण
वान्येनवादुष्टकर्मणासन्नचतुर्विधवंध्यात्वान्यतरवंध्यात्वदोषनिरासद्वारा॥ तथास्त्रि
याःकुक्षिगतदोषज्ञाताज्ञातान्यदुष्टस्त्रीचैलांचलस्पर्शदोषतदेकासनाशनशय्यादिज
नितदोषादिसर्वसंततिप्रतिबंधकनिरासद्वाराचउमासहितश्रीरुद्रप्रीत्यादीर्घायुष्यसुपु
त्रादिसंततसवाप्त्यर्थंबौधायनोक्तविधिनारुद्रकलशस्नानाख्यंकर्मकरिष्येइतिसंकल्प्या
गणेशपूजनपुण्याहवाचनमातृकापूजननांदीश्राद्धानिसंकल्पपूर्वकंकुर्यात्॥ एतानिकृ
त्वावाप्रधानसंकल्पःकार्यः॥ ततआचार्यब्रह्मऋत्विग्वरणंकरिष्यइतिसंकल्प्यब्राह्मणान्वा

र्चयेत्॥ ब्राह्मणाः संतु मे शस्ताः पापात्पांतु समाहिताः॥ वेदानां चैव दातारस्त्रातारः सर्वदेहिनां॥
जपैर्यज्ञैस्तथा होमैर्दानैश्च विविधैः पुनः॥ देवानां च पितॄणां च तृप्त्यर्थं याजकाः कृताः॥ येषां दे
४० हे स्थिता वेदाः पावयंति जगत्त्रयं॥ ते मा रक्षंतु सततं जपयज्ञे व्यवस्थिताः॥ ततः। अग्निहितो
ग्निदिक्कलशं तं धर्मज्ञं सस्य शालिनं॥ स्नानार्थं प्रार्थयि देवं निपुणं रुद्रकर्मणि॥ ति लक्षणायु
तमाचार्यं वृणुयात्॥ ततो ब्राह्मणं वत्वैकादश रुद्रत्विजो वृणुयात्॥ ततः स्वर्णाभ्युपर्कैर्वस्त्रा
लंकारादिभिर्यथाशक्ति पूजयेत्॥ ततः आचार्यादिसहितो यजमानो मंडपं प्रविशेत्॥ ततः स
ऋत्विगाचार्यः संकल्पपूर्वकं सलक्षणे मंडपे कुंडे वा ईशान्यां सर्वतोभद्रलिंगतोभद्रमष्ट रा॰म॰ ४०
दलं वा प्रत्येकं द्वादशारं चयित्वा तत्समीपे परितो मंगलार्थं सर्षधान्यानि निधाय रक्षोह
णमित्याद्यैर्वेदमंत्रैर्यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा॥ स्थानं त्यक्त्वा तु तत्स
र्वं यत्र स्थं तत्र गच्छतु॥ अपक्रामंतु भूतानि पिशाचाः सर्वतो दिशं॥ सर्वेषामविरोधेन ब्रह्म
कर्म समारभे इति॥ पुराणमंत्राभ्यां च मंडपांतः सर्वतः सर्षपान्विकीर्य पंचगव्येन शुचीवो

हवोतित्वचेत्यभ्युक्ष्य मंडपपूजां विधायासने उपविश्य भूतशुद्ध्यादिकमात्मरक्षां कृत्वा श्रीरुद्रं ध्या
यत् आराधितो मनुष्यैस्त्वं सिद्धैर्देवासुरादिभिः॥ आराधयामि भक्त्या त्वं मां गृहाण महेश्वरेति
संप्रार्थ्य इंद्रादिदिक्पालान्प्रणवादिनमोंतैस्तत्तन्नाममंत्रैरोमिंद्राय नम इत्यादिरूपेण तथा
मही द्यौरिति भूमिं स्पृष्ट्वा ॐ ओषधयः समिति यवान्क्षिप्त्वा आकलशेष्विति क्षालितान्कलशांस्त
त्र निधाय इमं मे गंगे इति तीर्थजलेनापूर्य तत्र गंधद्वारामिति गंधं॥ ॐ ओषधयः समिति यवान्
॥ या ओषधीरिति सर्वौषधीः॥ कांडात्कांडादिति दूर्वां॥ याः फलिनीरिति फलं॥ स्योना पृथि
वीति सप्त मृदः॥ अश्वत्थे व इति पंचपल्लवाः॥ स्याहिरत्नानीति पंचरत्नानि॥ हिरण्यरू
प इति हिरण्यं च युवा सुवासा इति रक्तसूत्रेण वेष्टयेत्। पूर्णा दर्वीति धान्यपूर्णानि
वंशपात्राणि कलशेषु स्थापयित्वा। कलशस्य मुखे विष्णुरित्यादिना कलशेषु देवतीर्थान्य
वाह्य देवदानवसंवादे इत्यादिना पूर्वप्रयोगपठितेन कलशान्संप्रार्थ्य समुद्राद्धूर्मिरिति क
लशजले समुद्रं भावयित्वा कलशमुखे मुख्यजलजज्ञानमिति ब्रह्माणं॥ मध्ये रुद्रं विष्णुरिति विष्णुं॥

कंठेन मः शंभवे चेति रुद्रां मुखे रंद्राग्नी आगतमिति रंद्राग्नी। यमेन दत्तमिति यनं चारवेत्येति स
वंत्र देवाच। आदित्यल स्येति सूर्ये। विश्वतश्चक्षुरिति परमेष्ठिनं च॥ पार्श्वयोर्नमोस्तु सर्पे-
४१ भ्य इति सर्पान्। पूर्वे अग्निमीळे इति ऋग्वेदं। दक्षिणे इषे त्वेति यजुर्वेदं। पश्चिमे अग्न आयाहि
ति सामवेदं। उत्तरे शन्नो देवीरित्यथर्ववेदं च॥ मध्ये तत्सवितुरिति गायत्रीं न्यसेत्॥ ततः पूर्वा
१ द्यष्टदिक्षु इन्द्रादि मंत्रैस्तन्नामभिर्वा इन्द्रादीन् इष्टदेवो न्यस्य कांडात्कांडादिति दूर्वाः बद्धीः
शिरसि निक्षिपेत्॥ ततो वंशपात्रे अष्टदलयुतानि वस्त्राणि संस्थाप्य तेत्र निष्कं तदर्धं तदर्धं सु
वर्णनिर्मितीः अशक्तौ वह्नाव ह्नाय रसुवर्णनिर्मिताः श्रीरुद्रप्रतिमाः द्वादशाग्न्युत्तारणं पं राम० ४१
चामृताभिषेकपूर्वकं संस्थाप्य तास्वावाहं तु हरयइति श्रीरुद्रमावाहयेत्॥ अथ सद्यो
जातं प्रपद्यामीत्यासनं॥ सद्योजाताय वै नमो नमः इति पाद्यं॥ भवे भवे नातिभवे भवस्व मा
मित्यर्घ्यं॥ भवोद्भवाय नमः इत्याचमनीयं॥ वामदेवाय नम इति आपो हि ष्ठेत्यस्नानं॥ ततआ
चमनं दत्वाष्टभिस्तर्पयेत्॥ ॐ भवं देवं तर्पयामि। शर्वं देवं तः० रुद्रं दे० पशुपतिं दे० उग्रं दे० ईशानं दे०

भीमं दे० महांतं दे० ततो ज्येष्ठाय नम इति वस्त्रं। तूष्णीमानेमेचो सर्वभूतदमनाय नमइति तांबूलं। म
नोन्मनाय नम इति दक्षिणां। किंचित् सद्योजातमिति प्रतिष्ठाप्य सद्योजातायेत्यासनं॥ भवे भवे
इति पाद्यं। भवोद्भवायेति स्नानं अष्टभिस्तर्पणं। ज्येष्ठायेत्याचमनं श्रेष्ठायेति मधुपर्कं काला
येति गंधं कलविकरणायेति पुष्पं सर्वभूतदमनायेति धूपं॥ मनोन्मनायेति दीपं। भवोद्भवाये
ति नैवेद्यमित्यादीत्याद्युः। अथाष्ट पुष्पांजलयः। भवाय देवाय नमः। शर्वाय देवाय नमः। रु
द्राय दे० पशुपतये दे० उग्राय दे० ईशानाय दे० भीमाय दे० महते दे० अघोरास्य घोरतन्त्रघोरे
भ्योथ घोरेभ्य स्त्युपतिष्ठे॥ ततो नमस्कारः॥ विश्वेश्वर विरूपाक्ष विश्वरूप सदाशिव शरणं भ
व भूतेश करुणाकर शंकर। हर शंभो महादेव विश्वेश अमरवल्लभ। शिव शंकर सर्वात्मन्नील
कंठ नमोस्तु ते॥ मृत्युंजयाय रुद्राय नीलकंठाय शंभवे। अमृतेशाय शर्वाय महादेवाय ते नमः
इति प्रै। ततः प्रार्थना। राजसेन स्वयं ब्रह्मा सात्विकेन स्वयं हरिः। तामसेन स्वयं रुद्रस्त्रितयं त्व
यि संस्थितं॥ नमामि त्वां विरूपाक्ष नीलग्रीव नमोस्तु ते। त्रिनेत्राय नमस्तुभ्यमुमादेहार्धधारि

णे॥ त्रिशूलधारिणे तुभ्यं भूतानां पतये नमः। पिनाकिने नमस्तुभ्यं मीढुष्टमाय ते नमः॥ नमामि त्वां म
हादेवा पतये त्वां नमस्यहं॥ भीतानां भोऽप्यस्त्वमेवेह भक्तानां शर्मदः स्वयं॥ सूर्यरूपं समासाद्य देहि
४२ नां देहधारकः॥ मुनीनां मुक्तिदाता च भक्तानां मुक्तिदः स्वयं॥ यदृच्छयास्य वं भिदं त्वां मन्येति च या-
ति चे॥ नान्यस्यापि जयं दातुं शक्तिरस्ति त्वया विनेति॥ ततः आराधयामि भक्त्या त्वां मां गृहाण महे
श्वरेत्यात्मनिवेदनं॥ ततः कमलस्य पूर्वादिषु दलेषु इंद्रादीन् अष्टलोकपालान् संपूज्यान्नादिबलिमु
पहृत्य प्रार्थयेत्॥ इंद्राद्याश्च सुराः सर्वे लोकपालास्तथैव च॥ आदित्या वसवो रुद्रा विश्वेदेवा मरु नामः
द्गणाः॥ ते सर्वे पूजिताः शांतिं प्रयच्छंतु सुखानि च॥ बलिदानादिना तुष्टाः प्रयच्छंतु यथेप्सितमि ४२
ति ततः सर्वे प्राणिनाम् अस्य देशकालौ स्मृत्वा यजमानस्यायुष्य सुपुत्रादि संततये वा स्य यैरेके
कादशिनी जपं कर्तव्यम् साधारणान्यसांते विशेषन्यासं कुर्यात्॥ ॐ भूर्भुवः स्वः सद्योजातं प्रपद्या
मीति पठित्वा भूर्भुवः स्वरों हृदयाय नमः। ॐ भूः वामदेवायेति मंत्रां ते भूर्भुवः स्वरों शिरसे
स्वाहा॥ ॐ अघोरेभ्य इति मंत्रांते भूर्भुवः स्वरों शिखायै वषट्॥ ॐ भूः तत्पुरुषायेति मंत्रांते भू

र्भुवः स्वरों नेत्रत्रयाय वौषट्॥ ॐ भूः त्र्यंबकं यजामह इत्यंते भूर्भुवः स्वरों अस्त्राय फट् इति विन्य
स्यैवमेव कलशेषु न्यसेत्॥ ततो राजसेन स्वयं ब्रह्मेत्यादि शक्तिरस्ति त्वया विनेत्यंतेन देवं
स्तुत्वा स्वस्य कलशान्तरं स्पृष्ट्वा शुभं ध्यायेत्। ततः प्रत्येकं रुद्रैकादशिनी जप्त्वा राजसेन स्वयं
ब्रह्मेति पुनस्तुत्वा क्षमापयेयुः॥ हीनो विभक्तिवर्णैश्च व्यंजनैश्च स्वरैस्तथा जपो मे क्ष
म्यतां देव प्रसादं कुरु किंकरे॥ महारुद्रजपो मन्त्रेनो वाप्यधिकोपि वा॥ सर्वः संपूर्णतां यातु
त्वत्प्रसादात् सदाशिव॥ यदक्षरपदभ्रष्टं मात्राहीनं तु यद्भवेत्॥ तत्सर्वं क्षम्यतां देव प्रसी
द परमेश्वरेति॥ ॥ ततः आचार्यः कुंडे स्थंडिले वा स्वशाखोक्तविधिनाग्निं प्रतिष्ठाप्यत्व
ष्टिं निर्वापादिना चरुं पक्त्वाज्यभागांतं कृत्वा समित्तिलचर्वाज्यैः प्रति व्यंजपदशांशेन हो
मं कुर्यादृत्विग्भिः॥ सह अत्राचार्यादीनां द्वादशैकादशिनीजपे रुपाणि शतं द्वात्रिंशच्च
भवंति॥ १३२॥ तद्दशांशस्त्रयोदश रूपाणि॥ द्वे रूपे अवशिष्टे। तद्दशांशो ष्टाचत्वारिंशान्नि
त्रविभागपक्षे प्रतिरूपं नमस्ते रुद्रादि पंच॥ पुनर्नमस्ते रुद्रादि पंचेसेवं दश॥ सर्वाहुता-

योऽष्टाचत्वारिंशत्सहस्रेषु शतानि चतुर्विंशतिश्च॥ ४८२४॥ शिवरूपद्वयाहुतयो दश १० चमका
५३ हुतयश्चतुर्दश सर्वा मिलिता आज्याहुतयो दशसहस्राण्यर्द्धषट्शतानि भवंति १०८४८ एतावा
न्नाज्यद्रव्ये होमः॥ अत्र यः अशक्तो षोडशधादिपक्षान्तरेण होमः। शक्तौ तु प्रतिमंत्रपक्षेण
होमः कार्यः। प्रतिमंत्रपक्षे च शिष्टरूपद्वयस्य दशांशः प्रतिरूपं सहस्रदशांशस्तद्दशांशत्रयं
चतुस्त्रिंशत्। ततः एकादशशतसंख्यैरेकैकपत्रैर्मूलमंत्रेण होमः कार्यः॥ यद्वा सर्वोऽपि
होमो मूलमंत्रेणैव कार्यः। मूलमंत्रस्य परमेष्ठी ऋषिः रुद्रो देवता पङ्क्तिश्छंदः होमादौ वि
नियोगः॥ अथास्य न्यासः॥ परमेष्ठिने ऋषये नमः। शिरसि। पंक्तये छंदसे नमो मुखे। रुद्र॰ ५३
रुद्राय देवतायै नमो हृदये॥ नम इति शिखायां। शंभवे इति शिरसि। चेति ललाटे। मय
इति नेत्रयोः। भव इति श्रोत्रयोः। चेति नासिकायां॥ नम इति मुखे। शंकराय इति ग्रीवायां
चेति हृदये। मय इति जठरे। स्करायेति नाभौ। चेति श्रोण्योः। नम इति कट्यां॥ शिवायेत्यू
र्वोः। शिवतरायेति जानुनोः। चेति पादयोः॥ नमः शंभवे चेति हृदये॥ मयोभवे चेति शिरसि।

नमः शंकराय चेति शिखायां। मयस्कराय चेति कवचाय हुं। नमः शिवायेति नेत्रत्रयाय
वौषट्॥ शिवतराय चेत्यस्त्राय फट्। इति न्यासपूर्वकं पूर्वोक्तहोमं कृत्वा। स्विष्टकृदादि
पूर्णाहुतिपर्यंतं कृत्वाचार्यादियोगं गंधाद्युपचारैः रुद्रस्योत्तरपूजां कृत्वाभिषेकार्थं रुद्रं
प्रसाद्यासेकुत्तरतः चतुरस्रं स्वस्तिकोपेतं मंडलद्वयं कृत्वा तत्रोदुंबरकाष्ठपीठद्वये परि
हितांहतं श्वेतवस्त्रौ दंपती प्राङ्मुखावुपवेश्य स्वयमुदङ्मुखः। स्थित्वा ततश्चतुरधिकसप्तश
तार्कपत्रैः रुद्रैकादश्या मूलमंत्रेण वाभिषिंचेयुः॥ अत्र च वाजसनेयिनां रुद्राध्यायस्य चतुः
षष्टिकंडिकात्मकत्वात्तस्यैकादशावृत्त्या चतुरधिकसप्तशतसंख्या भवति। चतुःषष्टि
प्रकारस्तु नमस्ते षोडश १६ नमो हिरण्यबाहवे। ५ उष्णीषिणे ५ तक्षभ्यो ५ ज्येष्ठाय ५ स्तु
त्याय ५ पार्यायेति पंच पंच। द्रापेऽअंधसोऽष्टादशेति। ६४। एतासामेकादशावृत्तौ चतुरधिक
सप्तशतानि ७०४ तेन चैकैकेन मंत्रेणैकैकार्कपत्रेणाभिषिच्य पत्राणि त्यजेयुः। अन्येषामा
पस्तंबादीनां मूलमंत्रेणैवैतावदावृत्तेनाभिषेक इति बौधायनसंप्रदायः॥ ततः कलशस्थ

पद्मवैराश्रुः शिशानरतिसूक्तेनाप्यायस्वेतिसोमसूक्तेन वदंतियच्चेत्यादिपावमानीभिरा-
पोहिष्ठेत्यादिभिः समुद्रज्येष्ठा इत्यादिभिः सहस्राक्षमितित्र्यृचेन सुरोस्त्वामित्यादिपौरा
४४ णैश्चाभिषिच्य शिवं शिवमिति वदेयुः॥ इत्युक्त्वाचार्यान्न्यान्यर्कपत्राणि गृह्णीयादिसके॥ म
त्विजस्तेनार्कपत्रे रेकादशभिर्न्याभिषिंचेयुः॥ आचार्यस्तु पद्मवेराश्रुः शिशान इत्यादिसू
क्तैरभिषिंचेदिति सन्ये॥ ततः सर्वौषधीभिः सम्मद्भिः नद्यादुभयकूलमृदा यसर्वांगेष्वनुलि
प्तौ दंपती विशेषतः॥ कुक्षिदेशेनुलितां स्त्रियं शिष्टेनोत्तूष्णं तेन सकलशोदकेन क्षालितां गो
वस्त्रप्रांतेग्रंथिं दत्वा संगमेस्नात्वा शुद्धे वाससी परिधेनो द्रुतेनसर्वकलशोदकेन क्षालि रा॰म॰ ४४
तां गौवस्त्रशांतेग्रं दत्वा संगमेस्नात्वा शुद्धे वाससी परिधायी॥ शरीरस्थाश्च ये दोषाये-
दोषा गर्भबीजयोः॥ सर्वे ते नाशमायांतु कर्मणानेन मे द्विजा इति मंत्रेणाचार्याभिषेकः॥ वा
वाससी यत्का॥ शुद्धे वासी परिधाय शुक्ले चंदनमाल्याद्यलंकृतो भवेतां॥ ततो दंपतीभ्यां
नन्वारब्ध आचार्यः समुद्रा दूर्मिरित्यादिमंत्रे पूर्णाहुतिं हुत्वा वसोर्द्धारां जुहुयात्॥ तत्र॥

श्रावयेत्सूक्तमाग्नेयं वैष्णवं मैंद्रवं॥ महावैश्वानरं साम ज्येष्ठसाम च पाठयेत्॥ ततो यजमानः-
सभार्यः कृतस्यायुष्ककरणः पूजापूर्वकमाचार्याय पयस्विनीं धेनुं सुवर्णं च यथाशक्ति दक्षि
णात्वेन दत्वा ब्राह्मणेभ्यो वृषभमृत्विग्भ्यो यथाशक्ति सुवर्णं दत्वा समाप्य रुद्राद्यावावाहा-
हितदेवता विसृज्य रुद्रप्रतिमामाचार्याय दत्वा श्रीरुद्रप्रीत्यर्थं शतं तदर्धं तदर्धं वा ब्राह्मणा
न्भोजयित्वा तैः सह पूर्णतां वाचयित्वा जीवत्पतिपुत्राभिः स्त्रीभिर्वर्द्धापनादि कृतमंगलो
ब्राह्मणाशिषो गृह्णीयात्॥ फलं च ताम्बूलं च नारिकेलादि फलं सुवासिनीर्दद्यात्॥ अनेन वि
धिना कार्यो रुद्रः कलशस्नजकः॥ मुंक्ते स सकलान्भोगान्प्रसादाच्छंकरस्य चेत्यहभगवा
न्बौधायनः॥ ॥इति बौधायनोक्तरुद्रस्नानविधानं समाप्तं॥ शुभमस्तु॥ ॥अथ वंध्याभिषेकवि
धानं॥ तच्च होमाद्रौ शांतिकांडे॥ कार्त्तिकेय उवाच॥ ॥पूर्वमेव त्वयाज्ञातं संति वंध्या नहि स्त्रियः
॥ दोषैस्तु विविधाकारैर्ग्रहधातुविकारजैः॥ वंध्या संजायते तासां स्नानमाचक्ष्व यत्नतः॥ ॥ ॥
ईश्वर उवाच॥ ग्रहदोषान्प्रवक्ष्यामि शृणु पुत्र यथार्थतः॥ द्वात्रिंशति ग्रहाः प्रोक्ता नाडीपी

डाकरास्तु ते॥ ग्रहाः कौमारिकास्त्वान्ये द्वात्रिंशत्तेपि कीर्तिताः॥ चतुःषष्टिश्च संख्याता ग्रहाणां
क्रूरकर्मणां॥ चतुःषष्टिसहस्राणि एकैकस्य प्रविस्तराः॥ तेषां मध्ये तु प्रोच्यंते तुं षष्टि च नायकाः
४५ ।दोषैर्दशभिर्वक्ष्ये ग्रहस्तानि ति योषितं॥ एकपात्रेण यानेन परशय्यासनेन तु॥ परपुंसः
प्रसंगेन परवस्त्रविनष्टैः॥ उच्छिष्टकमाल्येन एकभाजनभोजनैः॥ केशोदकेन संस्
सिक्ता आनायस्य च मूहनात्॥ एतैर्दोषैश्च तस्वैर्ग्रहाः पीडाकराः स्मृताः॥ प्रथमं गृह्णंते
यो षां गर्भं च तदनंतरं। पश्चात्क्षीरं ततो बालं एवमाहुर्मनस्विं शयां॥ ग्रहनामानि वक्ष्यामि श्री राम:
बरी रेवती शिवा॥ सुरवीनंदी च लंबा च पूतना जंजपूतना॥ गोमुखी च बिडाला च तथा चैवा ४५
मला बला॥ ककोडी च हसंती च अहंकारी जया तथा॥ मुक्ताकेशी त्रिदंडी च अजामुखी च
ना॥ मुकुटा पिंगला नाविटनासा तथापरा॥ स्कंदग्रहास्तथा चान्येस वैषां नायकाः स्मृताः
॥रजनी कुंभकर्णी च तापसी राक्षसी परी॥ मोदनी रोदनी चाचयमनीन कुला तथा॥ चतुःष
१७ - ष्टिसमाख्याता मातरो बालमातरः। आर्जकोजंक्षो वीरो मीनी स्यः स्कंदपंचमः बाला नापी

उनां सर्वेभ्य मंते बलिकां दिशा॥ बलिं दद्याद्विधीनेन ततो मुंचंति नान्यथा॥ चतुरस्र कृतं क्षेत्रं
~~एकोशितिकैः॥ तेषु मातृकमसाः सर्वै~~च पमानिकारकैः येत् बाह्ये चाभ्यंतरे देतु चक्रमध्ये प्रयोज
येत्॥ स बाह्ये। न्यंवेवस्त्रा च क्रमामां लिखयल्लतः॥ अष्टपत्रयुतं शुभ्रं केसरैः सहकर्णिकैः॥ गा
तेषु मातृगणास्सर्वैंश्च तुषष्टि यथाक्रमं॥ पूर्वादि पूजयेत्सर्वांस्तथाष्टांतक मष्टधा॥ शिवं तु
कर्णिकामध्ये पत्रेषु नवसुस्थितं॥ कमले मध्यमेवस्त्र अंगैस्तु सहितं शिवं॥ पूजयेत्सर्वं वि
धिनाकल्पयित्वा तथासनं॥ अस्य कर्माणि वक्ष्यामि येन मुंचंति योषितः॥ ज्ञात्वा तासां वि
करं॥ श्यसर्वैर्भिरणं भूषितः॥ स्थापयेच्च विधानज्ञ उपवास परायणः॥ व्यतीपातादिने मु
के स्नानं कुर्याद्धि मे हनि॥ त्रिशृत्तरेषु रेवसंध्यां जापयेत्पुनर्वसौ॥ अश्विन्यां पष्य पुष्ये च रोहि
ण्यां मघयां गुहा देवालये मातृगृहे पितृ गेहे चतुष्पथे॥ जीर्णे तो कूपे तडागे वा नदीनां संगमेषु
वा॥ एकवृक्षे श्मशाने वा देवतानां च सन्निधौ॥ अष्टम्यां राजपेल्ली तु मध्यान्हे स्नापयेत्तर
ताः पुत्रकामा नु गंतीर्थे राजपत्नी तु संगमे॥ आचार्यस्तु सुसंपूर्णं शुक्लवस्त्रः शुचिः सदा॥

अष्टहस्तप्रमाणेन चतुर्हस्तमथापि वा॥ चतुरस्रं चतुर्द्वारं तोरणध्वजमंडितं॥ चंद्रातपकृतारो
पं पुष्पमाल्योपशोभितं॥ खानपानैश्च नैवेद्यैर्विविधं कारयेद्बलिं॥ चित्ररजोभिः समालिख्य मं
४६ मंडलं सर्वकामिकं॥ श्वेतं रक्तं तथा कृष्णं वर्णानां च क्रमेण तु॥ ईशो ब्रह्मा तथा विष्णु रजसाम
र्थ्यपाः स्मृताः॥ मंडलस्योत्तरे भागे कुर्यात्स्नपनमंडलं॥ चतुर्हस्तप्रमाणेन वर्णकैरुपशोभितं॥
॥अकालानष्टकलशांश्चतुरस्रप्रमाणतः॥ कृतपद्मवस्त्रसंयुक्तान्यथेष्टपरिवेष्टितान्॥ हिरण्या
क्षतदूर्वाभिरौषधीभिश्च संयुतान्॥ नद्योश्चोभयकूलाच्चु वल्मीकद्वयमृत्तलतः॥ गृहीत्वान्द्मे राम: ४६
तेभ्यः स्थापः येत्प्रथमे घटे॥ द्वितीये गोमयं स्थाप्यं तृतीये गंधवारि च॥ चतुर्थे हेमरजतेः पंचमे
सर्वमौषधाबष्टे तीर्थानुविन्यासः सप्तमे समस्पागरान्॥ कलशेनाष्टमेन्यस्य ढौंकरं मातृका
भिः सह अनेन विधिना मंत्री त्वभिषेकं समाचरेत्॥ मृतवत्सा जीवपुत्रा वंध्या च पि प्रसूतिका॥
अबीजा बीजतां याति स्त्री वाथ पुरुषोपि वा॥ अभिचारकृतं दोषं मंत्रो यं नाशयेदिति॥ अनेनै
वाहियोगेन मुख्येन सर्वबधुनी॥ दुर्भगा सुभगा स्याच्च कन्या प्राप्नोति सद्वरं॥ देवीभिश्चोपस

ष्टानां बालानां ग्रहपीडने॥ क्रियामेतां सदा कुर्यात्साधकस्तु यशशारीं॥ समायैर्दक्षिणादेयां
नगरे चाथ खेटके॥ हस्त्यश्वरथयानानि मुकुटं कुंडलानि च॥ धनधान्य हिरण्यानि येन वा
तुष्यते गुरुः॥ तेन तुष्टेन तुष्यंति देवता मातरो ग्रहाः॥ अथाभिषेककोदेयो यजमानेस भा
र्यके॥ यो हि जीवति तस्यायं तेन मृत्तं चापतेति ध्रुवं॥ ॐ फूं टूं स्वाहा॥ स्वर्षपैरक्षते वापि दं
देहेत् उयेच्छि स्तुं॥ मौनं च क्रीयते वा क्रोरोदते जीवते ध्रुवं॥ ॥इति भविष्योत्तरे॥ कृतबध्या
भिषेकविधानं॥ ॥अथ घटिकाभिषेकविधानं॥ ॥हेमाद्रौ॥ ॥भविष्ये॥ ॥ईश्व
र उवाच॥ शृणु षण्मुख वत्स त्वे नराणां घटिकया परं॥ धारयिष्यंति ये वत्स घटिकां दोव्विनिर्मि
तां॥ तथां मर्त्यश्च कामश्च सौभाग्यं वृद्धिमेष्यति॥ पूर्वोक्तं मंडलं कृत्वा॥ गौरीं तत्रैव पूजयेत्॥ स्व
स्यवित्तानुसारेण वित्तशाठ्यं न कारयेत्॥ ॥ईशान्यादिशि संस्थाप्य घटिकां मधुपूरितां॥
॥पुष्पमाल्यैरलंकृत्वा वस्त्रैश्चैव वेष्टयेत्॥ हिरण्यं निक्षिपेत्तत्र नमस्कारं कारयेद्बुधः॥ वस्त्रेणातुस
मावृत्य गंधांस्तत्रैव निक्षिपेत्॥ कुंकुमागरुकर्पूरचंदनेनाविलेपयेत्॥ उशीरं चंदनं मुस्ता [illegible]

बालकं सर्वमौषधं ॥ तथा चामलकं दूर्वां क्षिपेद्गोरोचनां बुधः ॥ शतमष्टोत्तरं जप्त्वा गोयवि मूल
विघया ॥ ततोभिमंत्र्य घटिकां गौरीमंत्रेण तां पुनः ॥ शताष्टाधिकजप्तेन अभिमंत्र्योदकं गुरुः ॥ त
तोभिषेकं कुर्याद्वै योषितो वा नरस्य च ॥ घटिकोदकसिक्ता वै या नारी मंडले गुरुः ॥ सुभगा सा भ
४७ वेन्नित्यं नरश्चैव सदा गुरुः ॥ अपुत्रो लभते पुत्रं अजीवा जीविनी भवेत् ॥ अनेनैव विधानेन गुर्वि
णी यदि कारयेत् ॥ पुत्रं प्रसूयते सा तु महावीर्यपराक्रमं ॥ राज्ञा विजयमाप्नोति धारयित्वा सुसं
गरे ॥ यानुरूपवती कन्या वरं च लभते यदा ॥ तदा घटीभिषेकेण सौभाग्यमतुलं लभेत् ॥ येन नाम: ४७
येन हि भावेन घटिकां कारयेद्बुधः ॥ तस्य तस्य हि भावेन तत्फलं लभते पुनः ॥ यत्तेनोक्रमयो किं-
चित्संक्षेपेण षडाननः ॥ तत्सर्वं मूलमाश्रित्य अनेनैव तु कारयेत् ॥ मूलमाश्रित्येति पूर्वोक्त-
मूलमंत्रेणेत्यर्थः ॥ न घटिकायाः परं किंचित्सौभाग्यकारणं मतं ॥ न घटिकायाः परं स्कंद ध-
र्मकामार्थमोक्षदं ॥ घटिकां धारयेद्यस्तु स कामानखिलांल्लभेत् ॥ पुत्रं लभते पुत्रं अधनो धन
माप्नुयात् ॥ ॥ इति भविष्ये घटिकाभिषेकविधानं ॥ ॥ अथ विष्णुश्राद्धं ॥ तच्च कर्मक्षयाय

कर्मविपाकाद्धि सतापत्यत्वमनपत्यत्वं वा ज्ञापयते तद्ध्वंसार्थमिदमनुष्ठेयं ॥ तद्यथा ॥ कर्मणां विशेष
णपचनं पाकः ॥ कर्मविपाकः ॥ ॥ स त्रिविधो जन्मायुर्भोगैः ॥ जन्म कस्मादि ॥ पतितं याजयित्वा
तु कृमयोनौ प्रजायत इत्यादि स्मरणात् ॥ आयुः पंचवर्षादिकं ॥ तत्र जीवत्वर्षादि दशपंच चत्वा-
रिंशदिति स्मरणात् ॥ भोगो यमयातनादि ॥ यमलोके तु ते घोरं लभंते यमयातनामिति स्मृतेः ॥ त
तश्च तेन कर्मणाऽनृतभाषणादिना बालनिधनादि जायत इति तन्निरासायेदं श्राद्धं ॥ नत्वत्या
युष्ट्वादि चेत्कर्मणः फलं कथं तर्हि विष्णुश्राद्धादिना तन्निरासः ॥ प्रारब्धकर्मणां भोगादेव क्षयात्
॥ सत्यं तथापि बलीयसा विष्णुश्राद्धगयाश्राद्धेन नानायोनिप्रविष्टप्राण्युद्धारवज्जन्माद्यपनु-
द्यात ना नश्यंति ॥ ननु गयाश्राद्धेनापि नानायोनिप्रविष्टानां कथमुद्धारः ॥ तदुद्धारे वा कथं स्मृ-
त्यविरोधः ॥ उच्यते ॥ क्षुत्पिपासारहितास्तिष्ठंतस्त एव वंशोच्छेदभयात्पुनः संसारं प्राप्य पुण्या यो-
निं प्रविशंति ॥ स्मृतिरपि प्रतिबंधकाभावे स्वयं एव कर्मणां यातनार्थतां बोधयति ॥ अत एवोक्तं
उद्धृता ये गयाश्राद्धे ब्रह्मलोके च ते शुभे ॥ भुंजते क्षुत्पिपासा वा न तेषां जायते क्वचित् ॥ न चापि प

तनं तस्मात्स्थानाद्भवति भूमिप॥ वंशोच्छेदात् पुनः सर्वे उत्तरंति महीतले॥ आगत्य स्मात्ततो लोकान्नि
पत्य जगतीतले॥ पापाः पापांसमायांति योनिं श्रेष्ठां शुभान्विता इति॥ ननु किमिदं विष्णुश्राद्धं विष्णु
४८ रूपिपितृउद्देशेन क्रियमाणं श्राद्धं विष्णुश्राद्धमिति चेत्॥ नापि तस्य रूपी जनार्दनो वासुदेवः प्रीयता
मिति विष्णुभावनया पित्राद्युद्देश्यकस्य याहश्राद्धस्यापि विष्णुश्राद्धत्वप्रसंगात्॥ कथं च विष्णू
देशेनानुष्ठीयमानकर्मविशेषात् कूटवादादिरतानां कर्मक्षयः किं च किमर्थमिदमनुष्ठेयं॥ बीजि
दोषपरिहारार्थं वा प्राणि दोषपरिहारार्थं वा नाद्यः कूटवादादिरतोद्धारार्थत्वात्॥ नांत्यः॥ कर्तव्य राम:
यो वक्कर्मभिः फलस्य जननात्॥ उच्यते॥ मृतप्राणि दोषनिराकरणद्वारा दीर्घायुः पुत्रादिप्रा ४८
प्त्यर्थं तया विष्णुभावनया मृतोद्देन क्रियमाणश्राद्धस्य विष्णुश्राद्धत्वात्॥ एतत्वादिगुणविशि
ष्टपुत्रेण पुत्रित्वस्यात्मा तेषां वस्त्रयं राज्ञानां किंस्यादियोनि निराकरणेन तेषां स्वापत्यत्वे सति
नेतरपत्यवत्वस्य कर्तृनिष्ठफलत्वात्॥ ततश्च इदं पश्चाद्दोषपरिहारार्थं राज्ञाभिषेकप्रायश्चित्ता
नुष्ठानाभावात्तेनां च दोषपरिहारार्थं प्रायश्चित्तश्राद्धयोरनुष्ठानाद्बीजिप्राणिनोः कर्मक्षयात्

तस्यैव प्राणिनो दीर्घायुष्ट्वादिविशिष्टस्य पुत्रत्वसिद्ध्यर्थं विष्णुश्राद्धानुष्ठानमिति सिद्धं॥ उक्तं च॥
बालस्यापि च दंपत्योरज्ञाते पापकर्मणि॥ ये दोषा गर्भसंभूता ये दोषा बीजिनस्तथा॥ सर्पदंशादिजाश्चै
च कर्मभिः॥ अनादिकर्मसंभूतं कर्मज्ञानेन दह्यते॥ तद्वत्प्राणिकृतं पापं विष्णुश्राद्धेन दह्यते इति॥
गर्भसंभूताः गर्भेषु मृतास्तत्कृता इत्यर्थः॥ तथा ग्लेन कर्मविपाकेन म्रियते बालकानि च तत्कर्मपरि
हारार्थं उच्यते वंशवृद्धये॥ बालकस्यापि दंपत्योरज्ञाते पापकर्मणि कुर्यान्निष्कृतिस्तत्र कुशा
रूपाय यथाविधि॥ यो मे प्रजानाशयति जीवो नश्यति वास्य यत्॥ ममाज्ञया कुरामयी प्रकृतिस
विशत्विमां॥ जन्मजन्मांतरकृतानपराधान्कृते न सनः पातकोपमहापापवायुरूपधरस्य मे
नमोस्तु विष्णुरूपाम त्राहि मां शरणागतं॥ निष्कृतिं ते करिष्यामि नवाब्दाहं हुत्वा तान्॥ तस्य
कारयपगोत्रस्य वायुरूपस्य देहिनः प्रेतस्य चोद्धारविधिं सर्वः संजनयाम्यथ॥ यो मे प्रजाना
शयति जीवो नश्यति वास्य यं॥ तस्य प्रेतस्य दत्तो ऽन्नं पयः पिंडोम उपतिष्ठतु॥ लभते चोत्तमग
तिं पिंडोदकविधौ कृते॥ न वाति नवमिश्राणि प्रेतश्राद्धानि यानि तु॥ तस्मिद्यं प्रकर्तव्यद्वात्रिंश

द्विजतर्पणं ॥ योगेश्वरं । विष्णुरूपः सन्मतां तृप्तिं ब्राह्मणतर्पणात् ॥ विष्णुश्राद्धं ततः कुर्यात्संततये
सुतसिद्धये ॥ इति तस्मात्सिद्धं विष्णुश्राद्धस्य कर्त्तव्यत्वं ॥ तत्रानपत्यत्वादौ निदानानि । चतुर्विधा च
५९ या वंध्या भवेद्दम्पतिवियोजनादिति वायुपुराणे ॥ स्रवद्गर्भा भवेत्सा तु बालकहंतिया विषैरिति वृद्धगौ
तमः ॥ नालर्घती च पुरुषो मृतवत्सः प्रजायत इति शातातपः ॥ एवं सति ॥ वंध्या च काकवंध्या च
स्त्री प्रसूश्च मृतप्रजा ॥ एवं चतुर्विधा वंध्या तस्याः शांतिकमीर्यते इति प्रक्रम्य विष्णुश्राद्धोपदे रा॰म॰
शाच्चतुर्विधवंध्यात्वनिकरणार्थं विष्णुश्राद्धस्य ॥ तत्र ॥ अर्वाक्तु ब्रह्महत्यायाः षडब्दं कृच्छ्रमा ५९
चरेदित्युक्त्वा षडब्दं । तदर्धं त्र्यब्दं । तदर्धं त्र्यब्दं । तदर्धं सार्धद्विवा कृत्वा तत्राप्यशक्तौ । कुर्या
दादौ च चांद्रं च चांद्रद्वयमथापि वा ॥ प्रायश्चित्तमिदं कृत्वा विष्णुः श्राद्धं समाचरेदित्युक्तेः ॥
चांद्रायणो चांद्रायणे वा यथाशक्ति पर्षदुपस्थानादिप्रकारेण गृहीत्वा मृत्तिकास्नानादि पं
चगव्यादिप्रकारेण च सांगं प्रायश्चित्तं विधाय पश्चाच्छ्राद्धमनुष्ठेत् तत्र रुद्रस्नानविधं वक्ष्य
इत्युपक्रम्य एतद्विधानपूर्वं तु विष्णुश्राद्धं समाचरेदित्युक्तेस्त्वादौ रुद्रस्नानं कार्यं तन्मल

मंत्रवाक्यानि । रुद्रस्नानविधिं वक्ष्ये दंपत्योश्च सुतार्थिनोः । कृष्णाष्टम्यां सुपौषे वा नवम्यां सुसमा
हितौ ॥ नानावर्णैर्धान्यपिष्टैः पद्ममष्टदलं लिखेत् ॥ विन्यस्य कलशानष्टौ दिक्ष्वष्टासु च सोदका
न् ॥ पुनरेकं पूर्वभागे कलशं विन्यसेत्ततः ॥ पद्मस्योपरि संविष्टौ दंपती प्राङ्मुखौ शुची ॥ अश्व
स्थाद्गजस्थानाद्वल्मीकात्संगमाद्ध्रदात् ॥ नद्या उभयकूलाच्च मृदमाहृत्य यत्नतः ॥ अपरित्यक्तव
स्त्रौ तु लिप्तगात्रौ च तया मृदा ॥ अच्छिद्रात्पर्कपत्राणि निधाय शतसप्तकं ॥ रुद्रस्नानं पुरा कृत्वा रु
द्ररूपाण्यपोनपेत् ॥ दिक्ष्वष्टस्वष्टरूपाणि नमे त्रीणि वै तथा ॥ रूपाण्येकादशैवं तु जप्त्वा तु नव
मे पुनः ॥ अष्टानां कलशानां तु उदकं शांतिदं क्षिपेत् ॥ तद्धारिणार्कपत्रेण दंपत्योश्चाभिषेचनं ॥
अर्कपत्रशतानां च सप्तानां त्याग इष्यते ॥ प्रत्येकं रुद्रमंत्रेण स्नायातां दंपती ततः ॥ सत्काष्ठवाणि
वस्त्राणि ततोन्यं शुक्लधारिणौ ॥ नम्रोह्याणि तु पूर्वाणि त्वाचार्यं पूजयेत्ततः ॥ पूजितां रुद्रमूर्तिं च
निष्क्रमानभित्तौ शुभौ ॥ सवाहनां सालंकृतामाचार्याय निवेदयेत् ॥ एतद्विधानपूर्वं तु विष्णुश्राद्धस
माचरेत् ॥ तस्य पविपुलाश्च चिरायुषः ॥ सुभगा धर्मशास्त्रज्ञा धार्मिष्ठाः सत्यवादिनः ॥ नदीसंग

मएवायं कर्त्तव्यस्त्वहितो विधिः॥ इति विष्णुश्राद्धं गरुडस्नानं॥ ॥अथ विष्णुश्राद्धपुराणतः॥ संक्षे
पतो वदाम्यहं॥ विशेषस्तु प्रयोगे वक्ष्यते॥ विष्णुधर्मोत्तरे॥ दाल्भ्य उवाच॥ केन कर्मविपाकेन स्त्रियं
५० ते शिशवः प्रभो गर्भादिः स्रवते तद्वदनपत्योपिजायते॥ श्रीभगवानुवाच॥ सम्यक्पृष्टं त्वया विप्र प्राणि
नां हितकाम्यया॥ तत्सर्वं कथयिष्यामि विस्तरेण महामुने॥ क्रूरवादरता ये च ये च ब्राह्मणनिंदकाः
॥ब्रह्मस्वहारिणः॥ क्रूरा वाग्दत्तस्यापहारकाः॥ अनाचाराः कृतघ्नाश्च अशस्त्रप्राणिघातकाः
परदाररता ये च सर्वधर्मबहिष्कृताः॥ मिथ्याभिशंसिनो ये च चोरकर्मरताश्च ये॥ ते सर्वे पापक राम: ५०
र्मिणः पतंति नरके ध्रुवं॥ पुनः पुनः समायांति दुःखं प्रति पापिनः॥ अल्पायुषोपिजायंते ये नरा न
रकागताः मुक्तास्ततः पतंती मं गर्भवासं पुनः पुनः॥ वंध्याः कुब्जाश्च विकृता विकलांगा नराधमाः
॥व्याधिताद्यादिरूपेण दृश्यंते घापिमानवे॥ दाल्भ्यः पापिनो ये त्वया प्रोक्तास्तेषां वै निष्कृतिं स्व
यं॥ कथयस्व महाभाग प्राणिनां हितकाम्यया॥ श्रीभगवान्॥ येन मुक्तिर्भवेत्तेषां पापिष्ठानां च
शाश्वती॥ कथयिष्याम्यहं विप्र विधानं तद्वसुव्रत॥ वंध्या च काकवंध्या च स्त्रीप्रसूश्च मृतप्रजा॥

एषा चतुर्विधा वंध्या तस्याः शांतिकर्मीर्यते ये हि षाण्गर्भसंभूता ये दोषा वीजिनस्तथा॥ ते सर्वे नाशमायां
ति विष्णुश्राद्धप्रसादतः॥ विष्णुश्राद्धं ततः कुर्याद्गंगानुष्ठाने पूर्वकं॥ अमावास्ये मासे कर्त्तव्यमथवे वा
हिकेषु वा॥ आत्मशुद्धिं ततः कुर्यात्सर्वपातकनाशिनी॥ तथा तस्याः प्रशांत्यर्थं प्रायश्चित्तमिहोच्यते॥
कुर्यात्प्राजापत्यकं चांद्रं द्वयमथापि वा॥ कार्यं धेनुसुवर्णेन यान्यतीर्थैः शांतियोज्या॥ व्युत्क्रमेण च
योजना॥ प्रायश्चित्तमिदं कृत्वा विष्णुश्राद्धं समाचरेत्॥ ॥इति बौधायनः प्राह शास्त्रोक्तं धर्मत
त्परः॥ ॥ ॥अष्टमी तु समाचरुद्रस्नानं समाचरेत्॥ एकादशी समासाद्य कृष्णपक्षस्य
वै तिथिं॥ उपोष्य तस्या कर्तव्यं विष्णुश्राद्धं विधानतः॥ आदौ मृदादिभिः स्नात्वा स्वगृह्योक्तविधा
नतः॥ देहशुद्धिं ततः कृत्वा कालतिथ्यादि संस्मरेत्॥ आत्मनो बहुसद्वृत्तदी घोडुःपुत्रलब्धये॥
गर्भदोषापहृतये विष्णुश्राद्धं समारभे॥ ततो नघादिपुस्नात्वा नित्यकर्म विधाय च॥ देवागारं समा
साद्य वक्ष्यीयात्सुप्रमंडपं॥ तदधस्तादुपाविश्य निशि संकल्पपूर्वकं॥ पश्चादाचार्यवरणं फ
लं दत्वेति मंत्रतः॥ फलमित्ति वस्त्रासनभाजना देरुपक्षणं॥ दृष्णुया छक्तिनम्नोः सभित्यनंतो

कल्पात्॥ गर्भस्थैर्बालिनारीभिः पीडितोस्मि द्विजाधिप॥ विष्णोः संपूजनं कृत्वा पूर्णांकुरमनोरथा
न्॥ इत्याचार्यं प्रति तामाद्य मंडपाधस्तु मंडले॥ मध्ये च तंडुलैः पूर्णं कलशं स्थापयेद्बुधः॥ वस्त्रयु
५९ ग्मेन संवेष्ट्य तस्मिन्नारुडवाहनं॥ रुक्मनिष्केण वार्धेन तदर्धेनापि शक्तितः॥ निर्मितं स्था
पयेत्तत्र सव्यदक्षिणतस्ततः॥ सप्तधान्यमितानाशीन्प्रत्येकं द्रोणसंमितान्॥ कृत्वा पुरुष
सूक्तेन विष्णुं संपूजयेत्ततः॥ उपचारैः षोडशभिरन्यैर्नामपदैः पृथक्॥ शूद्रः पुराणसूक्ते
नेति पौराणमंत्राणामुपलक्षणं॥ तत्रैव स्मृतिकाना वैदिकपौराणनाममंत्राणां समुच्चयः रामः
॥ शूद्राणां तु वैदिकव्यतिरिक्तो॥ पंचामृतेन संस्नाप्य पूजां कुर्याच्च जागरं॥ तिलमाषयवव्रीहि ५९
कंगुश्यामाकमुद्गकाः॥ सप्तधान्यमिति प्रोक्तं प्रत्येकं द्रोणसंमितं॥ ततः प्रभाते नचादौ स्ना
त्वा मंत्र्य द्विजान् शुचीन्॥ विष्णुभक्तिसमायुक्तान्सप्त पंच त्रयोपि वा॥ निमंत्रयामि यो विप्रा विष्णु
श्राद्धेक्षणाय भोः॥ भस्मीकुरुत तान्दोषान्बालेगर्भे च ये स्थिताः॥ अनेन मंत्र्य मंत्रेण दंडवत्प्रण
मेच्च तान्॥ कृत्वा नित्यक्रियां तद्वद्विष्ण्वादीनर्चयेत्ततः॥ आमं शरावं देवस्य पुरतः स्थापयेत्ततः

गोत्रान्वितं स्तत्र मंत्रेणावाहयेदिति॥ कृष्णवाहरता इत्यादि चौरकर्मरताश्च ये॥ ते सर्वे तुष्टिमायांतु
तृप्तिं तेषां करोम्यहं॥ इत्याहुतीनां गंधपुष्पैरक्षताभिस्ततोर्चयेत्॥ घृतदुग्धेन चाज्येन आमपात्रे
प्रपूजयेत्॥ तिलदर्भयुतं तोयं गृहीत्वा पूर्ववत्स्थितः॥ मंत्रात्तं याधरेहितान्स्ततो मंत्रमिमं पठेत्॥
येत्र पात्रे स्थिता जीवाः पापिष्ठा दुःखभागिनः॥ अन्नं तेभ्यो मया दत्तमुपतिष्ठंतु तृप्तये॥ इति सं
कल्प्य ततो यं करस्थं तत्र निक्षिपेत्॥ ततो होमं प्रकुर्वीत चरुणाज्यसमित्तिलैः॥ इदं विष्णुरि
मं मंत्रमुच्चार्याष्टोत्तरं शतं॥ प्रत्येकं होमकर्तृभ्यः शक्त्या देया च दक्षिणा॥ प्रत्येकमिति च वादि
भिः संबध्यते॥ इत्यादि कुर्ति विभायाथ श्राद्धकर्म समाचरेत्॥ एकोद्दिष्टविधानेन विष्णुरूपमनु
स्मरन्॥ ॥ अनेकनामगोत्राणां विष्णुश्राद्धाधिकारिणां॥ पितृणां विष्णुरूपाणामे
कोद्दिष्टविधानतः॥ ॥ विष्णुश्राद्धं करिष्येहमिति संकल्पमाचरेत्॥ उच्चार्य नाम गोत्रादि
एवं पाद्यादिषु क्रमात्॥ तद्वद्विभक्तिसहितं सर्वस्मिं श्राद्धकर्मणि॥ आसनं भाजनं छत्रं तत्थो
पानत्कमंडलुं॥ दद्याच्च श्राद्धभोक्तृभ्यो दक्षिणाद्यनादिकं॥ परितोषकरं दत्त्वा भोक्तृसंख्या

श्रवयेत्॥ पिंडाननुद्दिश्य तान्सामरान्मगोत्राविहन्मुचि॥ शर्करा घृतसंमिश्रांस्तिलपायससंमि
तान्॥ संपूर्णान्वाचयित्वा तान्ब्राह्मणान् श्रविसर्जयेत्॥ अत्र शेषं तु तत्सर्वं विप्रेभ्यः प्रतिपादये
त्॥ नार्जयेद्गाद्धभूमिं च आचार्यं पूजयेत्ततः॥ पाद्यार्घ्यगंधपुष्पाद्यैरुपचारैश्च शक्तितः॥
५२ वस्त्रालंकारसहितैस्तस्य हस्ते जलं क्षिपेत्॥ शिवाः संत्वापद्युक्त्वा कुर्याद्गोपूजनं ततः॥ स्व
र्णशृंगीं रौप्यखुरीं ताम्रपृष्ठीं सवत्सकां॥ रत्नपुच्छीं कांस्यदोहां सवस्त्रां कल्पयेत्ततः॥ अ
स्मै अमुकगोत्राय प्रवराय च शर्मणे॥ विप्राय गामिमां विष्णुदैवत्यां शक्तुपस्कृतां॥ विष्णुश्राद्धां
गभूतां ते च हंत अमुकगोत्रकः॥ तच्चीप्रवरशर्माहं चिरायुः पुत्रवृद्धये॥ सदक्षिणां संप्रदद राम:
इति मंत्रं ततः पठेत्॥ गावो मे अग्रतः संतु सा स्यहं॥ इति गां दक्षिणायुक्तां दत्वा मुं देवमर् ५२
चितं॥ स्वसखान्यं स्वकेशं गृहाणत्वं द्विजोत्तम॥ इति देवं निवेद्यास्मै दक्षिणां परितुष्टये
दक्षिणां तेन दद्देन मम मेति ततः पठेत्॥ मंत्रहीनं सुरेश्वर॥ श्राद्धं संपूर्णतां यातु प्रसादाद्भवतो
मम॥ पृष्ट्वा द्वंद्व यात्मावाचार्यं प्रणमेत्ततः॥ गृहीत्वा उमशरावं तद्दन्नपूर्णां नदीं व्रजेत्॥ जल

मध्ये जपेन्मंत्रान्कूटवादरताद्भति॥ विष्णुश्राद्धप्रसादेन सर्वे ते तारिता मया॥ उत्तमाम्यांतु ते लोका
न्यापंनस्यामले जले॥ जपित्वेति शरावं तत्सलिले स्थापयेत्तमः॥ शरावन्नाशपर्यंतं जले स्थि
त्वा सचैलकं॥ स्नात्वा यो तां वरं ध्यात्वा आगच्छेद्भवनं निजं॥ एवं यः कुरुते लोके विष्णुश्राद्धं हि मा
नवः॥ तस्य पुत्राः प्रजायंते सुशीलाश्च चिरायुषः॥ सुभगा धनसंपन्ना आग्निष्टोमस्य वा दिनरति
विष्णुश्राद्धपूर्वविचारः॥ ॥अथ प्रयोगः॥ एवं गालभगवसंवादयोप्यत्रार्थे प्रमाणम
स्तिविस्तारभयान्नलिख्यते॥ तत्र स इति कर्मण्यता॥ विशेषस्तु शाखांतराधिकरणन्यायेन प्र
योगे वक्ष्यते॥ ॥अथ प्रायश्चित्तग्रहणप्रकारपुरःसरं प्रयोगो लिख्यते॥ कस्मिंश्चिद्दिने द
पं शौचं चतुरस्त्रीनेकां वाध्यात्वा विष्णुं प्रवेश्य सचैलं स्नात्वा मौनी अभुंजानः क्लिन्नवासाः पर्वदं
मद्दक्षिणां कस्य हृदयेन द्यमानोऽवन्यां साष्टांगं प्रणमेत्॥ ततस्तैः किं ते कार्यमिति पृष्ट आदिपर्व
दध्येगोवृषयोप्रसंकं प्रयात्कायत्वेन यथाशक्ति स्वतारूप्ययो निर्विकृतदर्थं तदर्थे वा निर
धायवालानाशनावादिजन्यदुःखेनातिपीडितस्य मे चिकी॥ इति विष्णुश्राद्धाद्यविकार

सिद्ध्यर्थं प्राचीनापुत्रत्वादिनिदानदुरितनिरासार्थं। प्रायश्चित्तमुपदिश्य मामनुगृह्णन्तु
भवंतिपुनः प्रणमेत्। ततस्ते तमुत्सार्य तस्य शरीरद्रव्यादिशक्तिमुत्तममध्यमादिपक्षांश्च
५३ विचार्यास्मिन्पक्षेऽस्यायं शक्त इति निश्चित्य पुस्तकवाचनपूर्वकं कथयेयुः॥ सच पुस्तकपूजां
चंदनपुष्पादिभिर्विधाय सभ्यपूजां च विधाय निबंधपूजोत्तेन किंचिद्यथाशक्तिद्रव्यं निधाय
कृतांजलिपुटस्तिष्ठन्सभ्यास्तदुपादिष्टं शृणुयात्॥ सभ्योऽप्यष्टद्व्यष्टसार्धैकद्व्योत्तराय-
द्ध्यैकैकचांद्रायणेषु कंचन पक्षं शक्त्यनुसारेणोपदिशेयुः॥ सचोपदेश एकेन पर्षद्वृद्धे-
नस्य वानुमत्या ककार्यः॥ इदं ते प्रायश्चित्तं सांगेऽस्मिन्ननुष्ठिते कृतार्थो भविष्यसीति॥ प्र राम:
त्याम्नायाश्च होमगवो यथाशक्ति कल्पयेयुः॥ तत्र गायत्र्ययुतजपे तिलहोमस्स्त्रे द्वा ५३
दशब्राह्मणभोजने तीर्थयोजनयात्रा एकगोदाने सुवर्णरूप्यनिष्कतदर्धतत्पादानां शक्त्या
दाने स्रुक्केशस्य द्वादशस्नाने द्वादशब्राह्मणानामान्नदाने एकैकः प्राजापत्यः॥ तत्र
शक्तस्य द्रव्यमान्नयोर्द्विगुणत्रिगुणादियोज्यं॥ निष्कश्चलोकशास्त्रपरिमाषयोरेकवाक्यता

पामाषाश्चत्वारिंशत्॥४०॥ तदर्धं २० तदर्धं १० सुवर्णमुख्यं तद्दशांशो रजतं ग्राह्यं। एवं च निवे
दितं प्रायश्चित्तं भवदनुग्रह इत्यंगीकृत्य संमानपूर्वकं प्रणिपत्य विसर्जयेत्॥ अस्मिन्दिने उप
वासं कार्यः शक्तेनेति। इतरेण हविष्याशनं कार्यं॥ ततः कस्यांचित्तिथौ यो कृतमाध्याह्नि
कः सायाह्ने गंगादौ एवं गुणविशेषेण विशिष्टायां पुण्यतिथौ अनेकजन्मार्जितानपत्यादि
कारणीभूतप्रशमनार्थं करिष्यमाणविहितश्राद्धाधिकारसिद्ध्यर्थं अमुकं प्रायश्चित्तं यत्तु
मुकामुकप्रत्याम्नायेन यथाशक्ति करिष्ये तदादौ वपनं तथा वनस्पतिगोमयमृद्वारिपंचगव्य
स्नानानि पंचगव्यप्राशनादीनि तदंगामिच करिष्य इति च संकल्प्य॥ यानि कानि च पापानि
ब्रह्महत्यासमानि च। केशानाश्रित्य तिष्ठंति तस्मात्केशान्वपाम्यहमिति स्मृत्यक्तकल्प्याशिखक
क्षोपस्थवर्जं नखरोमाणि वापयित्वा द्वादशांगुलं दंतकाष्ठेन युवं लभिति मंत्रं पठित्वा दंतान्
शोधयेत्॥ वपनानि दोस्त्वद्विगुणं प्रायश्चित्तं। ततः स्नात्वा भस्मादि स्नानं कुर्यात्। तत्रायं प्र-
कारः॥ ईशानाय नम इति शिरसि। तत्पुरुषाय नम इति मुखे। अघोराय नम इति हृदये। वाम

देवायनम इतिमुखे। सद्योजातायनम इति पादयोः॥ प्रणवेन सर्वांगे॥ अग्निरिति भस्म। जल
मिः॥ स्थलमिति। वायुरिः व्योमेति भः सर्वंहवा इदं भस्मेति मंत्रैर्वा। इति भस्मस्नान॥ ॥अथ गोम
येन॥ गंधद्वारां॥ अग्रमग्रं चरंतीनामोषधीनां वने वने॥ तासां वृषभपत्नीनां पवित्रं कायशो
५४ धनं तन्मे रोगांश्च शोकांश्च नुद गोमय सर्वदेति मंत्रेण॥ ॥अथ मृत्तिकास्नानं॥ बलिस्था पर्व
तानमिति भूमिं प्राच्यं मानो रिषत् वनिते निरवनित्वा स्योना पृथिवीति मृदं गृहीत्वा आयने ते
परायण इति दूर्वां गृहीत्वा गायत्र्याभ्युक्ष्य भूमौ निधाय। चम्य मस्नानमहं ~~क्षिपेत्॥ [illegible]~~
करिष्य इति संकल्प्य मृदं कुशोदकेनाभ्युक्षेत्॥ ततो दिक्षु मृदं क्षिपेत्॥ त्रातारमिंद्रमिति पूर्व
स्यां॥ यमाय मकमत्तमिति दक्षिणाः तत्वा मीति पश्चात्॥ वयं सोमेत्युत्तरतः। तत्सूर्यमि
त्युपरिष्टात्॥ ततो मेपु॥ अक्षीभ्यां त इति मुखे। ग्रीवाभ्यस्त इति ग्रीवायां॥ आंत्रेभ्य इति हृद रामः
ये। नाभानाभिर्न आद्द इति नाभ्यां॥ त्वमिति बाह्वोः। हेमांतं स्वरणमिति कक्ष्योः। यः कुक्षि ५४
ष्वितकुक्षे॥ बद्धानां पेततिष्टे॥ ऊरुभ्यां त इत्यूर्वोः। मेहनाद्धरमिति जान्वोः॥ एतावानस्येति

पादयोः॥ यस्य विश्वानीते हस्तयोः॥ अंगादंगादित्यनेन पुरुषसूक्तेन च सर्वांगोद्वर्तनं कुर्यात्॥ एताव
त्पर्यन्ते अंगोद्वर्तनमात्रं॥ ततो ऽश्वक्रांत इत्यादिभिः सप्तभिः स दूर्वां मृदं रश्मि सिनिधाय मृत्ति
कास्थाने प्रक्षाल्य तीर्थं प्रार्थयेत्॥ ॐ हिरण्यशृंगं॥ यन्मया मनसा वाचा॥ इमं मे गंगे इदं
तेयाभिः॥ गंगा गंगेति॥ एवमादिपुराणमंत्रैः॥ स्तुमि त्वा नः॥ समुद्रज्येष्ठा इति चतसृभिः॥ ए
तो न्विंद्रमिति तिसृभिः॥ तत्सरमं इति सूक्तेन पावमानीभिः आपो हि ष्ठेति सूक्तेन मार्जनं
कृत्वा इमं मे गंगेति उदकमालोड्य आकृतं चेंतियचं जपेत्॥ इति शुद्धोदकस्नानं॥ अथ पंचग
व्यस्नानं॥ गायत्र्या गोमूत्रेण॥ गंधद्वारामिति॥ गोमयेन॥ आप्यायस्वेति क्षीरेण॥ दधिक्राव्
ण इति दध्ना॥ घृतं मिमिक्ष इति घृतेन। देवस्यत्वेति कुशोदकेन स्नानं कुर्यात्॥ देवस्य त्वेति
मंत्रेणाभिषिंचामीति वाक्यशेषः॥ एवं दशस्नानं निर्विधाय धौते वाससी परिधाय द्विराचम्य
त्रिर्न्योधिकानुगमनानात्त्राणा न्विष्ठ देशेन भोजयेत्॥ आमान्नं वा दद्यात्॥ इदमेव प्रायश्चि
त्तांगं विष्णुश्राद्धमिति समिधीयते॥ गवामंगेष्विति मंत्रेण आदिगोदानं प्रत्यक्षं। मौल्यमवा

दद्यात्॥ ततस्त्वाज्येन व्याहृतिभिरग्नौ पापहरं विष्णुमुद्दिश्याष्टोत्तरशतमष्टाविंशतिं वा जुहुयात्॥
ततः पंचगव्यं कार्यं॥ सुवर्णादिपात्रे पलाशादिपात्रे वा ताम्रायां गोमूत्रं त्रिपलं गायत्र्या प्रणवेनेना-
५५ ऽदद्यात् ततोंगुष्ठार्द्धपरिमितं श्वेताया गोमयं गंधद्वारामित्यादाय। ततः कपिलायाः पयः सप्तप-
लं आप्यायस्वेत्यादायात ततो नीलायाः सप्तपलमेव दधि क्रावा॥ इत्यादायात ततः कृष्णाया घृतं-
एकपलं घृतं मिमिक्ष इत्यादाय ततस्त्वेकपलं कुशोदकं आपो हि ष्ठेत्यादाय प्रणवेनालोड्य प्र-
णवेनैव यज्ञियकाष्ठेन निर्मथ्य प्रणवेनाग्नेः सप्तपत्रैर्हरितैः कुशैर्दशाहुतीर्जुहुयात्॥
तत्र मंत्राः इरावती धेनुमती स्वाहा। अग्नये इदं न मम॥ इदं विष्णुः विचक्रमे मानस्तोके रुद्रा- रामः
य ब्रह्म जज्ञानं ब्रह्मणे॥ भुवौ अग्नये स्वाहा। सोमाय स्वाहा॥ गायत्र्या सूर्याय॥ प्रण- ५५
वेन प्रजापतये॥ ॐ भूर्भुवः स्वः स्वाहा प्रजापतये॥ अग्नये स्विष्टकृते स्वाहेत्यंते हुत्वा॥ व्रत-
ग्रहणं करिष्य इति द्विजान्पृष्ट्वा तैः कुरुष्वेत्यनुज्ञातः प्रणवेन सर्वं पिबेत्॥ एतच्च नवा-
दितीरिया माद्य हिर्न सूत्र दर्शने कार्यं॥ गोमूत्रादिपरिमाणं यथाशक्तिः स्वहस्तेन वा ग्राह्यं॥ इ

ति पंचगव्यविधिः॥ एवं तत्स्नात्वा गृहमागत्य विष्णुं स्मरन्नेकोनीनिशामतिवाह्य प्रक्रांतं प्रायश्चित्तं-
विधाय उत्तरांगानि कुर्यात्॥ व्याहृतिभिस्सराज्यं पूर्ववद्धुत्वा पूर्ववत्पुनः प्रायश्चित्तांगनिस्तुश्रा-
द्धं कृत्वोत्तरपूर्ववत्को दानं चरेत्॥ ततो दशदानानि कुर्यात्॥ तानि च॥ गोभूतिलपापघ्नोमल-
मासमासशुक्रास्तादिवर्जिते शुभकाले वैधृतिकमासे पुण्यव्यतीपातादिदोषाभावे चंद्रता-
रादिबलान्विते सति कस्यांचित्कृष्णचतुर्दश्यां उक्तविधिना नदीस्नानं कृत्वा कृत्वैकादश्यां उप-
वासी नद्यादौ भस्म गोमयवारिभिः स्वगृह्योक्तविधिना स्नात्वा देहशुद्धिं विधाय नित्य-
कर्म कृत्वा गृहे देवालयमाश्रमं वा गत्वा तत्र पुष्पमंडपादि कृत्वा भस्मिस्सं मार्जनादि कृत्वा
निशि मंडपाध उपविष्टः सभार्यः प्राङ्मुखः शुचिः शुक्लवासाः स्वासनः सपवित्रकरः आ-
चमन प्राणायामपूर्वकं सकुशाक्षतजलहस्तः संकल्पं कुर्यात्॥ यथा॥ तिथ्यादिकं संकी-
र्त्य ॐ अद्य मम मानपत्यस्पन्नतापसत्वनिदानदुरितक्षयद्वारा अस्याश्च भार्यायाश्च ऋतुविघ-
वंध्यात्वान्यतरनिदानदुरितक्षयद्वारा तथा पूर्वजानां महापातकोपपातककुष्ठवादर

तिप्राणिहिंसापारदार्यमिथ्याभिशापशोकितघ्नतान्नानाचारानग्निसंस्कारादिनानापापैः पुनः
पुनर्गर्भवासगर्भवासगर्भपातात्स्यापुत्रादिनिदानदुरितक्षयद्वारा आकल्पाविच्छेदिदीर्घायुर्ब
५६ हुसुपुत्रासंततेराप्त्यर्थं यथाशक्ति यथाज्ञानं अनया भार्यया सह विष्णुश्राद्धमहं करिष्य इति सं
कल्प्य। ततः श्लोकं पठेत्॥ आत्मनो बहुसद्वृत्त दीर्घायुः पुत्रलब्धये॥ गर्भदोषापहत्यै विष्णुश्रा
द्धं समारभ इति॥ ततो निर्विघ्नतासिद्ध्यै गणपतिपूजनं गौर्यादिमातृकापूजनं पुण्याहवा
चनं वृद्धिश्राद्धं च कार्यं कर्मविपाकोक्तदानादिरिव कर्मविपाकनिवृत्त्यर्थत्वादिति केचित्॥
अन्ये तु आद्यारूपत्वात् गणपतिपूजनादि वृद्धिश्राद्धांतं नेच्छंति। आद्यः पक्ष एव बहुसंमतः राम:
आचारानुगमतश्च। ततः ॐ अद्य विष्णुश्राद्धे आचार्यवरणं करिष्य इति संकल्प्य सपत्नीक ५६
सपुत्रं वैदिकं शास्त्रज्ञं धार्मिकं कुटुंबिनं दरिद्रं दुःप्रतिग्रहनिवृत्तं सदाचारं प्रकृतकर्मविदि
नं ब्राह्मणं विष्णुश्राद्धे आचार्यकर्मकर्तुं त्वामहं प्रार्थये इति सविनयं प्रार्थयेत्॥ ततस्तेनांगी
कृते अमुकगोत्रोमुकशर्माहममुकगोत्रममुकशर्माणं विष्णुश्राद्धे आचार्यकर्मकर्तृत्वेन वृ

णे त्वां वस्त्रादिना वृणे इत्याचार्यं फलादिना वृणुयात्॥ ततः आचार्यस्त्वं यथा स्वर्ग इति मंत्रमुक्त्वा॥ गर्भ
दोषैर्बालिनाशैः पीडितोस्मि द्विजाधिप॥ विष्णोः संपूजनं कृत्वा पूर्णान् कुरु मनोरथान् इति तं प्रांज
लिः प्रार्थयेत्॥ ततो यथाशक्ति पाद्यगंधवस्त्रादिभिस्तं पूजयेत्॥ आचार्यस्तु मंडपाधस्तात् पंचव
र्णैरजोभिः षोडशारचक्रं सर्वतोभद्रमंडलं अष्टदलपद्मं स्वस्तिकं वा यथाशक्ति निर्माय सर्वतो
भद्रे ब्रह्मादिमंडलदेवताः पूजयित्वा तन्मध्ये यथाशक्ति धान्यराशौ स्वर्णरूप्यताम्रमृन्मया
न्यतमकलशमाकलशोभिति स्थापयित्वा तं तंदुलैः पूरयित्वा चंदनपुष्पमालादिभिस्तम
लंकृत्य वस्त्रयुग्मेन वेष्टयेत्॥ तदुपरि धातुमयं वंशनिर्मितं वा पात्रं तदुपरि वस्त्रं निदध्यात्
॥ तत्र चंदनकुंकुमादिरचिते अष्टदले निष्केण तदर्धेन तदर्धेन वा शक्त्या वा सुवर्णेन निर्मि
तं गरुडासनं विष्णुं सलक्ष्मीकं मंत्रमुक्तारणापूर्वकं स्थापयेत्॥ तस्य सव्यदक्षिणयोः पूर्ववद्धा
न्यराशिद्वये कलशद्वयं स्थापयित्वा पूर्ववत्तदुपरि दक्षिणे प्राग्वत्सुवर्णकृतं रुद्रं वामतश्च
तादृशमेव ब्रह्माणं स्थापयेत्॥ तेषां पुरतस्तिलमाषयवव्रीहिकंगुश्यामाकमुद्गरूपाणि

सत्यथान्यानि प्रत्येकं श्रेणामितानि यथाशक्ति वा राशीन्कुर्यात्॥ देवत्रयस्य समंत्रादीशेनादितः श्रु
द्धरमो प्रतिमासु तं दुत्ज्जुंजे पुनाक्रमेणैता देवताः स्थाप्य पूजयेत्॥ ध्रुवः॥ कश्यपः॥ मनुः॥ चंद्रभानुः॥
५७ प्रियव्रतः॥ नाभिः॥ स्कंदः॥ बलिः॥ व्यासः॥ स्वयंभुः॥ औशनसः॥ क्रतुः॥ दक्षप्रजापतिः॥ भीष्मः॥ कपिलः
शबलः॥ अर्जुनः॥ पुलस्त्यः॥ पुलहः॥ अगस्त्यः॥ वसिष्ठः॥ आर्ष्टिषेणः॥ रुक्मांगदः॥ भरतः॥ धौम्यः॥ सु
नंदः॥ नंदवर्धनः॥ प्रह्लादः॥ नारदः॥ वैन्यः॥ नंदनः॥ वायुनंदनः॥ विष्वक्सेनः॥ जयः॥ भद्रः॥ सुग्रीवः॥ वि
भीषणः॥ ३७॥ पूर्वादिश्रु इंद्रादीन्लोकपालान्॥ उत्तरतो दुर्गां॥ दक्षे च क्षेत्राधिपं॥ गणपतिं चे
ति॥ एतेन स्थाप्या वा॥ विष्णोः पुरतो गरुडं स्थापयेत्॥ एवं स्थापितानां विष्ण्वादीनां स्वशा राम: ५७
खोक्तमंत्रेण प्रतिष्ठां कुर्यात्॥ अथ ध्यानं॥ नमस्कृत्य महाविष्णुं स्वस्मरेत् क्षीरसागरं॥ क्षीरसा
गरमध्यस्थं श्वेतद्वीपं विचिंतयेत्॥ कोटियोजनविस्तीर्णं भानुकोटिसमप्रभं॥ तन्मध्ये तु
महादिव्यं प्रसादं रत्ननिर्मितं॥ प्रासादमध्ये चंद्राभं सिंहासनमनुत्तमं॥ तस्योपरि महानाग
शेषाख्यं मणिमंडितं॥ तदासने महाविष्णुं तत्फणव्याप्तमस्तकं॥ वेदस्तौस्तूयमानं नौरत्नवि

विभूषितं॥ घननीलतनुं देवं मरीचिगणसेवितं॥ तृणादिब्रह्मपर्यंतविश्वगं विश्वसाक्षिणं॥ चराचरगुरुं दे
वं चंद्रस्याभं चतुर्भुजं॥ ब्रह्माद्यैरर्चितं विश्वं स्वयं निरतामुषितं॥ एवं ध्यायेन्महाविष्णुं गदाब्जारिसंश
खकं॥ वामभागे स्थितं देवी नीलकुंचितमूर्धजां॥ हेमारविंदप्रतिमां मौक्तिकाभरणोज्ज्वलां॥ दाडि
मं सव्यहस्ते तु दक्षिणेनालिंग्य संस्थितां॥ श्रीविष्णुचाभिमुखां ध्यायेत्सत्काभीष्टफलप्रदां॥ इदं ध्यानं
कृतं येन यथा भीष्मो भवद्धरः॥ यथा दृष्यात्मा जोजिष्णुस्तथा पुत्रो भवेदिति॥ ॥अथ षोडशोप
चारपूजा॥ षोडशर्चस्य पुरुषसूक्तस्य नारायण ऋषिः॥ पुरुषो देवता॥ आद्यानां पंचदशानामनुष्टु
प्छंदः॥ अंत्यायास्त्रिष्टुप्छंदः॥ षोडशोपचारपूजायां विनियोगः॥ अथ न्यासः॥ सहस्रशीर्षेति वामक
रे न्यसेत्॥ पुरुष एवेति दक्षिणकरे॥ एतावानस्येति वामपादे॥ त्रिपादूर्ध्व इति दक्षिणजानौ॥ ॥
तं यज्ञमिति वामकट्यां॥ तस्मात्सर्वहुत इति दक्षिणकट्यां॥ तस्माद्धुतेऋच इति नाभौ॥ तस्मादश्वार
ति हृदये॥ यत्पुरुषमिति कंठे॥ ब्राह्मणोस्येति वामबाहौ॥ चंद्रमा इति दक्षिणबाहौ॥ नाभ्या आर
स्ये मुखे॥ सप्तास्येति नेत्रयोः॥ यज्ञेनेति मूर्ध्नि॥ अथ पंचांगन्यासः॥ ब्राह्मणोस्येति हृदयाय

नमः॥ चंद्रमा मनसो इति शिरसे स्वाहा॥ नाभ्या इति शिखायै वौषट्॥ सप्तास्येति कवचाय हुं॥ य
ज्ञेन नेत्रत्रयाय फट्॥ ॐ सहस्रशीर्षा॥ आगच्छ भगवन्निह प्रभो स्थाने चात्र सुरैः सह॥ यावत्कर्मसमा
५८ प्येत तावत्त्वं संनिधौ भव॥ आवाहनं॥ पुरुष एव॥ शेषमंचमहदिव्यरूपम॥ मणिसहस्रकं।
कोटिसूर्यप्रतीकाशं गृहाणासनमीश्वरं॥ आसनं॥ एतावानस्य। नमस्ते पद्मजाराध्य नम
स्ते विश्ववंदित॥ पाद्यं गृहाण देवेश घननीलप्रभाकर॥ पाद्यं। त्रिपादूर्ध्वः। रामकृष्णाय दे
वाय क्षीराब्धिशायिताय च॥ इदमर्घ्यं मया दत्तं ब्रह्मलोसहिताय च॥ अर्घ्यं॥ तस्माद्विराट। सु
वर्णकलशेनैवाचमनं कुरु केशव॥ पद्महस्तधरो देव कृपालो जगदीश्वर॥ आचमनं॥ अर्घ्य रामः
चामृतस्नानं॥ आप्यायस्व गौतमः पयो गायत्री। क्षीरस्नाने विनियोगः॥ ॐ आप्यायस्व। चं ५८
दनादि पंचोपचारैः संपूज्य ॐ भूर्भुवः स्वरिति पूजामपसार्य॥ दधिक्राव्णो वामदेवो दध्यनुष्टु
प्॥ दधिस्नानं॰। ॐ दधिक्राव्णः। पंचोपचारादि। घृतं मिमिक्षे गृत्समदो घृतं त्रिष्टुप्॥ घृतस्ना
नं। घृतं मिमिक्षे पंचोपचारादि मधु वाता गौतमो मधु गायत्री मधुस्नाने वि॰। ॐ मधु वाता। पंचो

पचाराः। स्वादुः पवस्व वेनः शर्करा जगती। शर्करास्नानं॰। ॐ स्वादुः पवस्व। पंचोपचारादि। यत्पुरुषेण।
गंगा च यमुना चैव कृष्णा भीमरथी तथा॥ एतासां पुण्यतोयेन स्नानं कुरु कृपार्णव॥ पुरुष
सूक्तादिना शुद्धोदकस्नानं॥ आचमनं दत्वा॥ तं यज्ञं। यज्ञोपवीतं परमं पवित्रं कर्मसाधनं। गृ
हाण पुंडरीकाक्ष मया तुभ्यं समर्पितं॥ यज्ञोपवीतं परमं। यज्ञोपवीतं॥ तस्माद्यज्ञात्। पीतं
वासो जगन्नाथ पीतांबरधराव्यय॥ गृहाण देवदेवेश श्रमया सहितो नघ॥ वस्त्रं॥ तस्माद्यज्ञा
त्। मुद्रिकासमलंकारैरंगदेवाहुभूषणैः। सहितं चंद्रनेकृष्णसंभरतात् गृहाण मे॥ गंधं।
अलंकाराश्च। तस्मादश्वाः। चंपकैर्बकुलैर्नागैः पुन्नागैः कनकैर्दलैः
। शतपत्रैर्मल्लिकाभिः पूजये जगदीश्वरं॥ माल्यं। यत्पुरुषं। वनस्पतिरसो दिव्यो गंधाढ्यः
सुमनोहरः आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यतां॥ धूपं। ब्राह्मणोस्य॥ कोटिभानुप्रतीका
शो विधुज्योतिः प्रकाशकः। अनेकरत्नसंकाशो दीपोयं प्रतिगृह्यतां॥ दीपं॥ चंद्रमाः। शर्करा खंड
पक्वान्नं दधि क्षीर घृतानि च। षड्रसं भक्ष्यसंयुक्तं नैवेद्यं प्रतिगृह्यतां। नैवेद्यं॥ आचम

न दत्वा॥ नाभ्या आसीत्॥ नारिकेलं खर्जूरं द्राक्षाचूतफलादिकं कदल्यादिफलं तुभ्यं दत्तं श्रीपु
रुषोत्तम॥ फलं॥ सहस्रास्यास्यन्॥ पूगीफलं महादिव्यं नागवल्लीदलैर्युतं॥ कर्पूरैलासमायुक्तं तां
५९ बूलं प्रतिगृह्यतां॥ तांबूलं॥ यज्ञेन॥ हिरण्यगर्भ इति दक्षिणां॥ श्रियेजात इति नीराजनं॥ कृष्णा
य रामभद्राय जगन्नाथाय चक्रिणे॥ प्रणतक्लेशनाशाय गोविंदाय नमो नम इति वेदमंत्रैः
पुष्पांजलिं॥ नारायणः सहस्राक्षं नरकार्णवतारणं॥ वंदे तं जगदात्मानं वासुदेवं सनातनं
॥साष्टांगनमस्कारः॥ कृष्ण कृष्णेति कृष्णेति कृष्ण राम हरेऽच्युतः॥ प्रदक्षिणा कृता तस्य तुष्टस्त्वं
भव याम्य वा प्रदक्षिणा॥ गोपिताजने नाथ चामरेण तपत्रः॥ ॥गांधर्वगीतवाद्येन प्रीतो भ रामः
व रमाप्रिय॥ ॥व्यंजनादि॥ कृष्णाय गोकुलेशाय वंशवृद्धिकराय च॥ ॥यशोदानंदभद्रा ५९
य नमोस्तु गुणसिंधवे॥ सुतानंदि सुतानंदि त्वं पूजा कृतपुण्यतः॥ वासुदेव जगन्नाथ कृपा
लो भक्तवत्सल॥ प्रार्थना॥ ततो दक्षिणकलशोपरि त्र्यंबकमंत्रेण पूजयेत्॥ सव्यक-

लशोपरि ब्रह्मजज्ञानमिति ब्रह्माणं षोडशोपचारैः पूजयेत्॥ आमं मन्मयं शरावं देवसान्निध्यौ॥ दर्भाकु-
शोपरि निदध्यात्॥ एवं सपरिवारं संपूज्य ब्रह्मविष्णुरुद्रसूक्तैर्जपेन वा मनसूक्तोपनिषज्जपेन पुरा
णेतिहासश्रवणेन नृत्यगीतादिना च पुंदिनो देवस्य पुंदिदेवस्य पुरतो रात्रिंजागरणेति वाहर-
येत् तथा॥ पौरुषपावमानं च॥ न तमंहइतीतिचास्य कृजोत्त्वा स्यवासीयं मुच्यते ब्रह्महत्यायाः॥
इमी तीति रतिवाइ इति मे मनरत्यादि॥ शेषं पुरुषसूक्तादि ऋग्वेदे प्रसिद्धं॥ एवं प्रजागर्य प्रातर्न
द्यादौ यथाविधि स्नात्वा स सपंचगव्यीन्वा शत्रया विष्णुभक्तो शुची सपुत्रां दाक्षी यलक्षणसंपन्ना
न्ब्राह्मणा द्वादशविधिनानि मंत्रयेत् तीरत यथा॥ कृता पूस व्यो दक्षिणास्यो दक्षिणां जान्वाच्यामु
क गोत्र मनुक शर्माणं विष्णुश्राद्धे लामहं निमंत्रयेइति॥ एवं सर्वब्राह्मणेषु॥ ततः निमंत्रयामि
नो विप्रा विष्णुश्राद्ध क्षणमयौ भोः॥ भस्मीकुरु॥ ततांन्दो न्वोलेमे गेचयेस्थिता इति पठि
त्वा साष्टांगं प्रणमेत्॥ ततः कृतनित्यक्रियः शादशौ द्विजैः सह पूर्वस्थापितान्विष्णुदीन्स-
विस्तारं पूजयेत्॥ ततस्तच्छरावं विष्णुवर्गे कुशोपरिस्थापयित्वा तत्र सतिलदर्भैर्नामगोत्रा-

६० ।न्यस्तनावाहयेदेतैर्मंत्रैः।। कूटवादरता ये च ब्राह्मणाः निंदकाः।। ब्रह्मस्वहारिणः क्रूरा वाग्दत्त
स्यापहारकाः।। परदाररता ये च सर्वधर्मबहिष्कृताः।। मिथ्याभिशंसिनो ये च चौर्यकर्मणि
ये रताः। पुनः पुनर्मृतिं प्राप्य ये गर्भे संचरंति हि। ते सर्वे तुष्टिमायांतु तृप्तिं तेषां करोम्यहं।। र
त्नाहूयतानां च पुष्पाक्षतधूपदीपादिभिरर्चयित्वा घृतद्रुतेनान्नेन पायसेन च तदा मश
रावप्रपूर्य तिलदर्भयुतं तोयं गृहीत्वा कूटवादरता ये चेत्यादीन् संचरंति हीत्येतान्मंत्रान्
दिर्त्वशुमंत्रं पठेत्।। ये च पात्रे स्थिता जीवाः पापिष्टा दुःखभागिनः।। अन्नं तेभ्यो मया दत्तमु
पतिष्ठतु तृप्तये।। इत्युच्चार्य करस्थतोयं पात्रस्थान्नोपरि क्षिपेत्।। ततो देवस्थापनदे राम: ६०
शास्वग्निमंतमाचार्यः स्वगृह्योक्तविधिनाग्निं प्रतिष्ठाप्यान्वाधाय पात्रासादनादि प्र
णीताप्रणयनांतं कृत्वा तूष्णीं निरुप्य प्रोक्ष्य च चरुं श्रपयित्वाज्यसंस्कारादि कृत्वा यजमा
नेन होमार्थं द्रव्यस्य त्यागे कृते इध्माधानाद्याज्यभागांतं कुर्यात्।। ततः श्ररणाच्च
त्यमभिघारितेनाज्येन च प्रतिद्रव्यमिदं विष्णुरिति मंत्रेणाष्टोत्तरसहस्रमष्टोत्तरशतं

ना विंशतिं वा जुहुयात्।। ततो रुद्राय त्र्यंबकमंत्रेण ब्रह्मणे ब्रह्मजज्ञानमिति मंत्रेण विष्णुनोन्यूना
मिष्टोत्तरशतसंख्याभिरष्टाविंशतिसंख्याभिर्वा चार्वाज्याहुतीर्जुहुयात्।। यह मरवोक्तादि
त्यादिद्वात्रिंश~~तिसंख्याभिर्वा~~च देवेभ्योपि विष्णुहोमात्पूर्वं यथाशक्ति केचिदत्र होमभि
च्छंति।। ततः स्विष्टकृदादि होमादिकं कृत्वा पूर्णाहुतिं च हुत्वा प्रणीतामोक्षणादि शेषं कर्म समा
पयेत्।। आचार्यस्यैतावद्धोमकरणाशक्तौ तत्सहायार्थमन्ये विनियोक्तव्याः।। ततो होम
कर्तृभ्य आचार्यादिभ्यः शक्त्या दक्षिणां दद्यात्।। अथ स्नुचिराचांतो यजमानः कृतपूर्व
दिकाले प्राणानायम्य ॐ अद्येत्यादि मम मृतापत्यत्वादिनिदानभूतदुरितक्षयद्वारा दी
र्घायुः सुगुणपुत्रादिसंतत्यवाप्तये नानागोत्राणां नानाशर्मणां विष्णुश्राद्धभागिकारिणां
विष्णुरूपाणां पितृणामेकोद्दिष्टविधानेन विष्णुश्राद्धमहं करिष्ये इति संकल्प्य सप्तभिः पंच
भिस्त्रिभिर्वा ब्राह्मणैः शक्त्या स्वगृह्योक्तविधिना श्राद्धमाचरेद्यजमानः।। एकोद्दिष्टविधा
नाद्देवस्थानावाहनाग्नौकरणानि न संति। तिलैरेवापसव्येनैव कार्यं।। उदङ्मुखाएव

विप्राः॥ एकपवित्रकाणि प्रसंख्यया अर्घ्याः पाद्यादौ नानागोत्राणां नानाशर्माणो विष्णुश्राद्धा
धिकारिणो विष्णुरूपाः पितर इत्येवं सर्वत्र तत्तद्विभक्तिभिर्निर्देशः कार्यः॥ आसनगंध
६२ पुष्पधूपदीपाच्छादनयुग्मभोजनभाजनजलभाजनछत्रोपानद्युग्मव्यजनादीनि श
य्यादेयानि। अन्यदपि परितोषकरं हस्तमात्रादिसोमाहं देयं॥ ततो घृतशर्करापायसतिल
संयुतेनान्नेन नानागोत्रान्सिद्धानुद्दिश्य मोक्षो ब्राह्मणसंख्योक्तस्वगृह्योक्तविधिना पिंडान्
बर्हिषि विष्णुं स्मरन्दद्यात्॥ ततः पौराणमंत्रैः पिंडदानं। विद्यन्ति दंष्ट्रिभिश्चैव विषचारिदवा नानः ६२
ग्निभिः शास्त्रास्त्रैर्दंष्ट्रपार्श्वतीर्णैः खगैः ग्रहैः॥ कुष्ठापस्मारभूतादिज्वलोदरभगंदरैः॥ गंडमा
ला पांडुरोगैः क्षयाशोभिर्मृताश्च ये। बंदीगृहे मृता ये च चोरव्याघ्रादिभिर्हताः॥ चंडौडाले
निहता मार्गेभिः शौचाः शयने मृताः ब्रह्मस्वहारिणो ये च सुरायाः स्वर्णहारिणः॥ गुरुदाररता
मृता परदाररताश्च ये॥ भ्रूणब्रह्मवधोपेता ये केचात्महनो जनाः॥ तिर्यग्योनिषु ये जाता तारस्ति
र्यग्जास्त्वन्यजन्मनि॥ तेषां पिंडो मया दत्त अक्षय्यमुपतिष्ठतु॥१॥ पितृवंशे मृता ये च मा

तृवंशे च ये मृता॥ गुरुश्वसुरबंधूनां ये चान्ये बांधवा मृताः। ये मे कुले लुप्तपिंडाः पुत्रदारविवर्जिता॥
क्रियालोपगताश्चैव जात्यंधाः पंगवस्तथा॥ विरूपा आमगर्भाश्च ज्ञाताज्ञाताः कुले मम॥ मया दत्तेन पिंडेन
ते तृप्तिं यांति च ते गतिं॥२॥ अस्मिँल्लो ये मम अवंशजाता मातुस्तथा वंशभवा मदीयाः॥ ॥ ॥ ॥
वंशद्वये ये मम दासभृत्यास्तथैवाश्रितसेवकाश्च॥ मित्राणि सख्याः पशवश्च वृक्षाः स्पृष्टाश्च दृ
ष्टाश्च कृतोपकाराः॥ जन्मांतरे ये मम संगताश्च ये तेभ्यः स्वधा पिंडमहं ददामि॥३॥ अजातदंता ये केचि
द्ये च गर्भे प्रपीडिताः। तेषामुद्धरणार्थाय इमं पिंडं ददाम्यहं॥४॥ बंधुवर्गाश्च ये केचिन्नामगोत्रविव
र्जिताः। स्वगोत्रे परगोत्रे वा तेभ्यः पिंडं ददाम्यहं॥५॥ उद्बंधनमृता ये च विषशस्त्रहताश्च ये॥ स्त्रीभिर्दं
ष्ट्रिभिर्व्यापितेभ्यः॥६॥ अग्निदाहेमृता ये च सिंहव्याघ्रहताश्च ये॥ आत्मनो ये च तेभ्यः॥७॥ अग्निदग्धा पतितेषु
श्च ये केचिन्नाग्निदग्धास्तथापरे॥ विद्युच्चोरहता ये च तेभ्यः॥८॥ रौरवे चांधतामिस्रे कालसूत्रे च ये
गताः। तेषां०॥९॥ असिपत्रवने घोरे कुंभीपाके च ये गताः॥ तेषां०॥१०॥ अनेकयातनासंस्था मृताः प्रे
तेषु ये गताः॥ तेषां॥११॥ असंख्ययातनासंस्था ये नीता यमकिंकरैः॥१२॥ पशुयोनिगता ये च पक्षि

कीटरूपाः ॥ अथवा वृक्षयोनिस्थास्तेभ्य० ॥ २३ ॥ अन्यैर्दुर्मरणैर्ये च क्षुधया तृषया मृताः ॥ भूतप्रेत
पिशाचाश्च तेभ्यः ॥ २४ ॥ दिव्यंतरिक्षभूमिष्ठाः पितरो बांधवादयः ॥ ते सर्वे तृप्तिमायांतु पिंडेनानेन
६२ सर्वदा ॥ २५ ॥ जात्यंतरसहस्राणि भ्रमंते स्वेच्छकर्मणा ॥ मानुष्यं दुर्लभं येषां ते० ॥ २६ ॥ ये केचित्प्रेत
रूपेण वर्त्तंते पितरो मम ॥ ते सर्वे तृप्तिमायांतु पिंडेनानेन सर्वदा ॥ २७ ॥ केचिदाद्येनैव त्रीन्
श्लोकान् पिंडानाहुः ॥ एवं पिंडान्दत्वा श्राद्धशेषं समापयेच्च शास्त्रवं ॥ श्राद्धदक्षिणां च विशिष्टां दद्यात् ॥
अन्नशेषं श्राद्धीयब्राह्मणेभ्यस्तदनुज्ञया अन्येभ्यो पि वा प्रतिपादयेत् ॥ ततो यत्किंचिन्न्यूनाति राम:
रिक्तं विष्णुश्राद्धं तत्संपूर्णमस्त्विति ब्राह्मणानुक्त्वा अस्तु संपूर्णमिति तैः श्राद्धसंपूर्णतां वाच- ६२
यित्वा केशिता भवंति इत्यादि सानुनयं तान्विसर्जयेत् ॥ ततः श्राद्धभूमौ संमार्जनलेपने कृत्वा ॐ अद्ये
त्यादि विष्णुश्राद्धांगतया आचार्यपूजनमहं करिष्ये इति संकल्प्योदङ्मुखः प्राङ्मुखमाचार्यं
पाद्यार्घ्यगंधपुष्पधूपदीपवस्त्रालंकारैः पूजयित्वा शिवा आपः संत्वित्यादि तद्धस्ते जलादि दत्वा
स्वर्णशृंगां रौप्यखुरीं ताम्रपृष्ठीं रत्नपुच्छां कांस्यदोहां सवस्त्रां बहुदुग्धवतीं गंधपुष्पादिनार्चि-

त्वा देशकालौ स्मृत्वा अमुकगोत्राय अमुकवेदाध्यायिने ऽमुकशर्मणे आचार्याय विष्णुदेवतां यथाशक्त्यु-
पस्कारसहितां सदक्षिणां विष्णुश्राद्धांगतः तथाऽमुकगोत्रोऽमुकशर्माहं संप्रददे न मम इति सजल
कुशं दद्यात् स्वं ग्राहयेत्तेन ॥ गावो मे ऽग्रत इति मंत्रं पठेत् ॥ ॐ स्वस्तीत्युक्त्वा कामस्तु इति पठेदाचार्यः
॥ ततो गंधाद्युपचारैर्विष्ण्वादीनां पूजां कृत्वा पुष्पांजलिं दत्वा आयुष्मत्सुशीलपुत्रादिसंततिर्मे
यास्त्विति प्रार्थयित्वा ॥ ॐ अद्येत्यादि देशकालौ संकीर्त्य सप्तधान्यकलशाद्युपस्कारसहिता
विष्णुब्रह्मशिवप्रतिमाः म ॥ आचार्याय अहं प्रतिपादये इति प्रतिपाद्य कर्मणि संगतासिद्ध
ये ॥ यथाशक्ति सुवर्णं हिरण्यात्यंबरसो धान्यगुडानि च ॥ रौप्यं लवणमित्याहुर्दशदानान्य
नुक्रमात् ॥ तत्र गवां मंगो क्षितिगोदानं ॥ भूम्यां तु ॥ सर्वभूताश्रया भूमिर्वराहेण समुद्धृता ॥ अनंतस
स्यफलदा अतः शांतिं प्रयच्छ मे इति ॥ तिलेषु ॥ महर्षेर्गोत्रसंभूताः कश्यपस्य तिलाः स्मृताः ॥ तस्मादेषां
प्रदानेन मम पापं व्यपोहतु ॥ हिरण्यगर्भगर्भस्थमिति हिरण्यस्य ॥ आज्ये ॥ कामधेनुषु संभूतं
सर्वक्रतुषु संस्थितं ॥ देवानामाज्यमाहारमतः० ॥ वस्त्रे तु ॥ शरणं सर्वलोकानां लज्जाया रक्षणं परं ॥

सुवेषधारिवस्त्रंत्वमतः॥धान्योसर्वतृप्तिकरंमहत्॥प्राणिनांजीवनोपायमतः॥३॥यथादेवेषुवि
ष्वात्माप्रवरश्चजनार्दनः॥सामवेदस्तुवेदानांमहादेवस्तुयोगिनां॥प्रणवःसर्वमंत्राणांनारीणां
६३ पार्वतीयथा॥तथारसानांप्रवरःसदैवेक्षुरसोमतः॥ममतस्मात्परांलक्ष्मींददस्वगुडसर्वदेति॥
रजतेतु॥प्रीतिर्यतःपितॄणांचविष्णुशंकरयोःसदा॥शिवनेत्रोद्भवंरूप्यमतः॥लवणोयस्माद
न्नरसाःसर्वेनोत्कृष्टालवणंविना॥शंभोःप्रीतिकरंनित्यमतः॥इतिदशदानानिविधायमंत्रहीना
मित्युक्त्वाविष्णुंस्मरेत्॥एतानिदशदानानिसभ्येभ्यएवात्ततोयन्मयाकृतंअमुकप्रायश्चित्तमच्छि
द्रमस्त्वितिभवंतोब्रुवंतुब्राह्मणा॥अच्छिद्रमस्त्वितिवदेयुः॥व्रतच्छिद्रंतपश्छिद्रंयच्छिद्रंयज्ञकर्म रामः
णि॥सर्वंभवतुतेच्छिद्रंयस्यचेच्छंतियेद्विजाः इतिब्रूयुः॥ततःप्रणम्यकरिष्यमाणेकर्मणिनि ६३
र्विघ्नमस्त्वितिप्रार्थ्यद्विजाशिषोगृह्णीयात्॥ ॥नत्वानारायणंशांतंसच्चिदानंदविग्रहं॥
विष्णुश्राद्धस्तुतत्फलेप्रयोगंवच्मिसत्कृतिभिः॥पूर्वोक्तविधिनाप्रायश्चित्तंयथाशक्तिकृत्वासंजात
सं कल्पपूर्वकंदक्षिणांदत्वानममेतिवदेत्॥विप्रोस्वास्तीत्यादिवदेत्॥ततःमंत्रहीनंक्रियाहीनं

द्विजोत्तम॥श्राद्धंसंपूर्णतांयातुप्रसादाद्भवतोममेत्युक्त्वादंडवन्नमानाचार्यंप्रणम्यतदीयांसुपुत्रा
शिषोगृहीत्वासविनयंविसृजेत्॥ततःपूर्वस्थापितमन्नपूर्णमामशरावंगृहीत्वानद्यादितीर्थे
जलाशयंगत्वानाभिमात्रेजलेसभार्यःशरावहस्तःसन्मंत्रान्पठेत्॥कूटवादरतायेचयेचब्रा
ह्मणनिंदकाः॥ब्रह्मस्वहारिणःक्रूराःवाग्दत्तस्यापहारकाः॥परदाररतायेचसर्वधर्मबहि
ष्कृताः॥मिथ्याभिशंसिनोयेचचौर्यकर्मणियेरताः॥पुनःपुनर्मतिंप्राप्ययेगर्भेसंचरंतिहि॥
विष्णुश्राद्धप्रसादेनतेसर्वेतारितामया॥उत्तमान्यांतुतेलोकान्॥पात्रंन्यस्यामलेजले॥इतिमं
त्रंपठित्वानाभिमात्रेजलेतच्छरावंस्थापयित्वाशरावनाशपर्यंतंजलेस्थित्वासचैलस्नात्वास
पत्नीकोधौतांबरधृत्तिलकादिधृत्वास्वभवनमागच्छेत्॥ ॥ततोब्राह्मणेभ्योदीनानाथेभ्य
श्चयथोत्साहं॥ ॥भूरिदक्षिणांदत्वाअन्नदानादिकृत्वाब्राह्मणाशिषोगृहीत्वासुहृन्मित्रादि
युतःसपत्नीकोभुंक्त्वातस्मिन्दिनेब्रह्मचर्यादियुतोनयेत्॥इति॥एवमनुष्ठानंयःकुर्मोलेहाएवंयःकु
रुतेलोकेविष्णुश्राद्धंहिमानवः॥तस्यपुत्राःप्रजायंतेसुशीलाश्चचिरायुषः॥सुभगाधनसंपन्नाधा

।मिश्राः सत्संवादिनः इति॥ ॥इति श्रीरामेश्वरभट्टसुतनारायणभट्टविरचिता विष्णुश्राद्धपद्धतिः॥ स
माप्ता॥ ॥ जीवत्पितृकस्य विष्णुश्राद्धे अधिकारो नास्ति यतः जीवतः पितुरिति स्मरणात् तत
६४ स्मान्मृतपितृकस्यैवात्राधिकार इति सिद्धं॥ नारायणपदयुगले भक्तिमता श्रीमदनंतेन॥ अनेने-
रिव विष्णुश्राद्धविधिः स्वार्थं परार्थं च सुज्ञेन॥ ॥अथाश्वत्थपूजाविधानमालायां। यस्य स्त्री स्त्री
प्रसूर्न्निंद्यमृतापत्या गुरुवारे प्रदोषे च सायं विधिमुपास्य च। स भार्यः पिप्पलं गत्वा प्रार्थयेत्सुसमाहितः
॥प्रार्थनामंत्रः॥ एहि दुःखमहावृक्ष महापापनिवारण। नारायणस्वरूपस्त्वं ह्यस्माकं कुरु जगत्पते॥
इति संप्रार्थ्य तं वृक्षं कृत्वा चैव प्रदक्षिणं॥ आलवाले जलं क्षिप्त्वा ततः स्वगृहं याव्रजेत्॥ ब्र रामः
ह्मचारी स्वपेद्रात्रौ सुप्त्वा भुवि हरिं स्मरेत्। निधाय तुलसीदाम कंठे मुद्रितलोचनः॥ ततः प्रातः ६४
समुत्थाय स्नात्वा गंगाजले तिलैः॥ गच्छेतां दंपती वस्त्राण्विप्पलांतिकमादरात्॥ चिह्नेनोर्ध्वमस
हस्रं च जपेत्तत्र समाहितः॥ कुर्यात्सं मार्जनं तत्र साज्यमंत्रात्तरोरथः विकीर्य तत्र पुष्पाणि चंद
नं च विशेषतः॥ कुंकुमं केसरं चैव पिप्पलांगे विलेपयेत्॥ आलवाले क्षिपेद्वारि क्षीरं दधिघृतं-

मधु। अत्रावसरे आचार्यादीनां वरणं कार्यं। ततस्तु स्थंडिलं कृत्वा सावकाशं शुचिव्रतः॥ आरभे
द्दवनं सम्यक् स्वस्तिवाचनपूर्वकं॥ तद्विष्णोरिति मंत्रेण पायसं जुहुयात्सुधीः। अयुतं वा सहस्रं
वा यथाविभवसारतः॥ मातुलिंगैस्ततः कुर्याद्धवनं शतसंख्यया। उद्देशो विष्णुदेवस्योद्दे-
श्यातो हवने स्मृतः॥ धात्रीफलैस्तथा द्राक्षाफलैः खर्जूरिकैस्तथा॥ इक्षुदंडैश्च कदलैः-
शतसंख्यैः पृथक्पृथक्॥ जाते तु हवने तस्मिन्सूत्रैरावेष्टयेत्तरुं॥ गंधपुष्पाक्षतैः सम्यक्स
म्यग्दलांगतलं समर्चयेत्॥ दशांगं धूपयेद्दीपैर्नीराजयेत्सुधीः॥ नैवेद्यैर्विविधैर्भक्त्यातां
बूलेन सुतोषयेत्॥ ततो नीराजनं कृत्वा प्रार्थयेतां समाहितौ॥ बोधिद्रुः ममहावृक्ष महापा
पनिषूदन। पुत्रान्देहि जगन्नाथ कुरु मे जीवसंततिं॥ ॥इति प्रार्थ्य प्रणीय स्व आचार्यं पूज
येत्ततः॥ वस्त्रयुग्मं च धेनुं च दद्यादाचार्यतुष्टये॥ ॥अथाचार्यप्रार्थनामंत्रः॥ आचार्यस्त्वं
महाविष्णुराचार्याणीय द्विजा॥ ॥दत्तां मे संततिं श्रेष्ठां प्रसन्नेनैव चेतसा। युवं वस्त्राणि ति
वस्त्र॥ गतां मंगेषु गामयहिरण्यारूपः सरति हिरण्यमपि दापयेत्। पर्यंकादि ततो धान्यं द-

त्यान्तरिं च द्वादशी एां॥ ततः स्वगृहमागत्य ब्राह्मणान्भोजयेत्सुधीः॥ चतुर्विंशतिसंख्याका विष्णु-
६५ मूर्तीरनुस्मरन्॥ प्रथमं केशवं विद्याद्द्वितीयं मधुसूदनं। संकर्षणं तृतीयं च दामोदरमतः परं।
वामनं पंचमं विद्यात्षष्ठं प्रद्युम्नसंज्ञकं। सप्तमं विष्णुनामानं माधवं चाष्टमं विदुः॥ नवमं चानि-
रुद्धाख्यं दशमं पुरुषोत्तमं। एकादशमधोक्षजं द्वादशं च जनार्दनं॥ त्रयोदशं च गोविंदं त्रिवि-
क्रमं मतः परं॥ श्रीधरं पंचदशमं हृषीकेशं च षोडशं॥ सप्तदशं नृसिंहं च वासुदेवमतः परं
॥ अतः परं पद्मनाभं विष्णुं विंशतिमं तथा॥ एकविंशतिमं विद्यादुपेंद्रं जगतः प्रभुं॥ हरिं द्वा-
विंशतिमितं द्वौ तथाच्युतकृष्णको मुकुंदं नस्तत्तस्ते तुष्टं तुष्टा द्युराशिषः॥ एवं कृते विधाने राम: ६८
स्मिन्देवे पिप्पलपूजने॥ जायते पुत्रसंतानं क्षयं गुणवत्तमम्॥ इति धौविनमालायां स्कंद
पुराणोक्ताश्वत्थपूजा विधानं समाप्तं॥ पुत्रकामानामावश्यको विधिः॥ होमाद्यैः शांतिकां उ
नारद उवाच॥ अथ वाक्ष्ये वक्ष्यामि गर्भोत्पत्तौ च कारणं॥ सिद्धिदं चैव महाद्यो नानरीनां सग
मेषु वा॥ ब्राह्मणान्भोजयेच्छिष्टान्सपत्नीकान्बहूनपि॥ अयने विषुवे चैव चंद्रसूर्यग्रहे यदा॥

पूर्वेद्युरुपवासः स्यात्भोजयित्वा तथा द्विजान्॥ प्रभाते स्नापयेत्पत्नीं विधिनानेन साधकः॥ आ-
लिख्य मंडलं तत्र गणाध्यक्षं समर्चयेत्॥ ॐ गं गणपतये नमः। बहुरूपवामनश्चैव महाकायो म-
होदरः॥ मदोन्मत्तो रवौरामरस्य तेभक्षधोरकाः॥ तिरश्च्या हतीकामा वांछविघ्ना वरप्रदो॥ रूक्ष्मा-
मा कीर्तिर्वृत्यष्टौ गणनाथस्य शक्तयः॥ श्रीगं च पंचकं चैव परमंगुलकुंडकं तथा॥ दधतं रुक्मो विना-
यकः॥ ॐ विनायकाय विद्महे वक्रतुंडाय धीमहि॥ तन्नो दंतिः प्रचोदयात्॥ मंडलं सर्वतोभद्रं वा
हलं चाष्टखुरुच्यते॥ कलशान्नष्ट संस्थाप्य मध्ये कुंभं ततः शुभं॥ सूत्रेणावेष्टयेत्सर्वान्वांतरांति
लोतरं॥ ततो ईशान दिग्भागे कलशं स्थापनं भवेत्॥ मध्य कुंभे न्यसेत्तावत्पंचरत्नान्यौषधीः॥ प-
रयेत्तीर्थतोयं तु विघ्नबीजं न देशिकः॥ ॐ गं गणपतये नमः इति विघ्नेश बीजं। तस्मिन्कुंभे न्य-
सेत्सप्तमृत्तिकाय मभागतः॥ अष्टाष्टकलशेषु क्षेप्यद्रव्याण्याहा॥ आग्नेये पुष्प गंधा तिया-
म्ये कृष्णतिलास्तथा॥ नैर्ऋते छागदुग्धं च वारुणे पंचगव्यकं॥ पंचामृतं तु वायव्ये सौम्ये
चैवाक्षयं मधु॥ ऐशान्ये यावकं सक्तुमेव मेते स्तु पूरयेत्॥ ब्रह्मण्या पृष्ट कुंभे षुवीरन प्रोतमे

वह्निः ॥ स्वमंत्रैरवविन्यस्य पूजयेन्मातृचक्रकं ॥ ब्रह्माणी चैव माहेशी कौमारी वैष्णवी तथा ॥ वारा
ही चैंद्री च चामुंडा वीरभद्रस्तथाष्टमः ॥ मध्येगतो गणाभ्यर्च्य सर्वतुपचरेत्तथा ॥ यदेवमेदिता याया
६६ तत्तद्वर्णायुधीकीर्त्तिताः ॥ अथ तन्मंत्रोद्धारः ॥ ॐ ह्रूं ब्रह्माणी ब्रह्मदेवते ह्रूं फट् स्वाहा ॥ ॐ मा-
हेश्वरि महेश्वरदेवते सर्वभूतपरोपकारि ह्रां ह्रीं ह्रूं स्वाहा ॥ ॐ कौमारि कुमारदेवते सर्वशत्रु-
विनाशिनी ॐ क्रौं क्रीं ह्रूं स्वाहा ॥ वैष्णवि नारायणदेवते महामायानिषूदनि ॐ ह्रौं ह्रीं ह्रूं स्वा-
हा ॥ ॐ रुद्राणि रुद्रदेवते ॥ ॐ द्रां द्रीं द्रूं स्वाहा ॥ वाराहि वराहदेवते ॥ ॐ भौं भीं भूं स्वाहा ॥ ॐ इं-
द्राणि इंद्रदेवते दैत्यदेवयविनाशिनि ॐ ह्रां ह्रीं ह्रूं स्वाहा ॥ ॐ वीरभद्र महावीर मातृकागणप्रियवां-
छीद स्वाहा ॥ इति पात्रशानि तु पत्राणि निधिप्राणि समानि वै ॥ अष्टोत्तरसहस्राणि समादाय वि- रामः ६६
वासयेत् ॥ चतुर्भिर्ब्राह्मणैः शालैर्ऋग्यजुःसामाथर्वभिः ॥ प्रतिप्रणवसंयुक्तैर्गायत्र्या स्नापयेत्
शुभैः ॥ नालमादाय संप्रोक्ष्य पत्रान्यत्रं परित्यजेत् ॥ पूर्णेषु सर्वपत्रेषु ब्राह्मणेभ्यश्च दक्षिणां
॥ ऋत्विज्यां प्रीतिसिध्यर्थं दद्याद्वित्त्यासधामवान् ॥ सपत्नीकं स्नापयेत्तु मातृचक्रस्थितैः

कमात् ॥ ब्राह्मणाद्यैर्वस्त्राभिर्मव्यकुंभैस्तु देशिकः ॥ स्तुतिमंगलनिर्घोषैर्वीणावेणुरवादितं ॥ स्नापये
न्मंडलं मे चैणागतो शस्य प्रसन्नवान् ॥ विनायकं पुनः पूज्य मंडलस्थं विसर्जयेत् ॥ ततः प्रभृति देवं ग
णानाथ प्रपूजयेत् ॥ आचार्यं पूजयेत्पश्चाद्दक्षैरन्यैश्च वान्वितैः ॥ एवं यो विधिवद्यागं कारयेत्स यतोऽ
शदः ॥ पुत्रान्वित्तं तथारोग्यमायुः पूर्णमवाप्नुयात् ॥ सौभाग्यं व्याधयः शक्रगमनाशनेपश्यति ॥
इति तत्त्वसागरसंहितोक्तगणाध्यक्षस्नपनं ॥ अथ काम्यानि नानास्नानानि ॥ विष्णुधर्मोत्तरे पु
पुष्कर आह ॥ स्नानान्यन्यानि ते वक्ष्ये निबोध गदतो मम ॥ रक्षोघ्नानि यशस्यानि मांगल्यानि वि
शेषतः ॥ स्नानं घृतेन कथितं आयुषो वर्द्धनं परं ॥ रामगोशकृता स्नानं परं लक्ष्मीविवर्द्धनं ॥ गो
मूत्रेण तथा स्नानं सर्वपापविनिसूदनं ॥ स्नानं क्षीरेण कथितं बलबुद्धिविवर्द्धनं ॥ स्नानेन कथि
तं दध्ना महालक्ष्मीविवर्द्धनं ॥ तथा दर्भोदकस्नानं सर्वपापप्रणिबर्हणं ॥ पंचगव्यजलस्नानं स
र्वकार्यार्थसाधनं ॥ गवां शृंगोदकस्नानं सर्वपापनिबर्हणं ॥ पलाशबिल्वकमलकुशस्नानं
पुरोहितं ॥ पञ्चाहरिद्रामं त्रिशतराशं चार केतथा ॥ स्नानमेतद्विनिर्दिष्टं रक्षोघ्नापापनाशनं ॥ व

चाहरिद्रेदेयुक्ते स्नानं रक्षोहरं शोपरं आयुष्यं च य. शस्यं च धन्यं मेधाविवर्द्धनं। स्नानं पवित्रं मंगल्यं
तथा कांचनवारिणा क्रमाद्गुनत्तरं॥ किंचिद्दोप्यलाभोदकैस्ततः। तथा रत्नोदकस्नाने संग्रामे
६७ विजयावहं। वैकुंठमध्यतः कृत्वा प्रवालैः परिवादयेत्॥ तेन पात्रेण यस्नानं सर्वकामप्रदं भवे
त्॥ तथा पुष्पोदकस्नाने भवेदारोग्यदायकं। तथैवामलस्नानं मध्यनागोरे सर्षपैः॥ स्नानं प्रि
यंगुना प्रोक्तं तथा सौभाग्यवर्द्धनं। वंध्याककोंटकीमूलं सौकुरोपध्मवारिणा॥ स्नानं रोगविना
शाय स्मृतं प्रत्येकशो द्विज॥ मांसीसुरारोचननागपुष्पैः सनागदंनेररिना शकारि॥ तरुष्कतक्के राम:
लकजातिफलैः समस्तैस्सुतप्रदं स्यात्॥ इति नानास्नानानि॥ ॥अम्नृतसागरेपिप्पला ६७
दे॥ ॥पिप्पलादिरुवाच॥ भगवन्सर्वधर्मज्ञ सर्वशास्त्रविशारद॥ स्त्रीणां पुत्रविहीनानां ना
रीणां विविधापदां॥ केनोपायेन मे ब्रूहि सुमुखसिद्धिः कथं भवेत्॥ अथ वाउवाच॥ पुरा ब्र
ह्मादयो देवाः सर्वे विष्णुसमाश्रिताः। वदे प्रपच्छुर्द्देवेशं राक्षसैः पीडिता वयं॥ कथं दुःखोप
शमनं स्नाकं ब्रूहि नः प्रभो॥ कृपया परया देव तद्वृत्तं ब्रूहि नः प्रभो॥ श्रीविष्णुरुवाच॥ अहम्भ

थरूपेण संभवामि महीतले। तस्मात्सर्वप्रयत्नेन कुरुध्वं तरुसेवनं॥ तेन सर्वाशा भविष्यति न संश
यं विष्णुर्यदुक्तं वाक्यं तेभ्यस्तद्वृत्तं ते वदाम्यहं। नदानैर्न तपोभिश्च नाध्वरैर्भूरि दक्षिणैः॥ अश्व
त्थसेवना दन्यत्कलौ नास्ति प्रतिक्रिया॥ तद्विधानं निमित्तानि सरव्वा चक्षितिं च पूजनं। हवनं तर्प
णं विप्रभोजनं नियमं तथाव्रतं॥ अधिकारितस्तत्र नतिदानं विशेषतः। एतत्सर्वं पिप्पलादे वक्ष्यामि त
व सुव्रत दारुणे विविधे त्पातैः दिव्यभौमांतरिक्षजैः। परचक्रभये देशविध्वंसे राजविग्रहे॥ दुःस्व
प्ने दुर्निमित्ते च संग्रामे मृत दर्शने॥ मारीभये राजभये तथा चोराग्नि जे भये॥ दृश्यापस्मा
रकुष्टादिप्रमेहे विविधे ज्वरे॥ उदरे मंत्रकृच्छ्रे च ग्रहग्रस्ते तथैव॥ अन्येष्वनुक्तरोगेषु व्रणरोगे
तथैव च॥ एतेषां रोगनाशाय कुर्याद्श्वत्थसेवनं। प्रातरुत्थाय नद्यादौ स्नात्वा चन्यकुलेन क्रि
यः॥ अश्वत्थदेशमाश्रित्या गोमयेनोपलेपयेत्॥ तमश्वत्थं मलं क्लेसपुष्पायां गैरकेण च॥
पूजां द्रव्याणि संपाद्य पुण्याहं वाचयेत्ततः कृत्विजो वरणं कृत्वा ततः पूजां समाचरेत्॥ आरा
धयेत् यथा विष्णुं ध्यानावाहनपूर्वकं। तथैव पिप्पलस्तरं नामरायणामयं द्विजः। ध्येतगंधा

क्षतैः पुष्पैः धूपदीपनिवेदनैः॥ अर्चयेत्पुरुषसूक्तेन तत्पैध्यानपूर्वकं॥ तेनैवावाहनं कुर्यात्तत्पर्य-
शांच नरश्रियं॥ श्वेतवर्णां स्वलक्ष्मीकं चिंतयेत्पुरुषोत्तमं॥ इति ध्या। स्यावाहना। दि उपचारैः स्वयं षो-
६८ डशैः। ततः प्रदक्षिणां कुर्यादश्वत्थस्य शनैः शनैः॥ यदि शीघ्रेण कुर्याच्चेत्तत्सर्वं निष्फलं भवेत्॥
लक्षमेकं द्विलक्षं वा त्रिचतुःपंचलक्षकं॥ कार्यस्य गौरवं ज्ञेयं द्वादशांतं समाचरेत्॥ ब्रह्मचारी-
हविष्याशी स्वधःशायी जितेंद्रियः॥ मौनी ध्यानपरो भूत्वा पिप्पलस्य स्तुतिं पठेत्॥ विष्णोर्नाम
सहस्रं च पौरुषं वैष्णवं तथा॥ वेदत्रयस्य पुण्यानि सूक्तानि च पठेत्पुनः॥ तस्य लक्षदशांशेन स-
घृतं पायसं चरुं॥ जुहुयात्प्रत्यहं वह्नौ स्वगृह्योक्तविधानतः॥ तत्संख्यया तर्पणं च कुर्याच्छुद्धे- रामः
न वारिणा॥ उक्तषोडशभिर्द्रव्यैः कुर्यात्प्रतिदिनं नतिं। हवनस्य दशांशेन मिष्टान्नं भोजयेद्द्विजा- ६८
न्॥ ब्राह्मणास्तु स्वयं कुर्युर्यथोक्तनियमं तथा॥ असमर्थश्चेत्तत्कर्तुं सवर्णमन्येन कारयेत्॥
क्षत्रियादित्रिवर्णानां ततोऽन्यत्रं न कारयेत्॥ उक्तप्रमाणाद्द्विधिकं फलं दशगुणं भवेत्॥ ततश्च-
तुर्गुणं पीठं राजतं चतुरस्रकं॥ हेमं मध्ये तदर्धं वा तिलानुपरि निक्षिपेत्॥ श्वेतवस्त्रेण संछाद्य

पूर्ववत्पूजयेत्तरुं॥ दरिद्राय सुशीलाय श्रोत्रियाय कुटुंबिने॥ उदङ्मुखाय विप्राय स्वयं पूर्वमुखः स्थि-
तः॥ सुवर्णं वृक्षराजं च मंत्रेण प्रतिपादयेत्॥ इह जन्मनि वान्यस्य बाल्यकौमारवार्धकैर्मनोवाका-
यजं दोषं। तं प्रणाशय पिप्पल॥ पिप्पलो वृक्षराजोऽसि ह्यग्निगर्भस्त्वमेव हि। प्रभुर्वनस्पतीनां
च पूर्वजन्मनियत्नतः। अघौघं नाशय क्षिप्रं तव रूपप्रदानतः॥ अथ दानमंत्रः॥ अनुत्तरां गृ-
हाण त्वं विष्णुरूप द्विजोत्तम॥ स्वीकुरुष्व दुष्कृतं घोरं क्षिप्रं नाशय मे प्रभो॥ पुत्राहीनस्वर्णानि
मयमेव विधिः स्मृतः॥ अर्याचार्यं नाधिकारोऽस्ति स्त्रीणां॥ विप्रेणाकारयेत्॥ एवं कृत्वा व्रतं तत्स-
म्यग्व्रतस्य परिपूर्त्तये॥ हेमाश्वत्थतरुं दद्याच्छुक्लां गां च पयस्विनीं॥ स्वर्णशृंगीं रौप्यखु-
रां वस्त्रादिभिरलंकृतां॥ पलमेकं तदर्धं वा तदर्धार्धेन वा पुनः॥ हेमाश्वत्थतरुं कुर्यात्स्कंध-
शाखासमन्वितं तु उत्तमः प्रथमः कल्प्यो द्वितीयो मध्यमस्तथा॥ तृतीयस्त्वधमः प्रोक्तो दरिद्र-
णां न चान्यथा॥ एवं व्रतं यः कुरुते तस्य पुण्यफलं शृणु॥ पुत्रार्थी लभते पुत्रं धनार्थी लभते धनं
कन्यार्थी लभते कन्यां बद्धो मुच्येत बंधनात्॥ क्षयापस्मारकुष्ठादिसर्वरोगैः प्रमुच्यते॥ शा

६९

किनीडाकिनीभूतप्रेतराक्षसपीडिताः॥ रमंविधिमनुष्ठीयभवंतिसुखिनोनराः॥ नतेषांशत्रु
पीडाचनचराजभयंतथा॥ इहजन्मनिवान्यस्मिन्कृतैःपापैःप्रमुच्यते॥ यंयंकामयतेकामंतं
तंमाप्नोत्यसंशयः॥ देहभोगान्भुक्त्वांते विष्णोःसायुज्यमाप्नुयात्॥ ॥इत्यद्भुतसागरेशां
तिप्रकरणेअश्वत्थोकाम्यस्येवाप्रकारः समाप्तः॥ अथाश्वत्थस्तोत्रं॥ अथध्यानंप्रवक्ष्या
मिसर्वकामफलप्रदं॥ पुत्रकामस्यदेवेशश्वेतवर्णंसुशोभनं॥ समुद्रबीजगगनंचरदाभ
यपाणिनं॥ शंखचक्रगदापद्मधरंदेवंसुशोभनं॥ ध्यायेत्सौम्याननंविष्णुंसर्वकामार्थ
सिद्धये॥ अकारैरमूलरूपायउपकारस्कंधशाखिने॥ मकारफलपुष्पायवृक्षराजायते
नमः॥ आग्नेभिमुखंदेवंमुखतकामरूपिणं॥ इष्टकाम्यार्थसिध्यर्थंपुत्रपौत्रप्रवर्द्धनं
श्वेतवर्णंसलक्ष्मीकंभुजाष्टकविभूषितं॥ शंखचक्रधरंदेवंपीतवाससमच्युतं॥ अभयव
रदंशांतंखड्गखेटकधारिणं॥ धनुर्बाणसमायुक्तंचिंतयेत्पुरुषोत्तमं॥ एवंध्यात्वाहरिनि
संपूज्यब्रह्मरूपिणं॥ कृत्वाप्रदक्षिणाश्वत्थंसर्वकामफलप्रदं॥ देवाचार्यनमस्तेस्तुनमस्ते

राम: ६९

शांतिदप्रभो॥ क्रूरग्रहैःपीडितानामश्वत्थायनमोनमः॥ ॥श्रीनारदउवाच॥ अनायासेनयो
मर्त्यःसर्वान्कामानवाप्नुयात्॥ प्रदक्षिणाकृतेकेनतेत्रराणांसर्वकामदं॥ अश्वत्थदक्षिणोतःप्रः
प्रश्चिमेविष्णुरास्थितः॥ ब्रह्माचोत्तरतस्तस्यपूर्वेचेंद्रादिदेवताः॥ स्कंधोपस्कंधपत्रेषुविप्रागो
त्रपयस्तथा॥ मूलांकुरफलेष्वस्यवेदायज्ञाःसमाश्रिताः॥ नदीनदाःसागराद्याःपूर्वादिक्रमसं
स्थिताः॥ तोकथंसमाश्रित्यअश्वत्थंसेवयेद्बुधाः॥ चर्क्षीरेफलितस्नेवशीतलश्रवणस्यते
लोमारात्मनरोविद्याद्देहिकामुष्मिकंफलं॥ चलद्दलायवृक्षायसर्वदाऽचलविष्णवे॥ बोधि
तत्वायदेवायह्यश्वत्थायनमोनमः॥ अश्वत्थाययस्मात्त्वयिवृक्षराजनारायणस्तिष्ठतिसार्व
कालं॥ अतःश्रुचिस्त्वंसततंतरूणांधन्योसिदुःस्वप्नविनाशकोसि॥ क्षीरोदरत्वांचयेनहृद्ये
श्रीस्त्वांनिषेवते॥ सत्येनतेनवृक्षेंद्रमामपिश्रीर्निषेवतां॥ एकादशोसिरुद्राणांवसूनामष्ट
मस्तथा॥ नारायणोसिदेवानांवृक्षराजोसिपिप्पलः॥ अग्निगर्भःशमीगर्भोवेदगर्भःप्रजायते॥
हिरण्यगर्भश्रीगर्भयज्ञगर्भनमोस्तुते॥ आयुर्बलंयशोवर्चःप्रजापशुवसूनिच॥ ब्रह्मप्रज्ञां

चंद्रं मेधां च ऋद्धिं नो देहि वनस्पते ॥ आरात्रे अग्निस्त्वारात्पुरस्फले ॥ निवाते त्वाभिवर्षतु स्व-
स्ति ते स्तु वनस्पते । स्वस्ति मे स्तु वनस्पते । अक्षिस्पंदं भुजस्पंदं दुःस्वप्नं दुर्विचिंतनं । शत्रूणां च
७० समुत्थानं मश्वत्थ शमय स्व मे ॥ मूलतो ब्रह्मरूपाय मध्यतो विष्णुरूपिणे ॥ अग्रतः शिवरूपा-
य वृक्षराजाय ते नमः ॥ यं दृष्ट्वा मुच्यते रोगात् स्पृष्ट्वा पापैः प्रमुच्यते ॥ यमाश्रित्य च दीर्घायु
स्तमश्वत्थं नमाम्यहं ॥ अश्वत्थक महाभागः सुभगः सुप्रदर्शनः । मिष्टान्नं भोजनं देहि शत्रू
णां च पराजयं ॥ आयुः प्रज्ञां धनं धान्यं सौभाग्यं सर्वदा शुभं । देहि देव महावृक्ष त्वामहं चाभिवाद
ये ॥ ऋक्तंत्रं यजुषो मंत्रं सामगायत्रिगानवत् ॥ अश्वत्थ वेदमूलस्त्वं ऋषिभिः प्रोच्यसे सदा ॥ ब्रह्म राम: ७०
हा गुरुहा चैव दरिद्रो व्याधिपीडितः । आवर्त्तेद्दशलक्षं स शुद्धः पापोपतिगो भवेत् ॥ ब्रह्मचा-
री हविष्याशी ह्यधःशायी जितेंद्रियः । पापोपहतमर्त्यस्तु व्रतमेतत्समाचरेत् ॥ एकहस्तं द्विहस्तं
वा कुर्याद्गोमयलेपनं । अर्चयेत्पुरुषसूक्तेन प्रणवेन विशेषतः ॥ मौनी प्रदक्षिणां कुर्यात्प्रागुक्तफलभा-
ग्भवेत् । विष्णोर्नामसहस्रेण ह्यच्युतस्यापि कीर्त्तनैः । पदे पदांतरं गत्वा करौ चलनवर्जितौ ॥

वाचा स्तोत्रं मनो ध्यानं चतुरंगं प्रदक्षिणं । अश्वत्थमूलमाश्रित्य शाकेनान्नोदकेन वा । एकस्मिन्भोजि
ते विप्रे कोटिर्भवति भोजिता ॥ अश्वत्थमूलमाश्रित्य जपहोमसुरार्चनात् ॥ अक्षयं फलमाप्नोति
ब्रह्मणो वचनं यथा ॥ एवमाश्वासितो श्वत्थो ह्यश्वत्थस्तदाश्वासयमामपि । यज्ञार्थं छेदिते श्व
त्थे ह्यक्षयं स्वर्गमाप्नुयात् ॥ अश्वत्थः पूजितो येन पूजिताः सर्वदेवताः ॥ अश्वत्थे छेदितो येन छे
दितास्पि ह्यदेवताः ॥ अमायां तु गुरोर्वारे ह्यश्वत्थच्छायमोदकं ॥ तत्र स्नात्वा जपन्नित्यं ब्रह्महत्यां
व्यपोहति । अश्वत्थस्य जले यत्र छाया भवति कुत्रचित् ॥ तत्प्रयागसमं तीर्थं तत्र संनिहितो ह
रिः ॥ पापोपहतमर्त्यानां व्रतान्येतानि कारयेत् ॥ सकामो लभते कामं निष्कामो मोक्षमाप्नुयात् ॥ यः प
देष्वणु यादपि ह्यश्वत्थस्य समीपगः ॥ यदे यदेश्वमेधानामश्वत्थस्य प्रदक्षिणं ॥ अश्वत्थं मंद-
वारे तु स्पृष्ट्वा त्रैयेव कं जपेत् ॥ कालमृत्युर्नयासेवं किमुताह्यपमृत्युवः ॥ ऋणकाय पद्वारेच
रोगहारि द्रनाशनं ॥ अश्वत्थं सिंधुराजं च निर्यंस्ते वेलनस्पृशेत् ॥ मंदवारे स्पृशेत्स्वं यसिंधुराजं च
पर्वणि कोणस्थः पिंगलो बभ्रुः कृष्णो रौद्रोंतको यमः । सौरी शनैश्चरो मंदः पिप्पलादि भुसं

स्थितः॥ एतानीमानि जपेद्भीष्मस्य संनिधौ॥ छायामार्तंडसूनुश्च पणेनेन विशेषतः॥ नमोर्कपु-
त्राय शनैश्चराय नीलांजनवर्णाय निर्मलाय॥ स्पष्टाक्षरहस्यं प्रणतोस्मि नित्यं कल्पप्रदो मे भवसे-
७१ यपुत्र॥ अश्वत्थे बोधिषदनं पर्णे वो वसतिष्कृता॥ गोभाजयिता किलासस्य यस्य सनवतदूरुषं॥ ॥
यदहं वा जयन्निमां ॐ षधी हस्त आददे॥ आत्मा यक्ष्मस्य नश्यंति पुराऽग्नी गृभ्णो यथा॥ यदोषध्यः सं-
गच्छंते राजानः॥ समिताविव॥ विप्रः स उच्यते भिषग्रक्षोहा मीवचातनः॥ आसामप्रस्ववानारीनी-
रक्षणार्थं यथा॥ उद्वहती शनैर्यांति तथा कुर्यात्प्रदक्षिणं॥ अश्वत्थसेवा तिलपात्रदानं गोस्पर्शनं
ब्राह्मणतर्पणं च॥ एतानि सद्यः ३ प्रहरति पापं गंगानदीमारतकीर्तनं॥ ॥इति श्रीब्रह्मांड राम:
पुराणे ब्रह्मनारदसंवादे अश्वत्थस्तोत्रं संपूर्णं॥ अथ पुरुषसूक्तविधानं॥ वृहस्पतिरुवाच॥ अथा ७१
न्यत्संप्रवक्ष्यामि विधिपावनमुत्तमं॥ अस्मत्तात प्रणीतोयं रघुपुत्राय पृच्छते॥ अनपत्यस्य पु-
त्रार्थं कुर्याद्धेमादिकक्रियां॥ चचरुक्रियेत्यर्थः॥ सहस्रशीर्षसूक्तविधानं चरुणा कृतं॥ ये-
र्यैः कृतं तत्वपैः॥ पूर्वमन्यैरपि द्विजोत्तमैः॥ सिध्यंति सर्वकर्माणि विधिवद्भिर्द्विजोत्तमैः॥ उपासि-

तानि सत्तमश्रोत्रियैः श्रुतिपारगैः॥ आसन्विप्रैर्निराहारैः व्रतिभिर्मंत्रवित्तमैः॥ क्रियमाणाः क्रियाः
सर्वाः सिध्यंति व्रतचारिभिः॥ शुक्लपक्षे शुभे वारे शुभनक्षत्रगोचरे॥ द्वादश्यां पुत्रकामाय चरुं कु-
र्वीत वैष्णवं॥ दंपत्योरुपवासश्च ह्येकादश्यां सुरालये॥ ऋग्भिः षोडशभिः सम्यगर्चयित्वा जना-
र्दनं॥ चरुं पुरुषसूक्तेन श्रपयेत्पुत्रकाम्यया॥ अर्चनादिप्रकारस्तु ऋग्विधाने॥ वक्ष्ये पुरुषसूक्त-
स्य विविधानं प्रति॥ अग्निकार्यं जपविधिं स्तोत्रं चैव नदात्मकं॥ कुर्याद्वयोक्तविधिना प्राङ्मुखः शु-
द्धमानसः॥ प्रथमां विन्यसेद्वामे द्वितीयं दक्षिणे करे॥ तृतीयां वामपादे तु चतुर्थीं दक्षिणे तथा॥
पंचमीं वामजानौ तु षष्ठीं वै दक्षिणे तथा॥ सप्तमीं वामकट्यां तु अष्टमीं दक्षिणे तथा॥ नवमीं ना-
भिमध्ये तु दशमीं हृदये तथा॥ एकादशीं स्कंधदेशे द्वादशीं वामबाहुके॥ त्रयोदशीं दक्षिणे च आ-
स्यदेशे चतुर्दशीं॥ अक्ष्णोः पंचदशीं चैव षोडशीं मूर्ध्नि विन्यसेत्॥ एवं न्यस्य विधिं कृत्वा पश्चाद्धोमं
समारभेत्॥ ततः पंचांगानि॥ ब्राह्मणोस्य मुखमिति हृदयं॥ चंद्रमेति शिरस्तथा॥ नाभ्याआसीदिति-
शिखां स्मृतेति कवचं न्यसेत्॥ यज्ञेनेत्यस्त्रमुद्दिष्टमेवं पंचांगलक्षणं॥ संकल्पासिद्ध्यं॥ अमुकका-

मनया पुरुषसूक्तस्य जपहोमं विष्णोराराधनं वा करिष्य इति संकल्प्य पूर्वोक्तं न्यासद्वयं विधाय ऋ-
षिदेवतादि पठित्वा पूजा आरभेत्॥ आद्यया वाहयेद्देवमृचा तु पुरुषोत्तमं॥ द्वितीयया आसनं द-
७२ द्यात् पाद्यं चैव तृतीयया॥ चतुर्थ्या अर्घ्यं प्रदानं स्यात् पंचम्या आचमनं तथा॥ षष्ठ्या स्नानं प्रकुर्वीत स-
प्तम्या वस्त्रमेव च॥ यज्ञोपवीतमष्टम्या नवम्या आभरणं तथा॥ दशम्या गंधदानं स्यात् एकादश्या
च माल्यकं॥ द्वादश्या धूपदानं स्यात् त्रयोदश्या च दीपकं॥ चतुर्दश्या निवेद्यं तु पंचदश्या नमस्क्रि-
या॥ उद्वासनं तु षोडश्या स्नानवस्त्रनिवेद्य च दद्यादाचमनीयकं॥ दद्यात् सुरूपसूक्तेयः पु-
ष्पाणि पर्णं वा॥ अर्चितं तेन वै सर्वं त्रैलोक्यं सचराचरं॥ दक्षिणां तु यथाशक्त्या षोडशेन॥ राम: ७२
प्रदापयेत्॥ ततः प्रदक्षिणं कृत्वा जपं कुर्यात् समाहितः॥ यथाशक्ति जपित्वा च सूक्तेना-
त्मनि वेदयेत्॥ देवस्य दक्षिणे पार्श्वे कुंडं स्थंडिलमेव वा॥ कारयेत् प्रथमचैव तु प्रोक्षणं
तु द्वितीयया॥ तृतीयया अग्निमादध्यात् चतुर्थ्या तु समिंधनं॥ पंचम्या त्वाज्यसंस्कार ऋषे ऋ-
अर्पणं तथा षष्ठ्या अनलस्य मध्ये तु कल्पयेत् पद्मासनं॥ चिंतयेत्तत्र देवेशं कालानल

समप्रभं विवृतास्यं वा सहस्रशीर्षं रक्तास्यं रक्तलोचनं॥ साहोहृयः॥ एवं देवं ध्यात्वा सप्तम्यादि पंचभिर्ऋ-
ग्भिः पंचोपचारपूजां कुर्यात् द्विसाहा॥ ततो गंधं च पुष्पं च धूपं दीपनिवेदनं॥ अनुज्ञाप्य ततः कुर्यात् सप्त-
म्यादि यथाक्रमं॥ समिधः प्रत्यृचं चरुं जुहुयाद्विमिश्रितां॥ ततो घृतेन जुहुयाच्चरुणा च ततः पु-
नः एवं कृत्वा ततस्तस्य समीपे स्तोत्रमुच्चरेत्॥ जितं ते पुंडरीकाक्ष नमस्ते विश्वभावन॥ नमस्ते
स्तु हृषीकेश पुराणपुरुषपूर्वज॥ नमो हिरण्यगर्भाय प्रधानाव्यक्तरूपिणे॥ ॐ नमः भगवते वा-
सुदेवाय शुद्धज्ञानस्वभाविने॥ देवानां दानवानां च सामान्यमधिदैवतं॥ ॥सर्वदा चरणद्व-
द्वं प्रजानि शरणं तव॥ ॥एकस्त्वमसि लोकस्य स्रष्टा संहारकस्तथा॥ ॥अध्यक्षश्चानु-
मंता च गुणमायासमावृत॥ ॥संसारसागरं घोरमनंतं क्लेशसाधनं॥ त्वमेव शरणं
प्राप्य निस्तरंति मनीषिणः॥ न ते रूपं न चाकारो नायुधानि न चास्पदं॥ तथापि पुरुषाका-
रो भक्तानां त्वं प्रकाशसे॥ नैव किंचित् परोक्षं ते प्रत्यक्षोसि न कस्यचित्॥ नैव किंचिदसि-
द्धं ते न च सिद्धोसि कस्यचित्॥ कार्याणां कारणं पूर्वं वचसां वाच्यमुत्तमं॥ योगिनां परमां

सिद्धिं वदंति परमं विदुः॥ अहं प्रीतो ऽस्मि देवेश संसारे ऽस्मिंस्त्वया विहत्रा हि दुमवसु चाच्युत।
शरीरेष्पि गतो चापि वर्द्धते मे महत्सुखं। तस्माद् कं मत्सादृन्यस्म मे जन्मांतरे तरेष्वपि। निमित्तं
७२ कुशलस्यास्ति येन गच्छति सत्कृतिं विज्ञानं यदिदं प्राप्तं यदिदं ज्ञानमर्जितं॥ जन्मांतरेपि मे
देव मान्ये दृस्य परिक्षयः॥ दुर्गता वपि जातायां त्वं गतिस्त्वं मगतिर्मम॥ यदिनाथं च विदेय-
तीव तास्मि कृतीश्वदा॥ अकामकं तु शं चित्तं मम ते पादयोः स्थितं॥ कामदेवेन तव त्वेतु सम
जन्म सुके वलं रसेवं मनया स्तुत्या देवदेवं दिने दिने॥ किंकरो ऽस्मीति चात्मानं दिवाये वनि- रामः
वेदयेत्॥ इति स्तोत्रं॥ द्वादशद्वादशीष्वेवं वयसानि वपेच्चरुं॥ एवमेकदश्युपवासादिकं- ७३
के वेत्स्यर्थः। कृत्वाज्यं विधिवत्पूर्वं कृत्ग्निवोउ शमिस्तथा॥ समिधो ऽश्वत्थवृक्षस्य होतव्याः
दूर्वमेव तु॥ उपस्थानं कृत्वा शस्य ध्यात्वा च मधुसूदनं॥ उपस्थानं तु पुरुषसूक्तेन वा हविः-
होमं ततः कुर्यां ब्रह्मच्चेनाग्यतः शुचिः॥ हविःशेषमनन्तलानारीनारायणं पतिं॥ हविः-
शेषं भक्षयेत्। पिबेत्वालब्ध्वाशीस्से विशेषणं॥ उद्धशीति गृह्णामो हारांत रनिरुसये॥ सं

विशेत्॥ वामशायिनी स्यादिसर्थः। ततः कृत्वा त्विदं कर्म कर्तव्यं द्विजतपत्नी॥ अन्यस्त्री पुत्रवतीं न
यावत्कर्म हि विंदति॥ यथा यास्यै हे तेन कर्म कृतं तां मुक्त्वा बहुभार्यो ऽन्यां न गच्छेद्दा वदे
षा कर्मस्यहाधिकारिणी गर्भं प्राप्नोति नावत्॥ मंत्र च तः शुक्रस्यान्यत्र गर्भाधाना संभवात्
॥ तस्यान्यत्र निषेके स्यहाधिकारिण्यं गर्भ नुदयाच्च॥ अनेकाभिःसह तत्कर्म कर्त्तव्येन
दोषः॥ प्रानुयाद्देवर्षं पुत्रोचिरान्तुःसंनिश्चयं॥ अपुत्रामृतपुत्रा वा पापा च कन्यां प्रसूयते॥
क्षिप्रं साजनयेत्पुत्रं पाराशरवचो यथा॥ होयांतदक्षिणां दद्याद्धेनुं वासस्तथा तिलद्रु॥ -
न्नमिंहिरण्यवस्त्राणि यथासंभवमेव वा॥ यः सिद्धमंत्रः सततं द्विजेंद्रः संपूज्य विष्णुं विधि-
वत्सुतार्थी। इदं विधानं विधौ ददाति स सम्यक् पुत्रमाप्नोति हरिप्रसादात्॥ इति वृहत्सारोस्के-
तौ पुत्रकामस्य पुरुषसूक्तविधानं॥ अथास्य संक्षेपेण प्रयोगः॥ सभार्यः पुत्रकामः शु-
भनक्षत्रचंद्रतारा बलयुक्तेकादश्यां कृतनित्यक्रियः प्राणानायम्य देशादि संकी-
र्त्य श्रीविष्णुप्रीतिद्वारा युष्मा सुपुत्रावाप्त्यर्थं वृहत्सारा शरोक्तवेदव्यवचरी विधानं कारि

ष्य इति संकल्प्य पुण्याहवाचनादि कृत्वा श्रोत्रियं वेदज्ञमाचार्यं वृत्वा पुष्पमंडपे श्रीविष्णुरू
ग्विधानोक्तन्यासादिपूर्वकं यथाविधि स्तोत्रांतं पूजयित्वा विशेषपूजापूर्वकं रात्रिं जागर
७४ यित्वा प्रभाते तस्माद्देवस्य दक्षिणभागे कुंडादिकं कारयेत् प्रथमं चतुः प्रोक्षणं तु द्वितीयचे
त्युक्तप्रकारेणाग्निं प्रतिष्ठाप्य पायसं चरुं श्रपयित्वाज्यभागांते कृत्वा चिंतयेत् तत्र देवे
शमिति मंत्रेणाग्नौ॥ विष्णुं ध्यात्वा सहस्रादिषड्भिः पंचोपचारैः कृत्वा घृताक्तस्य पायसस्य समिधोऽष्टो
त्तरसहस्रमष्टशतं वा हुत्वा तथैवाज्यहोमं हुत्वा पुरुषसूक्तेन परमात्मानमुपस्थाय तत
श्चैव पायसचरुं जुहुयात्। होममंत्रास्तु षोडश ऋचः॥ ततः स्विष्टकृदादिहोमशेषं समाप्य राम:
री होमशेषे नारायणं पातिव्रात्वा होमशेषं भक्षयित्वा वामनायिनी भूयात्॥ पतिरपि प्राश्री ७४
यादिति केचित्॥ ततः आचार्याय धेन्वादि दक्षिणां दत्वा ब्राह्मणान् भोजयित्वा तदाशिषो गृ
ह्णीयात्॥ ततो भार्यां गच्छेत्। एवमग्निमशु द्वादश द्वादशीषु कुर्यात्। एवं कृत्वा संतती
क्षुन्न वैष्णवं पुत्रमवाप्नोति साह पाराशरः॥ ॥इति पुत्रकामस्य वैष्णवचरुविधानं

समाप्तमिति॥ ॥श्रीरामो जयति॥ अथ हरिवंशश्रवणविधानं॥ मदनमहार्णवे शातातपप्रोक्तं।
बालघाती च पुरुषो मृतवत्सः प्रजायते। ब्राह्मणोद्वाहनं चैव कर्त्तव्यं तेन शुद्ध्यति। श्रवणं हरि
वंशस्य कर्त्तव्यं च यथाविधि। महारुद्रजपं चैव कारयेच्च यथाविधि। जुहुयाच्च दशांशेन दू
र्वाभिराज्यपरिप्लुताः॥ एकादशसुवर्णनिष्कान् प्रदद्यात् स्वयं च दक्षिणां॥ एकादशपलं श्रेष्ठं वा यथावि
त्तानुसारतः। अन्येभ्योपि यथाशक्त्या द्विजेभ्यो दक्षिणां दिशेत्॥ स्नापयेद्दंपती पश्चान्मंत्रैर्व
रुणदैवतैः॥ आचार्याय प्रदेयानि वस्त्रालंकरणानि च। ब्राह्मणोद्वाहनं चेत्यादि। ब्राह्मणो
द्वाहनस्य पापविमुक्तिहेतुत्वमिदं धानादेतस्य तंत्र तया निष्कृतिः॥ तेन शुध्यतीत्युपयंतीपं
ते काकाक्षवदुभयत्र संबध्यते॥ अतः श्रवणं हरिवंशस्योत्तरवाक्यस्यापि तेन शुध्य
तीसर्वविशेषः। तथा च हरिवंशश्रवणं द्वितीया निष्कृतिः। अथ श्रवणविधिः॥ स्नात्वा गं
गादिसरिति कृताह्निकविधिर्नरः। शुचिः शीलान्वितः चारः शुद्धकेवासा जितेंद्रियः॥ रूपवा
न् सुभगो दांतः कार्यो भवति वाचकः। आविलंबमनायस्तमद्रुतं धीरमूर्जितं। असंसक्ताक्ष

रपदं स्वरभावसमन्वितं। त्रिषष्टिवर्णसंयुक्तमष्टस्थानसमन्वितं वाचयेद्यो युक्तः स्वस्थः स्वा-
सीनः सुसमाहितः॥ ईदृशाद्वाचकाद्राजन् श्रुत्वा फलमवाप्यते। सकृच्छ्रवणमात्रेण श्रुत्वाग्नि-
७५ ष्टोमफलं भवेत्॥ स्वस्तिवाच्य द्विजान्सादौ ततः कार्यं प्रवर्त्तति॥ वाचकं पूजयित्वाथ वस्त्रा-
लंकारभूषणैः। श्रृणुयादादरतरं स्यमादिपर्वपुरःसरम्। इत्यादि सामान्यं। विशेषस्तु। हरिवं-
शे तथा श्रवणे पायसं तत्र भोजयेत्। जपवषश्रवणे प्रोक्तं हरिवंशस्य सूरिभिः॥ इति ॥ अथा-
स्य स्पष्टप्रयोगः। दंपत्योरनुकूले शुभदिने स्नानादि नित्यकर्म निर्वर्त्य स्वस्तिवाचनं कृत्वा-
स्य शक्त्यनुसारेण विनायकशांतिं पूजां वा कृत्वा पुत्रकामनया हरिवंशश्रवणं करिष्य इति रामः ७५
संकल्पयेत्॥ अथवा देशादि संकीर्त्य पूर्वजन्मोपार्जितपापजन्यानपत्यदोषपरिहारपूर्वकं
शुभलग्नं नीरोगदीर्घायुःसुगुणपुत्रसंतानप्राप्तिकामो आवां दंपती यथोक्तनियमपूर्वकं
हरिवंशश्रवणं करिष्यावहे करिष्य इति वा संकल्पयेत्॥ नियमास्तु॥ एककालाशनश्चैव
वाऽधःशायी भवेन्नरः॥ स्यात्तेन ब्रह्मचर्येण यावद्ग्रंथः समाप्यते॥ इति अथ वाचकवरणं॥

पूर्वोक्तरीत्या संकल्पवाक्यमुक्त्वा तदर्थं ब्राह्मणं वरणं करिष्यावहे चरणप्रक्षालनवस्त्रालंकार-
चंदनाक्षतपुष्पमाल्यादिभिस्तमभ्यर्च्य हिरण्यतांबूलपुगीफलैः सहितं करे अमुकगोत्रममुक-
शर्माणं ब्राह्मणं त्वां वाचकत्वेन दंपती वृणावहे इत्युक्त्वा हिरण्यादि दद्यात्। वृतोस्मीति तेनोक्ते
तेन दीक्षाभिमंत्रेण दक्षिणकरे रक्षाबंधं कुर्यात्॥ ब्राह्मणेन च यजमानयो रक्षाबंधनं कार्यं॥
अनंतरं दंपती प्रार्थयेतां। मंत्रस्तु। नमस्ते भगवन्व्यास सर्वशास्त्रार्थकोविद। ब्रह्मविष्णुमहेशा-
नां मूर्तेः सत्यवतीसुत॥ इत्युक्त्वा शुभे देशे कुशासने उपविश्य श्रीकृष्णं परमात्मानं ध्यायंत श्रृणु-
यातां॥ श्रवणदेशस्तु॥ शिवालये गृहे गोष्ठे देवतासदने तथा॥ वृंदावने नदीतीरे तथैव च गुरो-
र्गृहे पुराणं श्रृणुयाद्ध्यायं यथोक्तविधिना गृही॥ विधानसहितं सम्यक् पुराणं फलदं भवे-
त् तस्माद्विधानसंयुक्तं पुराणं श्रृणुयान्नर इति॥ ततश्च प्रतिदिनं पूर्वाह्णे स्नात्वालंकृतौ
त दंपती तावेकचित्तेन श्रृणुयातां॥ प्रतिदिनमाचार्यं पुस्तकं च पूजयेत्॥ अंते च स्वलंकृतां
गां पयस्विनीं सवत्सां स्वर्णशृंगीं रौप्यखुरां ताम्रपृष्ठां कांस्यदोहनां सदक्षिणां दद्यात्॥

सुवर्णशृंगादिपरिमाणं तु हेमाद्रौ॥ मात्स्ये॥ दशसौवर्णिके शृंगे खुराः पंचपलान्विताः॥ पंचा-
शत्पलकं कांस्यं ताम्रं चापि तथैव च॥ श्वेता गौर्वृद्धये दत्ता रक्ता सौभाग्यदायिनी॥ गवामंगे-
७९ षु तिष्ठती॥ ति गोदानमंत्रः॥ ततश्च॥ ब्राह्मणान्विवाहेण कं प्रायश्चित्तं द्वितीयं हरिवंशोत्थं गो-
~~स्वत सौ ब्राह्मणं दं डं दद्याद्विजातयो न धंमस्याप्यैकाभीचरेत्को तन्वयं श्रोत्रियाय कुटुंबिने॥ इह~~
वंशश्रवणं तृतीयं महारुद्रजप इति॥ एतानि त्रीण्यपि शक्त्याद्यपेक्षया व्यस्तानि समस्तानि वा यो-
ज्यानि॥ महारुद्रलक्षणं दशांशहोमप्रकारोप्यग्रे वक्ष्यते॥ एकादशपशुश्चेति पशवोत्र गावः॥
न दायगामिति श्रुतेः॥ वरुणदेवता मंत्राः कस्यनूनं कतमस्यामृतानामित्येवमादयः॥ स्वस्वशा-
खोक्ता वारुणा मंत्राः॥ ॥इति श्रीमदनंतभट्टविरचिते विधानपारिजाते हरिवंशश्रवणवि- रामः ७९
धानं॥ अथ पार्थिवलिंगपूजाविधानं लिंगपुराणे॥ सरस्वत्यास्तटे रम्ये शौनकाद्यास्तपोधनाः
॥ सूतं परमया भक्त्या पप्रच्छुः परमादरात्॥१॥ ऋषय ऊचुः॥ सूत शंकरधर्मज्ञ मन्मथं कीदृशं-
शिवं॥ लिंगपूज्यं महाभक्त्या विधानं तत्र कीदृशं॥२॥ किंपरत्वं चास्य तत्सर्वं कथयाशु प्रसन्नधीः

यतो भस्मत्रिपुंड्रांकाः नित्यं रुद्राक्षधारिणः॥ ॥सूत उवाच॥ शृणुध्वमृषयः सर्वे लिंगव्रतमनुत्त-
मं॥ नारदाय पुरा सम्यक्कथितं सनकादिकैः॥४॥ तेभ्यः सर्ववतीसत्ताः सर्वज्ञः करुणानिधिः॥
कथयामास महत्त्वं च व्रतं करणाया गुरुः॥५॥ कदाचिन्नारदश्चरन्कैलासं मंदरं ययौ॥ तत्रासी-
नं महादेवं पार्वतीपरमेश्वरं॥६॥ ॥प्रदक्षिणात्रयं कृत्वा नमस्कृत्य पुनः पुनः॥ पप्रच्छ प-
रयाभक्त्या नारदो देवदर्शनः॥७॥ केन देवविधानेन मुक्तिर्युक्तिश्च वै नृणां तत्सर्वं कथयाशु त्वा
यागव्यास्य हं यदि॥८॥ सर्वपापक्षयकरं सर्वविघ्नविनाशनं॥ सर्वसंपत्प्रदं चैव कलौ स्य
व्रतसिद्धिदं॥९॥ ईश्वर उवाच॥ शृणु नारद वक्ष्यामि लिंगपूजाविधानकं॥ यस्य पूजनमात्रे-
णा कृतकृत्यो भवेन्नरः॥१०॥ मृदश्च तु विविधा विद्धि सिताः॥ केदाः श्वेतः॥ पीता रक्ता द्विजा-
दीनां तु यथाक्रमं॥११॥ गत्वा स्थलं नमस्कृत्य मंत्रमेतं समुच्चरेत्॥ सर्वाधारध-
धरस्तपतल कृ ममृत्तिकामिमां॥ ग्रहीष्यामि प्रसन्नाहं लिंगार्थं च दनुज्ञया॥ यावत्स्याद्नना-
नाशिक्तिर्मदंता व समुद्धिपेत्॥ नोचेत्तदर्धंति स्वर्वस्या धर्णवं पलद्वयाच्चितं॥ तस्मान्स्वर-

तं न कर्त्तव्यमधिकं वैकदाचन॥१४॥ बहुमानं प्रदद्याद्वै उत्तमं मध्यमं तथा॥ अंगुष्ठमात्रं तदूर्ध्वं तु
७७ कनिष्ठं स्यात्ततः परं॥१५॥ अष्टाङ्गुल्यपरीमाणं न लिंगं कुत्रचिन्नरः॥ कुर्वीत गृहस्थो हि स्वयं न कदाचि
समाचरेत्॥ अष्टोत्तरशीतिलिकाः॥ इदं च परिमाणं प्रधानं लिंगस्य॥ न वेदिकाया इति ज्ञेयं॥ ॥आ
नीयारण्यमध्यात्तु नदीतीरे सरस्यपि जलाशये चान्यस्मिन्नंतिके स्थापयेन्मृदं॥ शुद्धेन वारिणा
युक्तां मापो वेति मंत्रतः॥ नाममंत्रेण शैवेन प्रणवेन युतेन च॥ तृणकंटककाष्ठादिकर्करोपलसंस्कृ
तं॥ कर्करादिविवर्जितेन विरुद्धफलदायकं॥१८॥ लज्जेयं तेन महात्मानो द्विजेंद्रैः कदाचन॥॥ स्त्रीतरित्र
पुंड्रबलिभिर्दीप्तमात्मनः शिवं स्मरेत्॥ रुद्राक्षमालासहितो भस्मापरमयायुतः॥ शुद्धभावसमन्वितो राम: ७७
मायुक्तः कृतसंकल्पो निश्चयः॥२०॥ रुद्रस्य पूजनं पंचकुर्याद्धरायेति नमोनमः॥ पीठस्यैहनं कुर्याद्
पीठं कुर्याद्यथाविधि॥ शालुकं वर्तुलं चास्य मानं याद्दशमीरितं॥ पीठसंघटनं पूर्वं पीठं कुर्याद्यथा
विधि॥ शालुकं वर्तुलं चास्य मानं याद्दशमीरितं॥ तस्य त्रमानं पीठं स्यात्परिणामे हस्त्याधिकं॥
पीठार्द्धं बिंबतो बिंबमपरं दीर्घसूत्रकं॥ समानबिंबतः सूत्रं मंत्रतः सूत्रमानकं॥ तदर्द्धं हि प्रनालं

स्यादेवं सूत्रविनिर्मितं लिंगमेवंविधं कृत्वा सुंदरं परमं शुभं सर्वलक्षणसंयुक्तमभीष्टफलदा-
लदायकं॥ पंचवक्त्रं त्रिनयनं चतुर्बाहुं महेश्वरं॥२५॥ नागयज्ञोपवीतं च व्याघ्रचर्मोत्तरीयकं
॥ हिमखंडनिभं दीप्तं नीलकंठं शिवान्वितं॥ नमो महेश्वरागच्छ देवदेव जगत्पते॥ प्रसादं कु-
रु मे देव सर्वपापप्रणाशन॥ आवाहयेन्महादेवमापो देवेति मंत्रतः॥ पंचाक्षरेण चाधीर
मानात्मापोहिष्ठेति पोडषैः॥ मंत्रैः स्थाप्य महादेवमासनस्थं हि मंत्रतः॥ अर्चयेत्करवी
रादैर्गंधाद्यैरुपचारकैः॥ धूपदीपादिनैवेद्यैस्तांबूलफलसंयुतैः॥ पंचाक्षरेण मंत्रे-
ण तथा मृत्युंजयेन च॥ कातामंत्रेणवादेवं पूजयेत्परमेश्वरं॥ हरो महेश्वरः शंभुः शूल
पाणिः पिनाकधृक्॥२७॥ रुद्रः पशुपतिश्चैव महादेवेति विसर्जनं॥ नमः पूर्वं चतुर्थ्यंते
मंत्रैश्चैतैर्द्विजन्मनां॥ अन्येषामेकजं लनां न सोंताश्च प्रकीर्त्तिताः॥ स्त्रीणां संकरजा-
तीनां व्रतमेतदनुत्तमं॥ पार्थिवं पूजयेद्विज्ञः सर्वकामप्रदं मुने॥ पाषाणे रजते देशे दर्भौ
निरितसंस्थले पुष्पप्रकाशसंयुक्ते पात्रे वा वेदिकाभुवि। पूजयेत्पार्थिवं लिंगं सदा

प्रसयकरणं॥ २५॥ आयाहि मगर्वच्छंभो सर्वज्ञ गिरिजायते॥ प्रसन्नो भव देवेशं नमस्तुभ्यं
हि शंकरः॥ आवाहनं॥ विश्वेश्वर महाराज राजराजप्रियेश्वर॥ आसनं दिव्यमीशान
७८ स्यहं परमेश्वर॥ आसनं॥ महादेव महेशान महानंदपरायण॥ पाद्यं गृहाण देवेश या
र्वसासहितेश्वर॥ पाद्यं॥ त्र्यंबक महादेव विपदादिविधायक॥ अर्घ्यं गृहाण देवेशा
सांब सर्वार्थदायक॥ अर्घ्यं त्रिपुरांतक दीनार्तिनाशश्रीकंठ मर्त्तिर्घ्यकं॥ गृहाणाचम
नं चारु पवित्रोदक कल्पितं॥ आचमनं॥ त्रिकाग्निकालकालादि संहारकरणोद्यत॥
स्नानं तीर्थाहृतै स्तोयैर्गृहाण परमेश्वरः॥ स्नानं॥ कालाग्निरुद्र सर्वज्ञ वरदानयदा रा.म.
यक॥ वस्त्रं गृहाण देवेश दिव्यं गंधोप शोभितं॥ वस्त्रं॥ पुनराचमनं दत्वा दद्याद्यज्ञो ७८
पवीतकं नीलकंठोपवीतं च मया दत्तं गृहाण भोः॥ यज्ञोपवीतं॥ सर्वेश्वर जगद्वंद्य दि
व्यासन समास्थित॥ गंधं गृहाण देवेश दिव्य गंधसमन्वितं॥ गंधं॥ सदाशिव शिवानं
दकारण शगणेश्वर॥ पुष्पाणि बिल्वपत्राणि विचित्राणि गृहाण भोः॥ पुष्पं॥ महादे

व मृडानीश जगदीश निरंजन॥ धूपं गृहाण देवेश माज्यं गुग्गुलधूपितं॥ धूपं॥ हिरण्यबा
हो स्वनानामीशानेशापते शिव॥ दीपं गृहाण देवेश कपिलज्योतिवर्त्तिकं॥ दीपं॥ अन्ना
नामपि सर्वेषां पते दीनार्तिनाशक॥ षड्रसैश्च समायुक्तं गृहाणान्नं निवेदितं॥ नैवेद्यं
॥ राजाधिराज सर्वेश निराकार निरास्पद॥ फलं गृहाण संदिव्या नारिकेलादिकं परं॥ फल
लं॥ शाश्वत प्रमथाधीश मदनांतक धूर्जटे॥ गृहाण पूगतांबूल दलं च सुखादिरं॥ तांबू
लं॥ हिरण्य गर्भ लोकेश हेमबीजं विभावसोः॥ अनंतपुण्य फलद मतः शांतिं प्रयच्छ मे॥ द
क्षिणां॥ हर विश्वाखिलाधार निराधार निराश्रय॥ पुष्पांजलिमिमं शंभो गृहाण वरदो
भव॥ पुष्पांजलिः॥ यानि कानि च पापानि ब्रह्महत्यानि शतानि च॥ गृहाणे शमेया दत्ताना
शयंति प्रदक्षिणाः॥ प्रदक्षिणाः॥ मृडानीनाथ ते सर्वान् अपराधाननेकशः॥ क्षमेस्वेति प्र
णामीमां तोगृहाण साष्टांग संयुतं॥ नमस्कारं॥ ईशान सर्वविद्यानामोंकार भुवनेश्वरा
मंदिरं गच्छ देवेश पुनरायाहि संकरः॥ विसर्जनं॥ तत्र कादाहृतं लिंगं जले सम्यग्द्विसर्जयेत्

वेशयेत्॥ अष्टदश्रविधयेवापिस्थापयेद्युतिमान्सुधीः॥ श्रौतस्मार्त्तसदाचारैर्ब्राह्मणो वेदमंत्रतः
॥ पंचाक्षरेण स्वपूजाकर्त्तव्या नियतात्मभिः मदानयनसाक्षीकंकरणं लिंगयोजने॥ प्रतिष्ठाका
७८ ले स्नपनपूजनं च विसर्जनं॥ ५८॥ भवः शर्वो महारुद्रस्तथा पशुपतिस्त्रयः॥ उग्रश्च स्यात्सोमहा
भीमस्तथैशानो ष्टभिः क्रमात्॥ हरो महेश्वरः शंभुः शूलपाणिः पिनाकधृत्॥ शिवः पशुपतिः
श्चैव महादेवेति विसर्जनं॥ ५६॥ इति पूजा॥ ऋषय ऊचुः सर्वप्रयत्नेन पार्थिवलिंगमुत्तमं॥ कर्त्तव्यं हि
वो भि नित्यं कामसमृद्धये यत्नतः॥ तल्लिंगं पार्थिवं श्लक्ष्णं भुक्तिमुक्तिप्रदायकं॥ वाणलिंगं वित्तप्रदं
लिंगं स्फटिकं सर्वकामदं॥ नर्मदागिरिजं श्रेष्ठमन्यथा वा विधिर्लिंगयेत्॥ न कृस्नगोशकृति रा०म०ः
ष्टतास्रकं स्यमयं तथा॥ कृत्वा लिंगं सकृत्पूज्य वसेत्कल्पायुतं दिवि॥ न करोति यदि ज्ञात्वा मैन ७८
कार्यं तस्य सिध्यति॥ दशिका सकर्वं ज्ञात्वा कुर्याल्लिंगफलप्रदं॥ विद्यार्थी लिंगसाहस्रं धना
र्थी च तदर्धकं॥ पुत्रार्थी सार्धसाहस्रकं न्यार्थी तु शतत्रयं॥ वंध्या लिंगायुतं कुर्याच्चेद्गर्भं च
ती भवेत्॥ राज्यार्थी शतसाहस्रं कीर्त्यर्थी शतपंचकं॥ मोक्षार्थी कोटिगुणितं भूकाम श्रस

हस्रकं॥ रूपार्थी तु त्रिसाहस्रं तीर्थार्थी द्विसहस्रकं॥ सुहृत्कामस्य हस्रं स्याद्वश्यार्थी शतष्टकं॥
मारणार्थी सप्त शतं मोहनार्थी शताष्टकं॥ उच्चाटनपरश्चैव सहस्रं तु यथोक्ततः॥ स्तंभने तु सहस्रे
णाजारणे तु दर्धकं॥ निगडान्मुक्तिकामस्य सहस्रं सार्धमीरितं॥ महाराजभये पंच शतं चौ
रादिसंकटे॥ शतद्वयं च डाकिन्याभये पंचशतं परं॥ दरिद्रः पंचसाहस्रं ययुतं सर्वकामदं॥
एकं पापहरं प्रोक्तं द्विलिंगं चार्थसिद्धिदं॥ त्रिलिंगं सर्वकामानां कारणं परमं स्मृतं॥ उत्तरोत्तर
मेवं स्यात्पूर्वोक्तगणनाविधिः॥ ७०॥ कृत्वा यथोक्तविधिना पापं नाशयति क्षणात्॥ लिंगा
नामयुतं कृत्वा महाराज्यभयं हरेत्॥ सहस्रमेकं लिंगानां चोरादिभयं हरेत्॥ हेसैरचाणि
तथा पंचपुत्रकामेन कारयेत्॥ कृत्वानि सेविधाने न सुगुणि सुतमाप्नुयात्॥ ७५॥ ब्रह्ममेकं तु
लिंगानां यः करोति नरो भुवि॥ शिवल्लभ वेन्नित्यं नाकार्या विचारणा॥ लिंगानामयुतं चैव न्यका
स सत्तिमुने॥ एकलिंगार्चनान्नित्यमतुलां श्रियमाप्नुयात्॥ अर्चाच्चा पार्थिवलिंगानां कोटियज्ञ
फलं लभेत्॥ ब्राह्मणस्य कामसमृद्धिर्विधानं न च कारयेत्॥ रुद्रपुत्रं समासात् स्तुति निर्भूमं सचराचरं॥

पुत्रकामो वसिष्ठोपि सकरोल्लिंगपूजनं॥ शक्तिपुत्रं समासाद्य निर्व्यथो ज्ञानवानभूत्॥ तथापरा-
शरो योगी लिंगव्रतमनुत्तमं॥ चकार ज्ञानलाभार्थं स वेदज्ञः शिवद्रुमः॥ व्यासोपि परया भक्त्या लिं-
८० गव्रतमिदं परं॥ ८०॥ चकार सकलं शास्त्रं व्रतस्यास्य प्रभावतः॥ शतर्चनादयः सर्वे बालखिल्याः सक-
लागणाः॥ गोविंदप्रमुखा देवाः श्रीमच्छच्यादयः पराः॥ अरुंधत्यादयश्चैव गौतमाद्यास्तपो-
धनाः॥ दधीचिप्रमुखाः सर्वे चक्रुः प्राप्तमनोरथाः॥ तस्मान्नारद यत्नेन कथयापुष्टरूपीमति॥
नारद ८१॥ कथमुद्यापनं चास्य कुर्यात्तु लभ्यं महाफलं॥ कथयस्व महादेव लोकानामुपकार-
क॥ ८२॥ ईश्वर उवाच॥ देशिकेतु समासाद्य पूजां प्राप्तमनोरथः॥ तस्यमाणं तु सौवर्णं यथा- रामे: ८०
शक्त्याथवा पुमान्॥ रौप्यं ताम्रं तथापि स्याद्दश्म्या च यथोक्ततः॥ चतुर्दश्यां तथा दर्शायां से-
मे वाथ प्रपूजयेत्॥ उपोष्य प्रथमे चाह्नि संपूज्य परमेश्वरं॥ चतुर्दश्यां ह्यमायुक्ता अष्ट-
म्यां नवमीं तथा॥ पारणं तत्र कुर्वीत नरो प्रयुक्तः पुनर्वसुः पंचैकादशं च द्वाभ्यामधिकां विंश-
तिः परा॥ ॥ चत्वारिंशच्छतं तु मिश्रब्राह्मणांश्चान्वरयेवती॥ ॥ गीतवादिप्रतिघोषैर्जा-

गरैर्विविधैरपि॥ स्तोत्रैश्च वैदिकैः सूक्तैस्तोषयेत्परमेश्वरम्॥ ॥ मत्तेकामाच्छिवस्य वचनं यथा
॥ रागादिरहितः शांतो हविष्यान्नस्य सेवकः॥ नक्षत्रादिशुभे काले व्रतमेतत्समाचरेत् इति॥
यथोक्ते काले आरंभं कृत्वा कामनानुसारेण संकल्प्य हरायनमः इति मृत्तिकाग्रहणं॥ महेश्व-
रायनमः इति लिंगघटनं॥ ॥ तत्र देवं ध्यायेत्॥ ॥ ध्यायेन्नित्यं महेशं रजतगिरिनिभं चा-
रुचंद्रावतंसं रत्नाकल्पोज्ज्वलांगं परशुमृगवराभीतिहस्तं प्रसन्नं॥ पद्मासीनं समंतात्स्तुत-
ममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्वबीजं निखिलभयहरं पंचवक्त्रं त्रिनेत्रं॥ अनेनस्को-
नेस्मिन् लिंगे च ध्यानं कुर्यात्। शूलपाणे। ॐ आँ ह्रीं क्रौं यं रं लं वं शं षं सं हं शूलपाणे॥ प्राणा इह
प्राणाः। आँ ह्रीं क्रौं यं रं लं वं शं षं सं हं शूलपाणेः सर्वेंद्रियाणि॥ ॐ आँ ह्रीं क्रौं यं रं लं वं शं षं सं हं
शूलपाणे वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठंतु स्वाहा इति मंत्रेण
प्रतिष्ठाप्य॥ पिनाकपाणे आगच्छ यावत्पूजां करोम्यहं इति वदन्नाधिष्ठानं कुर्वीत स्थापनं॥ मृ-
त्युंजयेन पशुपतय इति नाममंत्रेण वा उवहिन्यादि स्नानं वस्त्रौरस्थलं काराचमनं चंदनाक्षत

पुष्पबिल्वपत्रधूपदीपनैवेद्याचमनकरोद्वर्त्तनिकूर्चतांबूलदक्षिणानीराजनानि कृत्वा पुष्पांज-
लिं दद्यात्तत्र मंत्राः॥ ॐ शर्वाय पृथिवीमूर्त्तये नमः इति ऐशान्यां॥१॥ भवाय जलमूर्त्तये नमः इति प्रा-
८१ च्यां॥२॥ रुद्राय तेजोमूर्त्तये नमः इत्याग्नेय्यां॥३॥ उग्राय सोममूर्त्तये नमः इति दक्षिणस्यां॥४॥ भी-
माय आकाशमूर्त्तये नमः इति नैर्ऋत्यां॥५॥ पशुपतये यजमानमूर्त्तये नमः इति वारुण्यां॥६॥ महादे-
वाय सोममूर्त्तये नमः इति वायव्यां॥७॥ ईशानाय सूर्यमूर्त्तये नमः इति उत्तरस्यां॥८॥ ॐ नमः शिवा-
येति लिंगोपरि पुष्पांजलिं दद्यात्॥ वस्त्वभावे भावनाकार्या॥ ॥ वामे गौर्यै नमः॥ दक्षिणे॥
विघ्नेशाय नमः॥ ॥ सर्वपरिवारेभ्यो नंद्यादि देवेभ्यो नमः॥ ॥ विश्वेश्वरं विरूपाक्षं यादृग्मंत्रैर्नम- रामः
स्कृत्वा स्तुवीत॥ ॥ यथा॥ ॐ नमोंकाररूपाय नमो ह्रस्व वपुषे नमो नादात्मने तुभ्यं नमो बिं- ८१
दुकालात्मने॥१॥ अलिंगलिंगरूपाय रूपातीताय ते नमः॥ त्वं माता सर्वलोकानां त्वमेव जगतः पि-
ता॥ त्वं भ्राता त्वं सुहृन्मित्रं त्वं प्रियस्त्वं पितामहः॥ नमस्ते भगवन्रुद्र भास्करामिततेजसे नमो भ-
वाय देवाय उमया सहिताय च॥४॥ सर्वाय क्षितिरूपाय सदा सुरभिणे नमः॥ ईशानाय वायवे

तुभ्यं संस्पर्शयिते नमः॥५॥ पशूनां पतये चैव पावकामिततेजसे॥ भीमाय व्योमरूपाय शब्दमा-
त्राय ते नमः॥६॥ महादेवाय सोमाय अमृताय नमोस्तु ते॥ उग्राय यजमानाय नमस्ते कर्म-
योगिने॥७॥ पार्थिवस्य च लिंगस्य यन्मया पूजनं कृतं॥ तेन श्रीभगवान्रुद्रो वांछितार्थं प्र-
यच्छतु॥ इति स्तुत्वा नत्वा लिंगं प्रतिपद्य सर्जयेत्॥८॥ हरो महेश्वरः शंभुः शूलपाणिः पिनाक-
धृक्॥ शिवः पशुपतिः श्रेष्ठः महेश्वर स्थेति विसर्जयेत्॥ स्वहस्त त्रीणि परे त्रु॥ अष्टौ पूजा मंत्राः॥ इति
पार्थिवलिंगपूजाप्रयोगः॥ अथ सर्पसंस्कारविधानं॥ ॥ शौनकीये॥ अथ वक्ष्यामि सर्पस्य
संस्कारविधिमुत्तमं॥ सिनीवाल्यां पौर्णमास्यां पंचम्यां कारयेत्ततः॥ आश्लेषार्क्षयुक्तायामा-
न्यस्यां वा तु कारयेत्॥ कृतसर्पवधो विप्रः पूर्वजन्मनि वेह वा॥ अनेकदुःखजालानि प्राप्नोति-
सततं नरः॥ संततिप्रतिबंधश्च जातापत्यं विनश्यति। तस्य शांतिं प्रवक्ष्यामि येन संपद्यते सुख-
ं॥ स्नात्वा गत्य ततो ब्रह्मन्दं उं द्वाद्विजातये॥ वधं प्रख्यापयेत्पापी चरेत्कृच्छ्रं चतुर्दश॥ व-
धे हृजन्मनि कृतो येह दं उद्विजातये दद्यात्सार्चं पशुं रूप्यं श्रोत्रियाय कुटुंबिने॥ इह जन्मनि

बध्यः हतो येनेति विग्रहः वधेहजन्मनिकृते इति पाठे इह शब्दस्येकारलोपश्छान्दसः इति प्रष्ट
व्यां विप्राय दंडमौल्यं वा तदभावे सति दापयेत्॥ साक्षाद्दुर्धर्षकर्म कश्चिद्वरेत देव प्रदापयेत्॥ नि
८२ ष्कत्रयं द्विनिष्कं वा निष्कमेकं कनीयसं॥ अनुमत्यादिकर्तृहेषां निष्कमर्द्धं तदर्धकं॥ वित्तशा
ठ्यं न कुर्वीत दद्याद्वित्तानुसारतः॥ अनुज्ञां च गुरोर्लब्ध्वा संस्कुर्यात्तदनंतरं॥ प्रियंगुव्रीहि
गोधूमतिलापिष्टेन वा यवैः॥ कृत्वा सर्पाकृतिं तेन नववस्त्रेण निधापयेत्॥ ॥ अनेन वक्ष्यमा
णेन मंत्रेण प्रार्थयेदहिं॥ एहि पूर्वं मृतः सर्प अस्मिन्पिष्टे समाविश॥ संस्कारार्थमहं
त्वां प्रार्थयामि समाहितः॥ वस्त्रोपवीतगंधाद्यैरक्षतैः कुसुमादिभिः॥ कर्तापुष्पां रामः ८२
जलिं दत्वा प्राणिपत्य हरेद्दहिं॥ प्रक्षालितांघ्रिपाणिस्तु आचम्योपविशेच्छुचिः॥ कुर्यात्
संस्कारसत्कल्पं प्राणायामपुरःसरं॥ यज्ञोपवीतिना कार्यं सर्पसंस्कारकर्म तु॥
६१ लौकिकाग्निप्रतिष्ठाप्य समिधानमाचरेत्॥ अग्नेराग्नेयदिग्भागे भूमिं संप्रोक्ष्य वारिभिः॥
चितिं कृत्वाथ संस्तीर्य कुशैराग्नेयकाग्रकैः॥ ॥ पयु— क्ष्याग्निं परिस्तीर्य परिषिच्य स

मर्चयेत्॥ कृत्वेध्माधानपर्यंतं षट्पात्रासादनादिकं॥ आघारौ चक्षुषी हुत्वा सर्पिषा च यथाविधि॥
सर्पं गृहीत्वा यत्नेन चितिमारोपयेत्सुधीः॥ अपः स्पृष्ट्वा स्वरोहे तत्र गत्वाग्निसमीपतः॥ स्रुवे
ण जुहुयादाज्यमग्नौ व्याहृतिभिस्त्रिभिः॥ त्रिभिरित्वार्थं॥ सर्वा सर्पे जुहुयादाज्यं व्याहृत्या वा समस्त
या॥ आज्यशेषं स्रुवेणैव सर्पदेहे विषेचयेत्॥ चमसस्थोदकैः सर्पं व्याहृत्याऽभ्युक्ष्य पाणिना॥
अग्नेरक्षतालाहस्य चास्य सर्पाग्निं प्रदीपयेत्॥ उपतिष्ठेद्दह्यमानं नमोस्तु सर्प इत्यतः॥ एते मंत्रा वाज
सनेयके ग्निचयनकांडे निहिताः॥ तस्मात्तु प्रयोगे स्यादेव भविष्यति॥ ज्ञानतोऽज्ञानतो वापि कृतः स
र्पवधो मया॥ पूर्वजन्मनि वा सर्प तत्सर्वं क्षमस्व मे॥ प्रजां देहि पशून्देहि आरोग्यं सर्वदास्तु ते॥ जन्म
जन्मनि नैवेयं बुद्धिरस्तु सदा मम॥ इति संप्रार्थ्य नागेंद्रं स्नात्वा गत्वा ततः पुनः॥ क्षीराज्येन तत्र अग्निं
प्रोक्ष्य व्याहृतिभिस्त्रिभिः॥ त्रिभिरिति विशेषणात्तु त्र्यंबकः प्रोक्ष्यामीत्यादि प्रयोगः॥ कृते सर्पे जले
नाग्निमभिषिच्य ततः परं॥ नास्थिसंचयनं कुर्यात्स्नात्वा च स्वगृहं व्रजेत्॥ नास्थिसंचयनं
कुर्यादित्युक्तेऽस्थिसंचयनमात्रनिषेधादन्यप्रेतक्रियात्रापि भवतीति केचित्॥ पावदवचनं

पावनिकमितिन्यायापन्नमवतीतिसंप्रदायविदः॥ ॥ब्रह्मचर्यादिकंकार्यंत्रिरात्रात्कुर्द्धिरि
ष्यति॥चतुर्थेह्निसंप्राप्तेसचेलंस्नानमाचरेत्॥घृतपायसभक्षैस्तुविप्रानर्चयेद्दशमा
नकैः॥सर्पोनंतस्तथाशेषः॥कपिलोनागएवच॥कलियःशंखपालस्तुमत्स्यरश्चप्रकीर्तितः
८३ ॥पादप्राक्षालनंकुर्यादेभिर्नामपदैःपृथक्॥गंधपुष्पाक्षतैर्धूपदीपाद्यैरर्चयेद्द्विजान्॥
एवंविधानेस्मिन्सर्पसंस्कारकर्मणि॥सर्पहास्नातःपापान्मुच्यतेनात्रसंशयः॥कुष्ठा
दिव्याधियुक्तस्यसर्वथाभेषजंस्मृतं॥आयुरारोग्यमैश्वर्यंप्राप्यकामाननुवाप्नुयात्॥अपुत्रो रा म:
लभतेपुत्रमधनोधनवान्भवेत्॥रोग्यारोग्यमवाप्नोतिशौनकस्यवचोयथा॥इतिशौनकी- ८३
यमहावाक्यानि॥अथास्यप्रयोगः॥प्रस्तूयते॥सचमध्यानोऽनंतादिनाशानेसर्पसंस्कार
स्या विधिर्व्याख्यातोदक्षिणोत्तरायणयोरमावास्यांमांपौर्णमास्यांवापंचम्यांवाश्लेषान-
क्षत्रेवाप्रक्रियतइत्यादिबौधायनसूत्रेविशेषधर्मविशिष्टःकथ्यते॥साकांक्षत्वेणाम
तः॥पूरणंकर्तव्यमितिवचनात्॥सर्वोपसंहारन्यायाश्रयस्यथा॥इहजन्मनिजन्मांतरेवाहे

का

तस्सर्पवधोविप्रःपौर्णमास्याममावास्यायांवापंचम्यांवाश्लेषानक्षत्रेवादक्षिणायनेउत्त
रायणेवासर्पसंस्कारंकुर्यात्॥जन्मांतरेसर्पवधजानंतुकुष्ठरोगापुत्रत्वाधनत्वादिफल
लक्षणागतलिंगेनभवति॥तत्रप्रायश्चित्तंचतुर्दशकृच्छ्रात्मकंप्रत्यक्तौयदिप्रत्येसा
सामर्थ्येनक्तंवा॥एकभक्तेननक्तेनतथैवार्धंतेनच॥उपवासेनचैकेनपादकृच्छ्रःप्र
कीर्तितः॥यथाकथंचित्त्रिगुणःप्राजापत्योऽयमुच्यतेइतियाज्ञवल्क्योक्तमुख्यपक्षे
णावापूर्वोत्तरांगसहितंकार्यंपुनःकृत्त्वादिनास्नात्वा॥तत्रविशेषः॥परिषदमुपवेश्यतीर्थेस
चेलंस्नात्वाबहिरागत्यसमस्तसंपदित्यादिश्लोकोक्तरीत्यापरिषदंप्रदक्षिणीकृत्यनत्वापुर
तोब्रह्मदंडंनिधायसाष्टांगंप्रणमेत्॥ततःकिंतेकार्यमितिपरिषदापृष्टोमयाइहजन्म
निजन्मांतरेवासर्पवधःकृतस्तद्दृश्यमेप्रायश्चित्तमुपदिशंतुभवंतइतिपरिषदंप्रतिब्रूया
त्॥अथपरिषदायथापरस्परानुमत्यातस्यशक्तिंविमृश्यमुख्यपक्षेणप्रत्याम्नायेनवाचतुर्द
शकृच्छ्राचरणपूर्वकंसर्पसंस्कारेकृतेकृतार्थोभविष्यसीतिवक्तव्यं॥एवमाज्ञप्तोब्राह्मणा

न्संपद्भ्यविसर्जयित्वा व पर्नं कृत्वा दशस्नातानि विधाय प्रायश्चित्त पूर्वांगानि कृत्वा मुख्यप्र-
क्षैमै गवा गावादि प्रत्याम्नायेन वा चतुर्दशकृच्छ्रं स्मरित्वोत्तरांगानि च कुर्यात्॥ प्रायश्चित्त
८४ प्रयोगस्तु विद्भुत्श्राद्धप्रयोगे कथितः॥ तत इह जन्मनि चेत्कृतसर्पवधः कर्त्ता तदा प्रायश्चि-
त्तायकुटुंबिने विप्राय महान्तं लोहदंडं दद्यात्॥ लोहदंडासंभवे दंडमौल्यं दद्यात्॥ लोह-
दंडादानं तु साक्षाद्वधकर्तुरेव॥ जन्मांतरे वधकर्तुर्न भवति साक्षात्त्वाभावात्॥ अन्यानु-
मत्या वधकर्तॄणां तु त्रिनिष्कादिनिष्कैकनिष्कार्द्धनिष्काणां दानं विभवानुसारेण कर्त्तव्यं रा.म.
भवति॥ स्यात्ति वित्तेशाठ्यं न कुर्यात्॥ कृते कर्मसमृद्धिः स्यात्॥ एवं पूर्वांगं विधाय मध्ये कु- ८४
कुर्त्तदिने कृतनित्यक्रियसंभृतसंभारो यजमान आचार्यं वृणुयात्॥ अस्मिन्सर्पसंस्कार-
कर्मणि आचार्यत्वेन त्वामहं वृणे इति प्रयोगः॥ तद्धस्ते पूगीफलं दत्वा वस्त्रादिकं दद्या-
त्॥ ततोस्मिन्सर्पसंस्कारे मम आज्ञां देहीति ब्रूयात्॥ ततः ॐ मनुतिष्ठ त्वाचार्येणानुज्ञातो
गृहादेशुचौ देशे गोमयेनोपलिप्यापोहिष्ठेति त्रिभिर्मंत्रैर्वा दिशा संप्रोक्ष्य पंचगव्यामंत्रैः

पंचगव्येन च संप्रोक्ष्य इयं वेदिः परोमंतरिति वेदिं स्पृष्ट्वा॥ यदत्र संस्थितं भूतं स्थानमाश्रि-
त्य सर्वदा॥ स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु॥ अपक्रामंतु भूतानि पिशाचाः सर्वे
तो दिशं॥ सर्वेषामविरोधेन ब्रह्मकर्म समारभे॥ अपसर्पंतु ये भूता ये भूता भुवि संस्थिताः
ये भूता विघ्नकर्त्तारस्ते नश्यंतु विष्णोदेवयजनं रक्षस्वेति वेदिं संशोध्य मध्ये स्थाद्यपरिमि-
तेन प्रियंगुव्रीहिगोधूमतिलयवानामन्यतमेन पिष्टेन निर्मिति नवा स्वर्णाकृतिं कृत्वा मध्ये
ध्येकुशास्त्रिधाय नवमूर्ते स्थापयेत्॥ स सर्पं भूपं सूत्रे वेष्टयेदिति केचित्॥ ततोऽनंता-
यकाश्यपस्य गोत्राय प्राणप्रतिष्ठां करिष्ये इति संकल्प्य॥ ॐ तपित्यद नंचिकेत विद्वान्य
न्मेतः पुनरत्येति जीवान्॥ त्रिचद्यान्द्वनस्य नरजीवोगमोनिमृतः संजीवा तरक्षुक्षैरुहके
॥ पुनर्मनः पुनरायुर्म आगात्॥ १॥ पुनर्नः पितरः॥ इहि पूर्वं स्मृतः सर्प त्वस्मिन्निविष्ट समाविश
॥ संस्कारार्थं महं भक्त्या प्रार्थयामि समास्तः॥ इति वेद पुराणमंत्रैः प्राणप्रतिष्ठां कृत्वा॥ ॐ
भुजंगेशाय विद्महे सर्पराजाय धीमहि॥ तन्नो नागः प्रचोदयादिति सर्पगायत्र्याभिमंत्र्य असुनी

तदाशिरस्कहृदयेन व्याहृत्या चाभिमंत्र्य अनंतप्रीत्यर्थं सर्पपूजां करिष्य इति संकल्प्य कलशोदके
न सर्पगायत्रीमंत्रेणानंताय नमः आवाहनं समर्पयामि॥ आसनं सः पाद्यं॥ अर्घ्यं आचमनीयं
मधुपर्कं च समर्पयामीति॥ प्रयोगे पादं दत्वा पंचामृतमंत्रैः पंचामृतेन स्नापयित्वाऽपोहिष्ठेति ति
८५ सृभिः पुरुषसूक्तेन च कलशोदकेन स्नापयित्वाचमनं दत्वा वस्त्रद्वयमाषेच्छय यज्ञोपवीतं द
त्वा गंधपुष्पधूपदीपपायसशर्कराज्यनैवेद्यं सर्पेभ्य आचमनं दत्वा सुगंधद्रव्येण करोद्वर्तनं
दत्वा तांबूलदक्षिणानीराजनानि समर्प्य नमोस्तु सर्पेभ्यो नमः॥ या इषवो यातुधानानां ये
वा वनस्पतीरनु॥ ये वाऽवटेषु शेरते तेभ्यः सर्पेभ्यो नमः ये वामी रोचने दिवो ये वा सूर्यस्य राम
रश्मिषु॥ येषामप्सु सदस्कृतं तेभ्यः सर्पेभ्यो नम इति त्रिभिर्मंत्रैः सर्पगायत्र्या च कृतपु ८५
ष्पांजलिं दत्वा पूर्वमंत्रैः पापोहं पापकर्माहं पापात्मा पापसंभवः॥ त्राहि मां कृपया देव शरणा
गतवत्सलेत्यादिमंत्रैः प्रणिपत्य अपराधसहस्राणि क्रियंतेऽहर्निशं मया तानि सर्वाणि मे दे
व क्षमस्व परमेश्वरेति क्षमापयित्वा यस्य स्मृत्या येति पूजां संपूर्णतां वाचयित्वा सर्प

सर्पं नयादितीरं प्रति लीलां प्रक्षालितांघ्रिपाणिराचम्य प्राणानायम्य संकल्प्य वा मम मुख्यं गमने
ह जन्मनि जन्मांतरे वा ज्ञानेन वाऽज्ञानेन वा मनोवाक्कायकर्मभिर्नागहननजनितदोषनिबर्ह
णद्वारा मम शरीरस्य पीडापरिहारपसत्यादिनिवृत्तिपूर्वकं आयुष्मत्सुगुणानेकपुत्रपौत्राद्य
भिवृद्ध्यर्थं शौनकादिकल्पोक्तप्रकारेण सर्पसंस्कारं करिष्य इति संकल्प्य मृतसंस्कारपूर्वकं
लौकिकाग्निप्रतिष्ठाद्याचाधानं कुर्यात्॥ अस्मिन्नन्वाहिते ग्नाविद्यादिचक्षुषी आज्येनेत्यंत
मुक्ताऽग्निं वायुं सूर्यं॥ नागमुख्यसमस्तया व्याहृत्या स्रुवपूर्णमाज्यं सर्पदेहाचिशोनागशा
रारं हविः शेषेणाग्निं स्विष्टकृतमित्यादि सद्योयक्ष्ये मनुं विःस्वः स्वाहा प्रजापतये इदं न म
मेत्यन्वाधानप्रयोगः॥ ततोऽग्नेराग्नेयदिग्भागे सुचो देशे वारिभिः कुशैः संप्रोक्ष्य चितिं
कृत्वा कुशैराग्नेयाग्रैश्चितिं परिस्तीर्य स्थापयेत्॥ ततोग्नेः परिसमूहनादि चक्षुष्यंतं हु
त्वाऽष्टोत्तरशतमष्टाविंशति वा व्याहृतिभिश्च सर्पिराज्यं हुत्वा नमोस्तु सर्पेभ्य इति तिसृ
भिश्च हुत्वाः सर्पोनंतस्तथा शेषः कपिलो नाग एव च॥ कालियः शंखपालश्च भूधरश्च तथा॥

८६ श्मशाने चतुर्थ्यंते नामिमंत्रेण केचिद्धोममिच्छंति॥ ततो गायत्र्या॥ आयंगौरितिमंत्रेण चितिं-
प्रोक्ष्य प्रणिपत्य सर्पं गायत्र्या सर्पं गृहीत्वा यत्नेन दक्षिणाशिरसं चितिमारोप्य॥ अपःस्पृष्ट्वा वि-
ष्णुं स्मृत्वा श्रोत्रस्पर्शनं च कृत्वा पुनरग्निसमीपमागत्य स्रुवेणाज्यमादाय व्यस्ताभिस्समि-
र्व्याहृतिभिस्तिस्र आज्याहुतीर्हुत्वा स्विष्टकृदादिहोमशेषं समाप्य तत एकामाज्याहुतिं स-
मस्तया व्याहृत्या चितौ स्थितसर्पस्य हुत्वा आज्यशेषं स्रुवेणादाय सर्पदेहे निषेचयेत्॥ अत्र
गस्त्विष्टकृदादीति। ततश्चमसस्थजलं पाणिनादाय हुत्वा सर्पमभ्युक्ष्य अनेनायकोन्य
पन्नगोत्रायायं तेग्निरुपतिष्ठतामित्युक्त्वाग्नेरक्षाणस्तेन च सर्पायाग्निं दद्यात्॥ मंत्रपा- राम: ८६
ठस्तु॥ अग्नेरक्षाण इतिमंत्रस्य वसिष्ठऋषिः॥ अग्निर्देवता॥ गायत्री छंदः॥ सर्पाग्निदा-
नेविनियोगः॥ ॐ अग्निरक्षाणोऽंहसः प्रतिष्म देवरीषतः॥ तपिष्ठैरजरो दह॥ इत्यग्निं
दत्वा उपउपस्पृश्योदकुंभं स्कंधे कृत्वा जलेन सिंचन्त्रिः प्रदक्षिणं कृत्वा नागशिरोदेशे कुंभं
स्फोटयित्वा उपःस्पृष्ट्वा प्रार्थयेत्॥ तत्र मंत्रः॥ नमोस्तु सर्पेभ्य इति त्र्यचः॥ सर्पगायत्री च॥

तथा च॥ ज्ञानतोऽज्ञानतो वापि कृतः सर्पवधो मम॥ संस्कारं कुर्वतो मह्यं मम दोषः प्रणश्यतु
॥ प्रजां देहि पशून्देहि आरोग्यं सर्वदास्तु मे॥ जन्मजन्मनि नैवायं बुद्धिरस्तु सदा मम॥ इति मं-
त्रैर्दह्यमानं नागमुपस्थाय स्तुत्वा तं दाहयित्वा स्नात्वा तत्रागत्य क्षीराज्येन चित्याग्निं प्रोक्षयेत्॥
तत्र मंत्रः॥ ॐ भूः प्रोक्षामि॥ ॐ भुवः प्रोक्षामि॥ ॐ स्वः प्रोक्षामीति॥ ततस्तस्य जले प्लावयित्वा चा-
मेत्॥ नात्रास्थिसंचयं न भवति। दाहसंगाद्दक्षिणस्य संचयनस्य प्राप्तिरतस्तन्निषेधः॥ एतावत्क-
र्म उपवीतिनैव कार्यं॥ ततः प्राचीनावीती मध्ये वेदिकां निर्माय तत्र तिस्रः शलाका निक्षिप्य
अंजनाभ्यंजनस्नानवस्त्रयज्ञोपवीतं॥ धान्यतादिभिः शलाका अभ्यर्च्य तदुपरि दक्षिणाग्रान्दर्भान्ना-
स्तीर्य अनेनायकान्यपसर्गोत्राय एतत्तिलोदकमुपतिष्ठतामिति त्रीनुदकांजलीन्दत्वा त्रि-
यं ग्वादिपिष्टनिर्मितांस्त्रीन्पिंडान्दत्वा पिंडोपरि तिलोदकादि दद्यादिति केचिदेकमेव पिंडं दद्या-
दिसपरे॥ ततः कर्मसाद्गुण्यार्थं गवादिदक्षिणां दद्यात्॥ अथ शुद्ध्यर्थं स्नानं कृत्वा वस्त्रं परिधा-
याचम्य गृहं व्रजेत्॥ केचित्तु पूर्वरीत्या सर्पद्वयं कृत्वा स्त्रीपुंसयोरेकविधिवद्दग्ध्वाऽपरं-

सर्पबल्मीकप्रवेशयदित्याहुः॥ ततोऽधःशायनब्रह्मचर्यहविष्याशनानि कुर्वन्स्थिरात्मशुचिः स्यात्॥
ततश्चतुर्थेऽहनि सचैलं स्नात्वा पुण्याहं वाचयित्वाऽष्टौ शीलगुणसंपन्नान्ब्राह्मणान्सर्पाननंत
स्तथा शेषः कापिलो नाग एवं च कालियः शंखपालश्च महाधरश्च प्रकीर्तित इत्यष्टसर्पनामभि
८७ रामंत्र्य पादप्रक्षालनगंधाक्षतपुष्पधूपदीपाच्छादनजलपात्राद्यैः सम्यगभ्यर्च्य घृतपाय
समक्षैर्मधुरद्रव्यैः स्नानं भोजयेत्॥ ततो बंधुभिः सह भुंजीत॥ एवं विधाने कृते सर्पहत्या
दोषो विनश्यति॥ आरोग्यपुत्रादिकं प्राप्नोतीत्याह भगवान्बौधायनः॥ शौनकश्च॥ ॥इति
श्रीमत्समस्तवैदिकश्रीनागदेवभट्टसुतानंतभट्टविरचिते विधानपारिजाते नपसरवह राम० ८७
राशिविधानानि॥ ॥अथ गर्भस्त्रावहरविधानं॥ मदनमहार्णवे वृद्धगौतमः॥ स्त्रीवृ
भंभिवेसा तु बालके हंति या विशेषः यज्ञोपवीतं कुर्वीत कांचनेन च स्वशक्तितः॥ अत्यंतवर्णा
युक्तेन राजतं चोत्तरीयकं॥ अत्यंतवर्णायुक्तेन कांचनेन यज्ञोपवीतं कुर्वीतेत्यर्थः॥ तथास्व
मीचीनं राजतमुत्तरीयं च कुर्वीत उभयोः प्रमाणमाह॥ पलार्धेन तदर्धेन तदर्धार्धेन वा पुनः

यथाविप्रदेशो मौक्तिकं देयं॥ उत्तरीयस्यातु वज्रमिति विवेकः॥ प्राक्षाल्यं पंचगव्येन गायत्र्या ताम्रभा
जने॥ द्रोणप्रमाणं तस्मिंस्तु निक्षिपेद्दधि मध्यतः॥ आज्यं तस्योपरि संस्थाप्य मुपवीतं सुपूजि
तं॥ गंधपुष्पाक्षतैर्धूपैर्नैवेद्यैरपि भक्तितः॥ पंचगव्यस्नाने गायत्र्याग्रहणादवशिष्टप्रजा
यामपि स्येवमेव॥ एवं प्रक्षालितमुपवीतमुत्तरीयं च ताम्रभाजने निक्षिपेत्॥ केचित्तु अ
हद्रोणप्रमाणमिस्साहिः॥ अस्यार्थः॥ द्रोणप्रमाणं दधि तस्मिंस्ताम्रभाजने मध्ये निक्षिप्य त
दुपरि द्रोणपरिमाणं यवाक्षिवा आज्यं स्थापयेत्॥ तत्राज्ये उपवीतमुत्तरीयं च स्थापये
त्॥ ततद्वयं गंधपुष्पादिभिः संपूजितं कुर्यात्॥ तदनंतरं कृत्यमाह॥ ततो ब्राह्मणमाहूय हो
मं त्रैस्तैश्च कारयेत्॥ तिलराज्यैर्नमधुनाभि ओरष्टोत्तरं शतं॥ होममंत्रा व्याहृतयो गायत्री
वामदेवादिः॥ तस्मै तु तत्वतो देयं वस्त्राद्यैः पूजिताय तु॥ मंत्रेणानेन विधिवत्प्राङ्मुखायो
पवीतकं॥ मंत्रमाह॥ उपवीतं परमिदं ब्रह्मणा विहितं पुरा॥ भवनोकाद्युस्यदानेन गर्भ
संधारयेद्धरुः॥ भवेन्नो केति॥ भवे संसारे द्विजकर्मनिष्पादकत्वेन यतस्तारकमुपवीतम

तीनौरिवनेका॥ यद्या॥ भवउत्पत्तिः॥ तस्या अनपत्यानामामपयोत्पत्तिदायकयेन नरकोऽ
त्तारकत्वञ्जौरिचनौकेयर्थः॥ शिष्टस्य च॥ ब्राह्मणान्यापि ब्राह्मणेभ्यस्तस्मिन्काले प्रदापयेत्॥
८८ भनुभुज्य तथाचार्यं प्रीतिपयक्षमापयेत्॥ गर्भस्रावकर्मोद्देषादेवं कृत्वा विमुच्यते॥ आ
चार्यत्रिदानपात्रं॥ अस्मिन्कर्मणि स्त्रिया अधिकारः॥ ॥ इति विधानपारिजाते गर्भस्रावहर
विधानं॥ अथ प्रसवयोनिशोणितहरविधानं॥ तत्रैव कर्मविपाकसंग्रहे॥ मासोपवासिनो
नारीरेतःप्रस्नानये चद्दि॥ पतिसंपर्कदोषेण जायते मान्यजन्मनि॥ स्रवद्रक्ता सदा योनौ तस्मिर
क्तेतिरिहोच्यते॥ मासोपवासं कुर्वीत तथा मासं पयोव्रतं॥ मासोपवासस्य विधानं पयोव्रतस्य
रूपं च महार्णवे वक्ष्यदप्रकरणे द्रष्टव्यं॥ ग्रंथभूयस्त्वभयान्नात्र लिखितं॥ इति श्रीमदनंतभ रामः ८८
ट्टविरचिते विधानपारिजाते प्रसवयोनिशोणितहरविधानं॥ वंदे गोविंदमानंदज्ञानदेहं
पतिं श्रियः॥ ब्रह्मादिस्तंबपर्यंतजगत्कर्तारमीश्वरं॥ अथ गर्भस्थैर्यकरणविधानानि॥ तत्र ग
र्भधारणविधानं प्रयोगपारिजाते॥ शौनकः॥ प्रोउ ज्ञास्कातुसंज्ञेषु दिनेष्वाद्यं चतुर्दिनं॥ आर्तवा

शौचसंयुक्तं वर्जयित्वापरेषु तु॥ दिनेषु द्वादशस्वेतद्व्यस्मिन्यति भार्यमोः उभयोरपि जन्मर्क्षानु
गुरोस्तारकेषु वंशोपयित्वाथ गंधाद्यैर्भूषयित्वा च शोभने मुहूर्ते त्वथ गंधाया भले संपीड्य तत्सु
नः॥ कृत्वा नवांबरगतं परिगृह्य प्रयाणेन॥ उद्दीर्णतः पतिवतीस्या घामच्च मुदीर्य तु जाया
या दक्षिणे नासारंध्रे सिंचेत्तु तद्रसं॥ उदरस्थे रसे तस्मिन्प्राच्यां तास्या लिलां सुतीउ पगद्ये दुधः मेवं
विधिनोपगमे कृते॥ गर्भः स्थिरः स्यादित्येवं गर्भलंभनमाचिरेरति॥ ऋग्विधाने तु॥ विष्णुर्योनिर्जि
जपेत्सूक्तं योनिं स्पृष्ट्वा त्रिभिर्व्रती॥ गर्भाधानं ततः कुर्यात्स पुत्रो वै प्रजायते॥ त्रिभिरंगुलैरिस्पर्शः
॥ एतदकरणे प्रायश्चित्तमुक्तं॥ गर्भाधानस्याकरणात्तस्यां जातस्तु दुष्यति॥ अकृत्वा गोधि
जे दत्वा कुर्यात्पुंसवनं ततः इति॥ गर्भाधानस्याकरणात्तस्यां जातस्तु दुष्यति॥ अकृत्वा गोधि
जे दत्वा कुर्यात्पुंसवनं ततः इति॥ गर्भधारणविधानं॥ अथ गर्भिणीधर्माः पाद्मे कश्यपः॥ नाव
स्करेषु पविशेन्मुसलोलूखलादिषु॥ जलं च नावगाहेत शून्यागारं च वर्जयेत्॥ वल्मीके
नाधितिष्ठेत न चोद्विग्नमना भवेत्॥ विलिखेन्न नखैर्भूमिं नांगारेण ... या
य॥

तुः सदा तिष्ठेद्छायामं च विवर्जयेत्॥ न तुषांगारभस्मास्थिकपालेषु समाविशेत्॥ येन नखरङ्लेह
त्रोकैर्गात्रभंगं तथैव च॥ न मुक्तकेशी तिष्ठेत नाशुचिः स्यात्कदाचन॥ न शयीतोत्तरशिराः न ८९
चैवाधःशिराः क्वचित्॥ ॥वस्त्रहीना नोद्विग्ना नचार्द्रचरणा सती॥ नामांगल्यं वदेद्वाक्यं
न च हास्याधिका भवेत्॥ कुर्याच्च श्वशुरयोर्नित्यं पूजां मंगलतत्परा॥ तिष्ठेत्प्रसन्नवदना भर्तृ
प्रियहिते रता॥ संध्यायां नैव भोक्तव्यं गर्भिण्या हि प्रयत्नतः॥ न स्थातव्यं न गंतव्यं वृक्षमूलेषु
सर्वदा॥ सर्वौषधीभिः कोष्णेन वारिणा स्नानमाचरेत्॥ कृतरक्षा सुभूषा च वास्तुपूजनतत्प
रा॥ दानशीला तृतीयायां पार्वत्याभक्तिमाचरेत्॥ गर्भिणी कुंजराश्वादिशैलहर्म्यादिरो राम:
हणं॥ व्यायामं शीघ्रगमनं कठोरारोहणं त्यजेत्॥ शोकं च रक्तमोक्षं च साध्वसं कुक्कुटास ८९
नं॥ स्वद्वा छायां दिवास्वापं रात्रौ जागरणं त्यजेत्॥ पतिव्रतामवेक्षारीविशेषेण तु गर्भिणी
॥ अतिक्षारं तुलाश्रीयादत्यम्लं मतिभोजनं॥ लघ्वाहारश्चातितरां गुर्वाहारं परित्यजेत्॥ य
स्तु तस्या भवेत्पुत्रः स्थिरायुर्वृद्धिसंमतः॥ अन्यथा गर्भपतनं सा च प्राप्नोति न संशयः इति॥

॥ गर्भिण्या यात्राप्राप्तौ विशेषमाह बृहस्पतिः॥ चतुर्थे मासि षष्ठे वाप्यष्टमे गर्भिणी यदा॥ यात्रा
नित्यं विवर्ज्या स्यादाषाढे तु विशेषतः इति॥ ॥अथ गर्भिणीपतिधर्माः॥ यज्ञवल्क्यः॥ दोहदस्याप्र
दानेन गर्भो दोषमवाप्नुयात्॥ वैरूप्यं निधनं वापि तस्मात्कार्यं स्त्रिया प्रियं॥ संग्रहेपि॥ ग
र्भिणी वांछितं द्रव्यं तस्यै दद्याद्यथोचितं॥ सूते चिरायुषं पुत्रमन्यथा दोषमर्हति॥ तथा॥ व
पनं मैथुनं तीर्थं वर्जयेद्गर्भिणीपतिः॥ श्राद्धं च सप्तमान्मासादूर्ध्वं चान्यवेदवित्॥ श्राद्धंश्रा
द्धभोजनमिति संघर्षः॥ मुहूर्त्तदीपिकायां च॥ क्षौरं। शवानुगमनं नखकृंतनं च युद्धं च वास्तुकर
णं त्वतिदूरयानं॥ उद्वाहमंबुधिजलस्पर्शं शोषयोगमायुःक्षयो भवति गर्भिणिकापतीनामि
ति॥ ॥इति गर्भिणीपतिधर्माः॥ अथ सूतिकागृहनिर्माणविधानं॥ तत्रैव॥ सूतिमासके गर्भः
॥ वारे तु कूले रासौ तु दिने दोषादिवर्जिते॥ स्वानुकूलदिशि प्रोक्तं सूतिकाभवनं बुधैः॥ रत्नको
शेपि॥ आसन्नप्रसवे मासि कुर्याच्चैव विशेषतः॥ तदप्रसवकाले स्यादिति शास्त्रेषु निश्च
यः॥ तत्स्थानमाह ज्योतिर्वसिष्ठः॥ ऐन्द्रे तु विक्रमस्थानमाग्नेय्यां पचनालयं॥ वारुण्यां

भोजनं हि गेहे नैऋत्यां सूतिगृहं। याम्यायां शयनस्थानं वायव्यां पशुमंदिरं कौबेर्यां तु धनस्थानं

१०० मैत्र्यां देवतालयं इति। तद्गृहप्रवेशमपि एवाह॥ अथातः संप्रवक्ष्यामि सूतिकागारवेशनं

। मासे तु नवमे प्राप्ते सर्वपक्षे शुभे दिने॥ प्रसूतिसंभवे काले सद्यो वा प्रवेशयेत्॥ तत्र नक्षत्राणि

न्याह गर्गः। रोहिण्यां त्रैयं देवपौष्णेषु स्वातीवरुणयोरपि। पुनर्वसुपुष्यहस्तधनिष्ठा उत्तरासु च।

मैत्रे त्वाष्ट्रे तथाश्विन्यां सूतिकागारवेशनं॥ स्मृत्यर्थसारे शोभनं तु अश्ववृद्धिपुष्ट्या सुरीक्षितां स्रु

अमरणं पित्रोर्मरणं तु न तासु त्रिषु॥ मेषादिक्रमशो वित्त्वा सूतिकागारवेशने॥ ग्रहे तु कुलीरादौ

तु रिक्ताषष्ठ्यष्टमीवर्जिते॥ सर्वे चाद्यशुभांकेंद्रे या वा अत्रिपद्धायगाः॥ शुभांशे शुभदृष्टौ तु सूतिका रामः १००

वेशनं शुभमिति॥ तत्प्रवेशप्रकारं पद्मपुराणे विष्णुधर्मोत्तरखंडे परशुरामं प्रत्याह पुष्करः॥ प्र

विशेत्सूतिकासद्म कृतरक्षं समंततः। सुनक्षत्रे निमित्ते च दिव्यं वास्तुविद्याविशारदैः॥ प्राग्द्वारमु

त्तरद्वारमथवा सुदृढं शुभं॥ देवानां ब्राह्मणानां च गवां कृत्वा च पूजनं॥ विप्रपुण्याहशब्देन

शंखवादित्ररवेण च॥ प्रसूता बहवस्तत्र तथा क्लेशसहाः स्त्रियाः॥ हृद्याविश्वसनीयाश्च

याः॥ हृद्याविश्वसनीयाश्च प्रविशेयुः स्त्रियश्च ताः॥ ताभ्यां तु लेपनैर्हृद्यैस्तत्रैव शुश्रूषयेत्

॥ आहारैश्च विहारैश्च प्रसवाय सुखं द्विज॥ एवं उक्तसूत्रोक्तेन पारिजाते सूतिकागृहनि

र्माणप्रवेशनविधानं॥ अथ प्रकारांतरेण गर्भधारणविधानं प्रयोगपारिजाते एवाच

स्य गर्भः प्रमीयेत तत्र ज्योत्स्नोजुहुयाद्धविः॥ ब्राह्मणाग्निः संविदान इत्याद्येन यथाविधि॥ इ

दं स्त्वेकं षट् ऋचात्याद्यानुक्रमणिका॥ ॥ ब्रह्मणाग्निः संविदानो रक्षोहा गर्भस्रावप्रायश्चित्त

मानुष्टुभमिति॥ आज्यशेषेणाजुहुयात् ऊर्मिभिः प्रसूयेतेति च॥ यदि वेतच्चाज्यशेषेणाजीवंस्त

स्याः प्रजायत इति॥ अन्यच्च॥ उरोहृद् इति सूक्तेन उपतिष्ठेत् सक्रतुं॥ प्रजाकामो यजेत्रि

स्य चरुणा देवयंनरः॥ उपहृत्योपहारं च शिष्टं भुंजीत वाग्यतः॥ उच्छिष्टं च प्रदातव्यं भा

र्यायै पुत्रमिच्छता॥ धेन्वाः सरूपवत्साया पयसा साधयेच्चरुं॥ अनुरूपां प्रजामासु

लभेत नात्र संशयः॥ जपरूपाण्यपि कर्माण्याह॥ यज्ञो देवानां सूक्ते वै ऋग्युतां विष्णु

मंदिरे॥ मृतपुत्रोऽनपत्यो वा सुपुत्रः स्याद्भवेत्॥ इदं सूक्तेन्द्रं चंगा कुत्सऋषिः। इंद्र स्त्रिष्टु

श॥ आमनाबाजपेद्गर्भेहृत्कन्यां लभेच्छदितासुपुत्रं लभेतेसकृत् अच्युतंविष्णुमंदिरो बतुर्यं च वर्गं
स्येयोऽष्टाजपेत्सूक्तं बंध्या लक्षं शिवालये॥ आयुष्मवंतं पुत्रं च भाग्यवंतं प्रसूयते॥ एकोन
१०१ विंशतिऋचं सूक्तमेतद्दिति दृष्ट्वां व्यासोपि॥ सुदर्शनिं महामंत्रं शुचिर्भूत्वा समाहितः॥ निस
मष्टोत्तरशतं जपन्पुत्रं लभेत्सुखमिति॥ अथौषधायप्युच्यंते॥ श्रीधरीये व्यासः॥ अंकोलमू
लकल्कं च चूर्णा गुडेन मुहुः॥ कंकाउमितमश्नीयात्पुत्रिणी सा भविष्यति॥ ॥वा
सिष्टः॥ उत्तमंकर्णिकामूलं पेषयित्वा पयः पिबेत्॥ पायसान्नं समश्नीयात् पुत्रिणी स्यहस्स्ना
नवेत्॥ गौतमोपि॥ क्षीरंद्राग्न्यांकुरं गस्य पेषयित्वा पयः पिबेत् देवोदरकत्तो दोषोवि राम:
नश्यति शुभं लभेत्॥ देवमदृष्टां उदरं प्रसिद्धं॥ तज्जन्यो दोषो नश्यती सर्वथा॥ मुकुंदोपि १०१
॥वटाश्मनिंबबीजे च गव्येन पयसा पिबेत्॥ पुत्रप्रसूयते नारी दोषदोषं विर्मुच्यतीति॥ अथ
तीर्थसूक्तानि॥ तत्र पाराशरः॥ महातीर्थे महायोगे महानद्यास्तु संगमे॥ पलाशस्य दलास्ता
नं कुर्यात्पुत्रसुखार्थिनी॥ देवराजश्च॥ पलाशदलसाहस्रं सावित्रेण दलं प्रति॥ स्नपयेत्स

पवित्रेण एकादश्यां प्रजार्थिनी मतिं॥ एवं पुत्रोत्पत्यर्थमनेके दुपायाः कर्तव्या नापुत्रस्य लोका
स्तीत्यादिश्रुतेः॥ पुत्रेण लोकान् जयति पौत्रेणानंत्यमश्नुत इत्यादिस्मृतेश्च॥ ॥अथ प्रकारांतरेणा
पि गर्भधारणोपायः कथ्यते॥ तथा चक्रविधाने। पुष्पं दृष्ट्वा तु या गर्भं न गृह्णीयाद् द्वयोन्विता॥
विष्णुर्योनिं नेजसे षयोनिस्पृष्ट्वा ततो जपेत्॥ ततोभिमंत्रं कुर्यात् गर्भं धत्ते न संशय इति॥ अन्य
त्रापि गर्भधारणविधानं पारस्करसूत्रे॥ सा यदि गर्भं न दधीत सिंह्याः श्वेतपुष्प्या उपोष्य
पुष्येण मूलमुत्थाप्य चतुर्थ्यां स्नाताया निशायामुदपेषं पिष्ट्वा दक्षिणस्यां नासिकायामा
सिंचति इयमोषधी त्रायमाणा सहमाना सरस्वती अस्या अहं बृहत्याः पुत्रः पितुरिव नाम जग्र
भमिति मंत्रेण॥ अथ गर्भरक्षाविधानं॥ विधानमालायां॥ निष्क्रुरक्षार्थं ते प्रजापतिं समुद्दि
श्य मास्यां चैव बलिमाचरेत्॥ श्वेतवस्त्रं पायसं च गव्यं क्षीरं तथा घृतं॥ श्वेतपुष्पं चंदनं च
सरलं चांगुलीयकं॥ कुंभे निधाय देयो वै बलिर्दीपैस्तु धूपितः। दीपैर्नीराजितश्चापि नार
लेन समन्वितः॥ हिरण्यसहितं शाक्या गवां देहे निधापयेत्॥ गवां दोहे प्रदोषकाले॥ गोष्ठे

देशेन॥ एह्येहि भगवन्ब्रह्मन्प्रजाकर्त्तः प्रजापते। बलिं परिगृहाणेमं सापत्यां रक्ष गर्भिणीं॥
इति मंत्रेण इति बलिः। अथाद्ये मासि गर्भवेदनाहरमौषधी॥ नारायणीपद्धतिकायामपेक्षि
१०२ तार्थद्योतिन्यां। प्रथमे मासि यदि गर्भिण्या गर्भवेदना स्यात्तदा दर्भकोशीरं तगरं समभा-
गमुदकेन पिष्ट्वा क्षीरेण सक्वाथयेत्॥ क्रियाकालोत्तरे तु॥ यदि स्यात्प्रथमे मासि गर्भिण्या ग-
र्भवेदना॥ नीलोत्पलं सनालं च शृंगाटककसेरुकं॥ शीततोयेन पिष्ट्वा तु क्षीरेणालोड्य पा-
तयित्वे तु॥ एवं न पतते गर्भः स च शूलं प्रशाम्यति॥ इति प्रथमे मासि गर्भपातोपशमन
विधानं॥ अथ द्वितीये मासि बलिः॥ समुद्दिश्याश्विनौ देवौ द्व्योमंत्रेण मंत्रितः॥ दध्यन्नपा गर्भः
यसं जालेपिण्याकं कुसुमानि च॥ गंधधूपप्रदीपश्च वस्त्रेणावेष्टितो घटः॥ हेमन्नायुतो १०२
श्वशालायाः समीपे निक्षिपेद्बलिं॥ क्रियाकालोत्तरे तु॥ सुगंधवस्त्रपुष्पाणि कुंकुमं च गि-
रिर्णिडका॥ नीलोत्पलानि चाम्भावे ह्युत्पलानां समाहरेत्॥ गोदोहस्य प्रमाणस्य निक्षि-
पेद्बलिमुत्तमं॥ मंत्रस्तु॥ भगवंतौ प्रभावंतौ प्रगृह्णीतं बलिं त्विमं॥ स्वरूपौ देवभिषजौ र-

क्षतां गर्भिणीमिमां॥ अथौषधं द्योतिन्यामेव शालूकमुत्पलं नीलं कसेरु शृंगवेटकं। समांश-
मुदके पिष्ट्वा क्षीरेणालोड्य तत्पिबेत्॥ एवं न पतते गर्भः स च शूलं प्रशाम्यति॥ इति द्वितीये मास्यौ-
षधं। अथ तृतीये बलिः। गर्भिणी गर्भरक्षार्थं बलिं मासि तृतीयके॥ रुद्रानेकादशोद्दिश्य दे-
यो मंत्रेण मंत्रितः। घृतमन्नं च लाजाश्च ध्वजश्वेतचंदनं॥ श्वेतवस्त्राणि पुष्पाणि श्वेतधू-
पप्रदीपकं। श्वेतानि पंचदश कान्याश्रु विश्व शांतिकराणि तु॥ एतत्सर्वं समाहृत्य कलशे संनि-
धापयेत्॥ ईशान्यां दिशि रात्रौ च निक्षिपेत्प्रयतः शुचिः। नदीतीरे गवां गोष्ठे राजद्वारे चतु-
ष्पथे। मंत्रस्तु। महादेवः शिवो रुद्रः शंकरो नीललोहितः ईशानो विजयो भीमो देवदेवो भ-
वोद्भवः॥ कपाली शंभुरीशानो रुद्रैकादश मूर्त्तयः। रुद्रका एदश प्रोक्ताः प्रगृह्णीत
बलिं त्विमं॥ युष्माकं तेजसा वृद्ध्या नित्यं रक्षंतु गर्भिणीं। अथौषधं। पिभंचंदनतोयं तगरं
समभागिनं॥ सर्वद्धारिणा पिष्ट्वा क्षीरेणालोड्य तत्पिबेत्॥ क्रियाकालोत्तरे तु। पद्मकं च द-
नं चैव वालुकं पद्मतालकं। पिष्ट्वा शीतेन तोयेन क्षीरेणालोड्य तत्पिबेत्॥ एवं न पतते ग-

र्भःस्थैस च शूलः प्रशाम्यति॥इति तृतीये गर्भौषधं॥अथ चतुर्थे बलिः॥बलिमस्मिन्तृतीये यस्त्व
प्रोक्तस्तु चतुर्थके॥देयः प्रयत्नतो विद्वन्नात्र कार्या विचारणा॥अथौषधी॥क्षीरं च कदलीमू-
१०२ लं तुल्यं बालकं तथा॥भल्लातकसमं भागे न पिबेद्रोगपशांतये॥कालोत्तरे तु॥चतुर्थमा
सि गर्भिण्या भाले जायेत वेदना॥उशीरं कदलीमूलं पद्मनालस्य शर्करं॥शीततोयेन पि-
ष्ट्वा च पिबेत्॥क्षीरे वा संयुतं॥एवं न पतते गर्भः स च शूलः प्रशाम्यति॥इत्यौषधं चतुर्थे॥
अथ पंचमे॥कर्मविपाकसमुच्चये गर्भिणीगर्भरक्षार्थं पंचमे मासि वै बलिः॥विनायकं समु-
द्दिश्य देयः श्रद्धशब्देन दशमूलानि॥एतत्सर्वं स्थमाहृत्य वंशपात्रे मनोरमे॥मनोरमे च रामः
चक्रेदिरचना मंडिते॥मंत्रस्तु॥एकदंत विकापुत्र त्रिनेत्रो गणनायकः॥रक्ताम्बरधर श्री १०२
मेरक्तमाल्यानुलेपन॥स्कंदप्रिय महाबाहो पाशहस्त नमोस्तु ते॥प्रगृह्णीष्व बलिं चे
मं सापत्यां रक्ष गर्भिणीं॥क्षिप्रप्रसादय कम स्वमायुषाभिविवर्धय॥अलक्ष्मीनामकं पापं
मम सद्यो विनाशय॥एवं मंत्रं समुच्चार्य प्रदद्याद्गर्भिणी बलिं॥नमस्कुर्यात्प्रयत्नेन संप्रा

र्थ्य च प्रयतः कृत्यक्ता नमस्कारमंत्रस्तु॥वक्रतुंड महावीर्य महाभाग महाबल॥शिरसा त्वामहं वं
दे सापत्यां रक्ष मां सदा॥इत्यनेन बलिं दत्वा पदे दद्यान्मनुं पुनः॥इयं बलिर्मया देव त्वदर्थं
प्रतिपादितः॥रक्षेमं शिशुमातं द्रूप शैलसुतात्मज॥ ॥इति बलिः॥अथौषधं॥पंचमे मा
सि गर्भिण्या गर्भे चेद्वेदना भवेत्॥तन्निवारकमेव॥शृणु भेषजं कथ्यते मया॥नीलोत्पलं मृ
णालं च काकोलीक्षीरं तथैव च॥केसरं पद्मकं चैव तोयेनालोड्य तत्पिबेत्॥येषां काकोलीक्षी
रं न स्याच्चेत्तेषां मत आक्षीरं॥ग्रास्यं॥एवं न पतते गर्भः स च शूलः प्रशाम्यति॥इत्यौषधं पंच
मे॥अथ षष्ठे मासि बलिः॥वसंतषष्ठी समुद्दिश्य बलिं देयोभिमंत्रितः॥कृतान्नं च हरिद्रा-
क्तं रक्तं च लाजा स्रग्धायसं॥पीत वर्णानि पुष्पाणि तथा नीलोत्पलानि च॥स्वकाय नं पूर्णं
कुंभः सर्वं न्यास्तं कं क्षिपेत्॥पुष्पांजलेन॥मंत्रस्तु॥प्रभासः पावकः सोमः प्रत्यूषो मार
तो नलः॥धरो ध्रुव इति ह्येते वसवोष्टौ प्रकीर्त्तिताः॥प्रगृह्णंतु बलिं चेमं स्वर्वेरक्षंतु गर्भि
णीं॥अथौषधं॥षष्ठे मधुकोत्पलकेसरं पिबेत्॥कालोत्तरे तु॥अथास्या मासि षष्ठे तु-

गर्भे भवति वेदना ॥ पिप्पलीबीजमूले च सोत्पले च मकेसरे ॥ शीततोयेन पिष्ट्वा तु क्षीरेणालोड्य
न त्पिबेत् ॥ एवं न पतते गर्भस्तस्य शूलः प्रशाम्यति ॥ इति षष्ठे औषधं ॥ अथ सप्तमे मासि बलिः ॥ पू
९४ वर्ष द्वलिरुद्दिष्टो देवता त्रच एमुरवः ॥ मंत्रस्तु ॥ स्कंद षरानुष देवे शशिव प्रीतिविवर्धन ॥ प्रगृह्णी
ष्व बलिं च मसा पत्यां रक्ष गर्भिणीं ॥ बलिद्रव्य स्थानं नैवेद्यं ॥ अथ औषधं ॥ सप्तमे कपिप्प
लकूफलकैसमूलं शर्कराजांश्च वेणुशशांकुरांश्च सर्वे समांशं कृत्वा ॥ कारिणा लोडय पातव्यं ॥
आलोत्तरं तु ॥ अथास्य सप्तमे मासि गर्भे भवति वेदना ॥ कपित्थलक्ष्मशाल्वकं शर्कराद्यु
कं मंजूसा ॥ अंजसेति शर्करासममाना ॥ शीततोयेन पिष्ट्वा तु क्षीरेणालोड्य तत्पिबेत् ॥ एवं राम:
न पतते गर्भः स्य च रोगः प्रशाम्यति ॥ इति औषधं सप्तमे ॥ ॥ अथाष्टमे मासि बलिः ॥ दुर्गामु ९४
द्दिश्य दातव्यो बलिरेवं न सीदति ॥ पायसं चैव ताज्जाश्च तथा धान्यं तथा घृतं ॥ अपूपाः कृश
राश्चैव माहिषं दधिमल्लकं ॥ माषानि ष्पावका मुद्गाः श्यामकाः कुसुमानि च ॥ नीलोत्पलानि
च तथा पूर्णकुंभः सकांचनः ॥ एतद्धि पेन्नदीतीरे मंत्रेणानेन संयुतं ॥ शिरो वारितस्तीरे दे

वरवाते न उागके ॥ राजमार्गे द्रुमाधस्तात् द्वलिमेन विनिक्षिपेत् ॥ मंत्रस्तु ॥ कात्यायनि महादेवी
ज्येष्ठे निघेति शप्रिये ॥ दुर्गे देवि महाकालि सिंहशार्दूलवाहिनि ॥ धनुखेकधरे देवि दुष्ट
दैत्यविनाशिनि ॥ नगशैलप्रिये देवि कुमारि शुभगे शुभे ॥ अष्टहस्ते चतुर्भुजे गले कनामि
के ॥ प्रगृह्णीष्व बलिं चेमं सापत्यां रक्ष गर्भिणीं ॥ इति बलिः ॥ अथौषधं ॥ अष्टमे मासि विज्ञेयं
धान्यकं केसरं तथा शालूकमुत्पलं चैव तथा च गजपिप्पली ॥ निष्काथ्य शीतया सर्वं देयं रो
गोपशांतये ॥ केलोत्तरे तु ॥ अथास्या स्त्वष्टमे मासि गर्भे भवति वेदना ॥ पद्मकं ज्येष्ठमा
च धान्यमुत्पलकं तथा ॥ शीततोयेन तस्पिष्ट्वा क्षीरेणालोड्य तत्पिबेत् ॥ एवं न पतते गर्भः स्य च
शूलः प्रशाम्यति ॥ इत्यौषधं ॥ अथ नवमे मासि बलिः ॥ गर्भिण्या गर्भरक्षार्थं मासे च नव
मे बलिः ॥ देयः स्यात्मात्मकोद्देशेन ततः तथास्यान्तु रोगमोक्षणं ॥ दध्योदनं च लाजाश्च मुद्ग
श्च पुनर्दधि ॥ कृशरं च तथा श्वेत पंकजानि च चंदनं ॥ शतपत्राणि पुष्पाणि तथान्यानि शु
भानि च धूपो वस्त्रे हिरण्यं च पूर्णकुंभस्तथैव च ॥ मंत्रस्तु ॥ प्रगृह्णीत बलिं चेमं मया दत्तं

चमा तरः। दृष्यं रक्षतु संतुष्टाः सापत्यां गर्भिणीमिमां इति बलिः॥ अथौषधं॥ नवमे मासि कं
कोलि पत्रा स्सस्या तु बीजकं एरंडमूलसंयुक्तं पिष्ट्वा तोयेन संयुतं॥ कृत्वा तु मोदकं धात्रीफ
२८५ लमानं। विशोषतः। जीर्णे नेमन्हितं चैव हरेद्गर्भव्यथां ध्रुवं॥ कलोत्तरे तु॥ अथ यस्य नव
मे मासि गर्भे भवति वेदना॥ पाटला बीजकां मुलिको मूलं स्यात्पो कारं तथा॥ सो क्षीरं
चोदकं कृत्वा जीर्णान्ते मोदयेद्घृतं॥ एवं न पतते गर्भः स च मूलः प्रशाम्यति। बलिश्च प
श्रुतुष्यये॥ इत्यौषधं नवमे॥ अथ दशमे बलिः गर्भिणी गर्भरक्षार्थं मासस्य दशमे व
लिः उद्दिश्य नैर्ऋतं देवं बलिर्देयस्तु मंत्रितः। पक्वान्नं कृशरं लाजाः पक्वापक्वफलं त राम:
था। कृष्णगंधं कृष्णवस्त्रं कृष्णानि कुसुमानि च॥ इष्टखाद्यानि क्षिपेत्तत्र रक्षसे राक्षस २८५
मंत्रतः। धूपो दीपश्च नैवेद्यं बलये संप्रदीयते नीलोत्पलानि च कुंभांते सजलानि वि
निक्षिपेत्॥ दक्षिणां शां प्रति तथा नीत्वा तत्र विनिक्षिपेत्॥ मंत्रस्तु कुकुटाचार्यमते
॥ॐ ह्रं ह्रीं ह्रूं स्वाहा॥ बलिं गृहाण रक्षस्त्वं मया दत्तं समाहृतं॥ बलिं त्वमवलोका

स्वसापत्यां रक्ष गर्भिणीं॥ निर्विघ्नं कुरु नैर्ऋत्य गर्भिणीं उन्नत॥ प्रेतासन महाबाहो कुमु
दे मे वरप्रिये। प्रगृह्णीष्व बलिं चेमं सापत्यां रक्ष गर्भिणीं॥ अत्र बलौ ब्राह्मणे मे दीना
निक्षेपणीयं॥ किंचित्सुसो देयः॥ अथौषधं॥ दशमे कारमीरोत्पलं मधुकस्य सितं तंदुले
न पिष्ट्वा क्षीरेणालोड्य पिबेत्। कालान्तरे तु॥ अथास्य दशमे मासि गर्भे भवति वेदना॥
शर्करोत्पलकं चैव मधुकं कुडुमेव च॥ शीततोयेन पिष्ट्वा तु क्षीरेणालोड्य तत्पिबेत्॥
एवं न पतते गर्भः स च शूलः प्रशाम्यति॥ इति दशमे मासि औषधं॥ अथैकादशे मासि
बलिः। यद्यपि दशमे मासि जायत इति श्रुतिवचनाद्दशमे मासि प्रसवेन एकाद
शे द्वादशमासयोर्गर्भरक्षणानुपपत्तिस्तथापि दैवान्मातुर्दोषात् प्रतिबंधाद्दशमे मासि
प्रसवस्ते एकादशे द्वादशे वा प्रसवः। तयोः परमावधित्वात्। तदपि प्राच्येतोइं द्रष्टव्यं
॥ गर्भिणीगर्भरक्षार्थं मासि चैकादशे बलिः। वासुदेवं समुद्दिश्य देवो योनात्र विचारणा॥
पायसापूपपिष्टं च गुडलाजाश्च सक्तवः। पिष्टशाकेन पिष्टान्नं॥ अथामोधजस्तथा यूपः

श्यामं वै पुष्पचंदनं॥ कुंभे निधाय श्यमेतु बोधिवृक्षतले शुभो। वंदावनेन नदीतीरे निक्षिपेद्ब-
लिमुत्तमं॥ मंत्रस्तु॥ पांचजन्य प्रभाव्य रूक्कौस्तुभोद्योतितांगका। प्रगृह्णीष्व बलिं चेन सापर-
८६ त्यां रक्ष गर्भिणीं। इति बलिः॥ ॐ अथ दशमे मासस्युक्तमेव॥ क्रियाकालो चरेत्तु। ततश्चैकाद-
शे मासि गर्भे भवति वेदना॥ पद्मोत्पलं नमधकं तालके नापि संयुतं॥ शीततोयेन पिष्ट्वा तु
क्षीरेणालोड्य नत्पिबेत्॥ एवं नश्यते गर्भस्य च रोगः प्रशाम्यति। इत्थोपथमेकादशो द्वा-
दशे मासि बलिः। उच्यास्या द्वादशे मासि पूर्ववद्बलिमाचरेत्॥ पद्मश्रृंगाटकं चैव उत्पलं
चसनालुकं। शीततोयेन संपिष्ट्वा क्षीरेणालोड्य तत्पिबेत्॥ एवं नपतते गर्भः स्य च शूलः प्र- राम:
शाम्यति॥ इति शिशुरक्षारत्नोके द्वादशे मासेषु गर्भरक्षणं॥ अथ सुखप्रसवोपायः॥ वि- ८६
धानमालायां॥ उदौदक्यास्तु मलानि तैलयुक्तानि कारयेत्॥ योनेः प्रलेपो दातव्यः सुख-
प्रसवहेतवे इति॥ अन्यत्रापि॥ पत्राणि निंबस्य च संप्रपिष्य लक्तंयुतां वा तु लं सीरसाद्या
॥ मूलप्रधाने कपित्थपुष्पकं कद्रुत्व बीजं च समस्तमेतत्॥ अजापयः संयुतमेव पष्ट्वा चैते

घन१

लेन युतं समस्तं। योनेः प्रलेपं विदधीत तेन तच्चापि पेयं खलु रव्यास्यि ज्ञैः। गर्भांतरादर्भकता तिर-
स्य मृत्यद्वारं तु योनेर्न करोति दुःखं॥ एवं विधानं न करोति जानन् स्मृतेन हा तत्र विचार्यमस्ति॥
तत्र योनिलेपनमंत्रः॥ हिमवत्युत्तरे पार्श्वे शेखरी नाम यक्षिणी। तस्या नूपुरशब्देन वि-
शल्या भव गर्भिणि स्वाहा॥ अथ लाभिमंत्रणं॥ ॐ ऐं ह्रीं भगवति भगमालिनि चालय चालय
भ्रामय भ्रामय पुष्पं विकासय विकासय स्वाहा॥ ॐ नमो भगवते मकरकेतवे पुष्पधर-
न्वने हृतचालित सकलसुरासुरत्वे तनाय युवति भगवासिनि रते ॐ ह्रीं गर्भं चालय चा-
लय स्वाहा॥ ॐ नमो भगवति पद्मासनस्थे सितहंससमारूढे वषट्रूपिणि॥ अमयवरपु-
स्तक कमलधारिणि ॐ ह्रीं नमः। एभिर्मंत्रैः सप्तवाऽभिमंत्रितं पात्रस्थमुदकं पायय-
यीत सुखेन प्रसवो भवति। यद्वा। प्रमंदिन इति मंत्र — आंगिरसः कुत्स ऋषिः। गर्भस्रा-
वो देवता जगती छंदः सुखप्रसवार्थे जपे विनियोगः॥ ॐ प्रमंदिने पितुमदर्चता वचो यः
कृष्णगर्भा निरहन्नृजिश्वना। अवस्यवो वृषणं वज्रदक्षिणं मरुत्वंतं सख्याय हुवाम

१०७ हे॥ अनेन मंत्रेणास्य तत्कल्पोक्तेभिमंत्रितं पानीयं गर्भिणीं पाययेत्॥ शीघ्रं प्रसवो भवति। इदमु-
क्तमृत्विग्विधाने॥ प्रमंदिनरस्यसूर्यंत्यां जपेद्गर्भप्रमोचनीं॥ इंद्रं च मनसा ध्यायेन्नारी गर्भं प्रमु-
चतीति॥ अन्यच्च। विजिहीष्व वनस्पते तदिदं च्यावनं स्मृतं। यं च्यावयितुकामः स्यात्तं च्याव-
येत्तदिदं जपेत्॥ द्विपं तेनापदाक्रम्य मर्मौ पांसुमयीकृतं। निक्षिप्य क्षितिवसंग्रामाच्च्यवति-
नात्र संशयरस्त्युक्तोमिहितं॥ स्त्रियं गर्भप्रमूढां वा पाययेदनुमंत्रितं॥ उदकं च्यावनेनैव
गर्भोधिक्ष्यवते सुखमिति। पाठस्तु॥ विजिहीष्वेति पंचर्चस्य सूक्तशेषस्य आत्रेयः सप्तव-
ध्रिर्ऋषिः॥ गर्भस्रावो देवता अनुष्टुप् छंदः। सुखप्रसवसिद्ध्यर्थं जलाभिमंत्रणे विनि- रा.म.
योगः॥ ॐ विजिहीष्व वनस्पते योनिः सूष्यंत्या इव। श्रुतं मे अश्विना हवं सप्तवध्रिं च मु- १०७
चतं॥१॥ भीताय नाधमानाय ऋषये सप्तवध्रये। मायाभिरश्विना युवं वृक्षं सं च वि चा-
चथः॥२॥ यथा वातः पुष्करिणीं समिंगयति सर्वतः। एवा ते गर्भ एजतु निरैतु दशमा-
स्यः॥३॥ यथा वातो यथा वनं यथा समुद्र एजति। एवा त्वं दशमास्य सहावेहि जरायुणा
॥४॥

दशमासांश्छशयानः कुमारो अधि मातरि॥ निरैतु जीवो अक्षतो जीवो जीवंत्या अधि॥५॥
इति पंचर्चेन जलमभिमंत्र्य वा पाययेत्॥ शीघ्रं गर्भं मुंचति। पुरुषेह वाऽयमोदितो गर्भो-
भवतीत्यावारत्याकं पठेदिति सुखप्रसवविधानं॥ ॥अथ जातकर्मप्रयोगः पारिजा-
रिजाते वसिष्ठः। श्रुत्वा जातं पिता पुत्रं सचैलं स्नानमाचरेत्॥ प्राक् नाभिच्छेदनात्पुंसो
जातकर्म समाचरेत्॥ हेमाद्रौ बैजवापः जन्मतोनंतरं कार्यं जातकर्म यथाविधि। दैवाद-
तीतकालं चेदतीते सूतके भवेत्॥ कार्ष्णाजिनिः। प्रादुर्भावे पुत्रपुत्र्योर्ग्रहणे चंद्रसूर्ययोः। स्ना-
त्वानंतरमात्मीयान्पितॄन् श्राद्धेन तर्पयेत्॥ पुत्र्यास्त्वमंत्रकं कार्यं। तूष्णीमेताः क्रियाः स्त्रीणां
विवाहस्तु समंत्रक इत्युक्तेः। इदं रात्रावपि कार्यं। पुत्रजन्मनि यात्रायां शर्वर्यामपि कार-
येदिति व्यासोक्तेः॥ इदं च जननानंतरमेव कार्यं। न जातेष्टिवदाशौचपागमे। जातमात्र-
कुमारस्य जातकर्म विधीयते॥ स्तनप्राशनतः पूर्वं नाभिकर्त्तनतोपि वेति। बैजवापो-
क्तेः॥ अत्र श्राद्धमामेन हेम्ना वा कार्यमित्युक्तमादित्यपुराणे॥ पुत्रजन्मनि कुर्वीत श्राद्धं है-

त्वं प्रातः प्रातः शुचिर्द्विजः ॥ एतत्स्वस्त्ययनं पुण्यं सर्वकल्मषनाशनं ॥ सुहृदं ज्ञातिनं चैव ग
च्छंतमनुमंत्रयेत् ॥ स्वस्तिपंथामिति शोच्य स्वस्तिमान्गृजतेध्वनीति ॥ तथा ॥ शं वतीः स
१०८ मेइ प्राग्नीरस्ये तेस्यत तं जपेत् ॥ सूक्तजपफलमुक्तं तत्रैव ॥ ॥ नरक्षांस्यो न तत्तेभ्यो व्या
धिभ्यो न भयं भवेदिति ॥ तथा ॥ जपेत् प्रतिरथं सूक्तं सर्वविघ्ननिवारणं ॥ समस्थितिस्वा
स्त्ययनं जपेत्तन्नियतव्रतः ॥ इति शांतिसूक्तानि ॥ अथ रात्रिसूक्तं ॥ ऋग्विधाने ॥ रात्रिं प्रपद्ये
तेसदा शुचिश्चोर्वाग्नतो निशि ॥ यं कामयेत तं नपुनर्जायेयमिति योनिषु ॥ स्वहस्तक्षेत्रोम
नेसाजपेद्रात्रीतिरात्रिचिंत्यमुक्तफलमभिहितं ॥ रात्रीसूक्तं जपन्नेव तं कालं प्रतिपद्यन्— रा०भः
ते ॥ न योनिपुनरायाति सर्वपापैः प्रमुच्यत इति ॥ अथ रात्रिसूक्तपाठः ॥ अस्य श्रीरात्री— १०८
रव्यते ॥ रात्रीत्यष्टर्चस्य रात्रीसूक्तस्य भरः कुशिक ऋषिः रात्री देवता गायत्री छंदः ॥ रात्री
सूक्तजपे विनियोगः ॐ रात्री व्यख्यदायती पुरुत्रा देव्यक्षभिः ॥ विश्वा अधि श्रियोधित ॥१॥
ओर्वप्रा अमर्त्या निवतो देव्युद्वतः ॥ ज्योतिषा बाधते तमः ॥२॥ निरु स्वसारमस्कृतोष

सं देव्यायती ॥ अपेदु हासते तमः ॥३॥ सा नो अद्य यस्या वयं नि ते यामन्नविक्ष्महि वृक्षे न वसतिं स
तिवयः ॥४॥ नि ग्रामासो अविक्षत नि~~स्तेनं यथा नः सुतर~~ पद्वंतो नि पक्षिणः ॥ नि श्येनास
श्चिदर्थिनः ॥५॥ यावया वृक्यं वृकं यवय स्तेनमूर्म्ये यथा नः सुतरा भव ॥६॥ उप मा पेपिशत्तमः कृ
ष्णं व्यक्तमस्थित ॥ उष ऋणेव यातय ॥७॥ उप ते गा इवाकरं वृणीष्व दुहितर्दिवः ॥ रात्रिस्तो
मं न जिग्युषे ॥८॥ आ रात्रि पार्थिवं रज इत्यादि परिशिष्टमपि पठनीयं ॥ वेदांतराध्यायिभि
स्तु स्वस्ववेदप्रसिद्धानि शांतिसूक्तरात्रिसूक्तानि पठनीयानि ॥ न्यायसाम्यात् ॥ इत्यनं
तभट्टविरचिते विधानपारिजाते रात्रिसूक्तजपविधानं ॥ ॥ अथ बालसंबंधिविधानानि ॥
स्कांदे स्कंदसूर्यसंवादे सूर्य उवाच ॥ ॥ केन कर्मविपाकेन बाला नाजायते व्यथा ॥ ज्ञात
मा ज्ञातपत्यानि न पापं परिकुर्वते ॥ आहारस्त्रैव निद्रा च रुदितं हास्यमेव च ॥ स्वाभावि—
कमिदं देवकर्म चेष्टां पडानना कर्मणस्त्वस्य करणात्कथं पापं प्रजायते ॥ पापं विना कथं
व्याधिः पीडपत्याखिलां छिद्रनः ॥ तेषां कर्मफलं किं वा मातापित्रोस्तु कर्मजं ॥ जन्मवास

यस्याश्च तत्क्रमाद्वद सुव्रत। श्रीस्कंद उवाच॥ येन कर्मविपाकेन शिशूनां जायते गदः॥ तत्स
र्वं कथयिष्यामि शृणुतस्त्वं दिवाकर॥ लंकायां रावणो नाम पौलस्त्यो राक्षसेश्वरः॥ स च सारस्त
१०० स्य वीरस्य द्वादशासन्महाभयाः॥ ताभिः कृतं तपो घोरं सर्वलोकभयप्रदं॥ पीडितं ताभि
रखिलं जगत्ती व्रतपोबलात्॥ रुद्रस्त्वाराधितस्ताभिस्तपसा नीव्रतेन तु सा॥ प्रसन्नोऽभूत्तदा
देवस्ताभ्य एवं वरं ददौ॥ रुद्र उवाच॥ वरदोऽहं वराहाभ्यो युष्माभ्यं रजनीचराः॥ लभ्यं भ
क्ष्यमवंतीभिः प्राणिनां देहसंभवं॥ वसासृङ्मांसमेदोऽस्थिमज्जाशुक्रमलं केसदा॥ एवमु
क्ते महादेवे पुनस्ताः ऊचुरंजसा॥ देहि देवेश भक्ष्यं नो जीवतामेव शंकर॥ तच्छ्रुत्वा वचनं तासां राम:
चुकोप परमेश्वरः॥ ब्रह्मवंशसमुद्भूतास्ति यो वृद्धिपारायणाः॥ तत्कथं बालघातायचेतो १००
वःस्य वै पापिबालानां भेदसाच्छि रवेनः॥ रुद्र उ०॥ मास्त्रीनिशातुरये स्नातिबालस्य शांतिमुं
जती॥ प्रसूतिसमये भ्यगं न करोति प्रमादतः॥ स्नाति स्नाति रात्रौ वा नित्यन्नसुरतासती॥ त
स्य बलंदिने मासे वर्षे वापि विशेषतः॥ आद्ये तु दिवसे मासे वर्षे वा च विमोचनी ग्रसतोनुम

ह्यसादेन ज्वरोद्वेगे वेदनो च्चयैः॥ द्वितीये मोहिनी नाम सुनंदा तु तृतीयके॥ चतुर्थे पूतना नाम पंचमे
स्यासुरी तथा॥ षष्ठे तु रेवती देवी बालं गृह्णाति सत्वरं॥ सप्तमे शकुनी नाम अष्टमे च पिशाचि
का॥ देवता पाशिनी नाम गृह्णाति नवमे शिशुं॥ महामारी तु दशमे कालिके कादशे तथा॥ द्वा
दशे भामिनी देवी पीडाकारणतत्परा॥ स्वयमेवं कुरुध्वं भो पीडां बालकविग्रहे॥ आलानो दि
वसे मासे वर्षे चापि पृथक् पृथक्॥ निमित्ते सति गृह्णीध्वं मुंचेतु न कदाचन॥ युष्माभ्यं बलि
दानं ये विधास्यंत्यखिलं परं॥ तेषां गृह्णीतं बालं तु संतुष्टाः परिमुंचत॥ इति लब्धवरास्सर्वाः
पीडयंति शिशून्ध्रुवं ता॥ दिनमासाब्दमानेन ता त्र कार्या विचारणा॥ अथ क्रमेण विधा
नानि॥ प्रथमे दिवसे मासे वर्षे देवी विमोचनी॥ तस्यास्तु जायते पीडा शिशूनां तीव्रवेदना॥ ज्व
रस्तु प्रथमं तावन्नेत्ररोगस्ततः परं॥ न गृह्णाति स्तनं दिनं वांति रायंतिका मवेतू॥ स्वाबध्ना
ति वेगेन दंतानं दंते दंशास्य लं॥ इत्थं प्रजायते पीडा विमोचिन्या दिवाकर॥ तस्याः प्रजाप्रव
क्ष्यामि बालानां शांतिकारिणी॥ करवीररक्तपुष्पाणि चंदनं रक्तमुत्तमं॥ धूपस्तु शिववनि

मंत्व्यासि बिल्वदलमुत्तमं॥ कीपास्तु पंच विज्ञेयास्तथा पंचैव पोलिकाः मुष्टिकाः पंच विज्ञेयाः
ध्वजाः पंच सुपीतकाः॥ ताम्बूलवीटकाः पंच पूगीफलसमन्विताः॥ रक्तैर्दलमेकैस्तु प्रोक्तः
१०१ साज्यगुडस्तथा। शरावेन्नततेभ्राज्ञ निधेयं सर्वमेव तत्॥ ॥ ततस्तु पुत्तलीं कुर्यान्नियीं तु मय
तोमृत्तिका दृष्टा तत्र तां भीमाम्पीतवस्त्रपरावृता। पातस्त्रोपवीतां च पूजयेन्दुक्तिमान्न
रः। पूर्वोक्तैरेव संभारैर्गंधपुष्पादिभिर्बुधः॥ वक्ष्यमाणेन मंत्रेण प्रार्थयेत्तां समाहितः॥ मंत्र
स्तु॥ ॐ नमो भक्तवत्सले विमोचनि स्वाहा॥ अमुं मंत्रं समुच्चार्य सर्वं दिजा प्रकल्पयेत्॥ केषां
चिन्मते कस्मिं छरावे पुत्तलीं निधेया॥ अन्यस्मिं नां धादि संभार इति। केषांचिदेकस्मिन्नेवे रा.म.
ति। एकरावनैतावता भवति॥ पूजांकेमस्तु पुत्तलिकामादौ शरावे निधाय तत्पुरतः। गंधादि १०१
सर्वं निक्षिप्य तत्रैवोपचारान्विधाय पंच पदत्रवाने की कृत्य बालकं गांपामार्जनेन मात
रं निःस्सार्य नीराजनं विधाय तत्सर्वं सिकं बलिः सशस्त्रो नेतानमेन्मंत्र मुच्चरति॥ तथा चाज्ञ
वांम्रोदुंबराश्वत्थवटानांपत्रैवस्तथा॥ सर्वांगिभ्यः समुत्सार्य पीडां बालस्य सर्वजेत॥ र

थ्यां त्रित्रयं कुर्याद्विधानं तु समाहितः॥ ग्रामादुत्तरतो नित्यं पूर्वरात्रे विचक्षणः। तस्मिं स्थाने
जपेन्मंत्रं बालानां शांतिहेतवे॥ एवं प्रशांतिमायाति शिशुपीडा न संशयः॥ इति मार्कंडेयपुरा
णोक्तं प्रथमं दिनमासाब्द देवता विमोचनीपीडाशमनविधानं॥ ॥अथ द्वितीये विधानं॥
द्वितीये दिवसे मासे वर्षे चैव प्रभाकरा मोहिनी नाम देव्यत्र कुर्ते पीडनं शिशोः। ज्वरं नेत्ररु
जं कार्श्यं चैव विशेषतः। दुर्दिनं गृह्णिणी दुःखं जनयत्यनिशं शिशोः॥ तत्र शांतिविधानं च प्रवक्ष्या
मि समासतः। नालिकेरी कुसुमैः पूर्णैश्चंदनं मलयोद्भवं॥ कुंकुमं केसरं दिव्यं सकर्पूरं विलेपनं॥
दिव्येन चैव नानाकारेर्दशांगं धूपनं तथा॥ नैवेद्यं पूर्ववद्देयं तथैव पदत्रवक्रिया॥ पूर्ववत्पुत्त
लिकां च शरावे संनिवेशयेत्॥ वक्ष्यमाणेन मंत्रेण कुर्यात्सर्वमतंद्रितः॥ ॥२॥४ मंत्रस्तु सर्वे
स्वसिद्धर्वजनप्रियंकरि ह्रां ह्रीं ह्रां ह्रीं जगत्सर्वं ॐ नमो भगवति विमोहिनि स्वाहा॥ एवं चाने
न मंत्रेण यथाकृत्वा विधानकं॥ रात्रित्रयं निधातव्यं पश्चिमे सामनो बहिः॥ प्रथमे यामिनीया
ने कृते नव्यतिपीडयतद्रा॥ इति द्वितीयदिनमासाब्दविधानं॥ अथ तृतीयविधानं॥ स्कंद उवाच॥

तृतीये दिवमासे वर्षेऽगृह्णाति रवे॥ सुनंदानामदेव्यत्र बालानीमयदानवेत्यास्मवस्था कुरुते
घोरां सुनंदा चैव नामिनी॥ हृद्रोगश्छर्दनं श्वासो ज्वरे वास हजायते॥ आकुंचयति गात्राणि —
१०२ रोदिति हनिशं घोरं संजायते पीडा सुनंदा कोपसंभवा॥ तस्याः शांतिविधानं तु प्रवक्ष्यामि समा
सतः॥ शतपत्राणि पुष्पाणि चंदनस्यानुलेपनं॥ हरिद्राकुंकुमं नाम गकेसरं बालकान्वितं॥ गंधा
र्धधूपनं दद्यात् गुग्गुलं चातिशोभनं॥ घृताक्तं खदिरांगारैः संप्रताप्य विरोचनं॥ पूर्ववत्पुत्तलीं कृ
त्वा शरावे सन्निवेशयेत्॥ प्रसृतित्रय शालीनां मोदनं सार्पिषान्वितं॥ दीपाश्च पोलिकाः पंचतत्
वंतो मुष्टिकाः स्मृताः॥ ध्वजास्तु पंच विज्ञेयाः सहिताः पंच पल्लवैः॥ वक्ष्यमाणेन मंत्रेण बलिं सर्वं
समाहरेत्॥ ॐ नमो भगवति सुनंदे हुं फट् स्वाहा॥ एवं चानेन मंत्रेण प्राज्ञः सर्वं विनिक्षिपेत् रामः १०२
॥ त्रिरात्रं रजनी पूर्वयामे बालोपशांतये॥ एवं कृतविधाने तु व्याधिमात्रं विनश्यति॥ वदंति
दीपवद्याल्लः कृत्स्नपक्षे दुवत्त्वसः॥ इति तृतीयविधानं॥ अथ चतुर्थदिनमासवर्षविधानं॥ स्कं
दः॥ चतुर्थे दिवसे मासे वर्षे चैव विभाकरात् तनानाम देव्यत्र पीडां प्रकुरुते शिशोः॥ संतापोज्व

रश्चातिसारस्ततः परं॥ मुष्टिबंधस्तथा कंपो वारं वारं प्रजायते॥१
यते॥ तस्याः शांतिं प्रवक्ष्यामि सविधानं विभाकरः॥ पूर्ववत्पुत्तलीं कृत्वा शरावे सन्निवेशयेत्॥
॥ वेष्टयेद्रक्तसूत्रेण कुंकुमेनानुलेपयेत्॥ पूजयेद्धूपचूरैः पुष्पैर्बदरीपत्रसंयुतैः॥ मत्स्यमांस
स्यधूपोत्रगव्येन संयुतः॥ त्रयो दीपास्त्रिकोणास्तु साज्यवर्तिसमन्विताः॥ तिस्रस्तु पोलिकास्तेमा
मुष्टयस्तु त्रयं तथा॥ ध्वजास्तिस्रः समाख्याता नात्र कार्या विचारणा॥ प्रसृतित्रयमुद्दिष्टं तंदु
लानां प्रभाकर॥ तंदुलं सर्पिषा युक्तं शरावे सन्निवेशयेत्॥ रक्तवस्त्रेण संवेष्ट्य नमस्कृ
त्वा तु पुत्तलिं॥ दध्याक्ष्नतास्समारोप्य विदध्यात्तु समाहितः॥ पल्लवैः पंचभिर्वापि तंस्वं गि
पुप्रमार्जयेत्॥ मंत्रस्तु॥ ॐ नमः पूतने मातर्बलिं गृह्ण सुशोभने॥ बालकं मुंच योगेन बलिदा
नेन हर्षिता॥ इमं मंत्रं समुच्चार्य सर्वं बलिमुपाहरेत्॥ प्रदोषे क्षणनिर्वृत्ते स्वतस्स्तविधिमुत्तु
दक्षिणां दिशमाश्रित्य निक्षिपेद्ग्रामतो बहिः॥ बलिमवत्तं लेसम्यक् बालकः सुखमाप्नुयात्
इति चतुर्थविधानं॥ अथ पंचमोऽध्यायः ततः प — चांहि मासे वर्षे दिवाकर॥ आसुरीनाम देव्य
त्र बालकं बाधते भृशं॥ तत्र चिह्नं प्रवक्ष्यामि बालानां यत्प्रजायते॥ ज्वरस्तु प्रथमं पश्चाद्

रोगो ग्रहणी गदः ॥ मुष्टिबंधः प्रलापः स्यादुद्वेगो न शांतथा ॥ शिरोरोगरुजो यते तस्यं त्तं एतैर्दुलक्षणैर्वे ॥
पर्वकस्य तु तली कृत्वा पीतसूत्रेण वेष्टयेत् ॥ पीतं वा सो वस्त्रानां ता शरावे सन्निवेशयेत् ॥ घृता-
102 भ्यंगो विधेयोत्र हरिद्रालेपनं तथा ॥ ततः पूजां प्रकुर्वीत कुसुमैः करवीरजैः ॥ जपापुष्पै-
र्बंधुजीवैर्बालकस्य तु चानघ ॥ चंदनेनानुलिप्तां तां दिव्यगंधोपशोभितां ॥ राजिकां सर्ष-
पैर्धूपो घृताक्तोत्र प्रशस्यते ॥ दीपकाः सप्त विज्ञेया ध्वजास्तर्वे न रणवचा ॥ मुष्टिकाः पोलि-
काः स्वस्य सप्तैवाति कास्तथा ॥ नैवेद्यार्थं समुद्दिष्टमोदनं सघृतं हविः ॥ पदत्रवेस्तु य-
था पूर्वं कारयेन्मार्ज्जनं शिशोः ॥ मंत्रमेनं समुच्चार्य त्रिवारं प्रतिपूजने ॥ मंत्रस्तु ॥ ॐ सुकेशी रामः 102
सुभगे देवि सर्वशत्रुनिवारणि ॥ कुरु शांतिं शिशोरस्य त्वं बलिनेन राक्षसि ॥ इत्युच्चार्य क्षि-
पेद्र्वनिध्य रात्रे त्रिवासरं ॥ पश्चिमां दिशमाश्रित्य ग्रामाद्धन्वंतरे रवे ॥ इति पंचमे वि-
धानं ॥ षष्षष्टे ॥ अथ षष्ठे च दिवसे मासे वर्षे दिवाकर ॥ रेवती नाम देव्यत्र शिशुं
गृह्णाति संशयं ॥ आदौ तु जायते पीडा त्रणानां शिशुमूर्द्धनि ॥ ज्वरस्तु मुखशोषोपि-

तृषास्य समभिजायते ॥ सकंपं तिच गात्राणि रुदितं च पुनःपुनः ॥ तत्र शांतिं प्रवक्ष्यामि स्यामि शि-
शुः सर्वं समाहितः ॥ पूर्ववत्पुत्तलीं कृत्वा शरावे सन्निवेशयेत् ॥ गंगातोयेन स्नाप्य सुरक्तव-
स्त्रेण वेष्टितां ॥ शुक्लस्रक्चंदनैः संवीतां शुक्लमाल्यानुलेपनां ॥ शुक्लधूपोत्र निर्दिष्टो विस्वप-
त्रैः सहानघ ॥ आज्येनाक्तस्तु विप्राला दीपाः पंच प्रकीर्त्तिताः ॥ तावंतो मुष्टिका ज्ञेयाः पोलि-
का निस्समन्विताः ॥ प्रसृतित्रयमात्राणां व्रीहीणामोदनं स्मृतं ॥ दध्ना सह गुडेनाक्तं तोरलं
च विशेषतः ॥ वक्ष्यमाणेन मंत्रेण प्रक्षिपेच्च समाहितः ॥ मंत्रस्तु ॥ राक्षसि त्वं महाभागे बा-
लं तं चसुनानने ॥ क्षेमं कुरु जगत्यस्मिं छोमनामव रेवती ॥ इति मंत्रेण सम्यक् प्रदोषे ब-
लिमाहरेत् ॥ संस्नाप्य बालकं तं च सर्वांगे पंचपल्लवैः ॥ नगराद्दूतरे देशे रेवत्यै बलिमाह-
रेत् ॥ एवं प्रशांतिमायाति बालपीडा प्रभाकर ॥ इति षष्ठविधानं ॥ अथ सप्तमे ॥ सप्तमे च दि-
ने चैव मासे वर्षे दिवाकर ॥ शकुनी नाम देव्यत्र बालं गृह्णाति दारुणा ॥ ज्वरस्तु प्रथमं
तावत्शिरोरोगस्ततः परं ॥ प्रलापश्चाति सारः स्याद्भ्रांति रोदंति कीमवेत् ॥ अक्षणौनिमी-

तनंचापि गात्रकंपोभिजायते॥ तत्र शांतिं प्रवक्ष्यामि शकुनी प्रीतिवर्द्धनं॥ रक्तचंदनलि
प्तांगी सर्ववस्त्रैरलंकृता॥ यथाकालोद्भवैः पुष्पैः पूजयेत्सततं शुचिः॥ धूपकं गुग्गुलुः २
१०४ श्रेयान्दीपाः पंच प्रकीर्तिताः॥ पोलिका मुष्टिकाः पंचकर्त्तव्यास्तु सुशोभनाः॥ नैवेद्यमोदनं
सर्पिःसहितं प्रशस्तं मतं॥ तंदुलानां सुरश्रेष्ठ मंत्रपूतं प्रकल्पयेत्॥ मंत्रस्तु॥ ॐ नमः पद्मप
त्राक्षि विशालवदने शिवे॥ संगृह्य बलिमेनं त्वं बलिमेनं त्वं॥ बालं मुंचसु शोभने॥ स्तुत्वा
यं ततो धीमान्बलिं निशि सनाहरेत्॥ दक्षिणां दिशमाश्रित्य विधाय पंचवक्रियां॥ एवं
कृते विधाने तु त्रिरात्रं सुरसत्तम॥ व्याधिमुक्तो भवेद्बालो नात्र कार्या विचारणा॥ इति सप्त
मविधानं॥ अथाष्टमे चाष्टमे दिने मासे वर्षे देवी पिशाचिका॥ पीडयत्येव बालं तु ज्वरच्छ राम: १०४
र्दिलज्जाट्टहासैः॥ नेत्रपीडा गात्रसंकोचो हृद्रोगश्चाभिजायते॥ शृणु तत्र प्रतीकारं येन तुष्ये
त्पिशाचिका॥ प्रकुर्याच्च त्रिरात्रं तु शांतिं बालार्त्तिहारिणीं॥ सर्ववस्तु तली कृत्वा शरावे नि वे
शयेत्॥ पंचामृतैस्तु संस्नाप्य देवीं तां शिशुना सह॥ ॥ चंदनेनानुलिप्तांगीं श्वेतपुष्पैः

प्रपूजयेत्॥ ध्वजाः सप्त समाख्यातास्तावंतः पोलिकाः स्मृताः॥ ॥ मुष्टिकाश्चापि विज्ञेया हरि
हरिद्राक्ताः शुभास्मृताः॥ पीतवर्णेन वस्त्रेण सर्वेणापि सुसंस्कृतं॥ विजयाचूर्णधूपो त्र घृ
तान्कः संप्रकीर्त्तितः॥ दीपान्सप्त घृतेनैव पूरयित्वा नियोजयेत्॥ प्रसूति त्रयमेकस्य घृता
क्तस्य विशेषतः॥ नैवेद्यं कल्पयेद्धीमान्दध्येतस्यैनसंज्ञयः॥ तांबूलं च सकर्पूरं पिशा
च्यै तु प्रदापयेत्॥ शरचाश्च दक्षिणां तत्र दद्यात्तत्प्रीतये रवे॥ वक्ष्यमाणेन मंत्रेण सर्वमे
व विधीयते॥ मंत्रस्तु॥ ॐ नमः सर्वभूतेशि शोभने त्वं पिशाचिके॥ बलिं चैनं गृहीत्वा सत्व
रितं मुंच बालकं॥ यथा पूर्वं तथाकार्या पंचपद्मवस्याक्रिया॥ त्रिरात्रं रजनीरक्तोत्तोयपूर्वे
ग्रामाद्बहिः क्षिपेत्॥ एवं कृते विधानेस्मिन्रोगशांतिः प्रजायते॥ इत्यष्टमं॥ अथ नवमे॥ नवमे २
दिवसे मासे वर्षे चैव प्रभाकर॥ देवता पाशिनी नाम बालार्त्तिं कुरुते भृशं॥ तत्र विघ्नं प्रवक्ष्या
मि समासेन दिवाकर॥ ज्वरं छर्दिं गलेपीडा संकोचो नेत्रस्तथा॥ तर्जनी मध्यमायोगम२
ग्राम्यां कुरुते भृशं॥ अन्नत्यागेपि संतोषो मुखगंधोभिजायते॥ तत्र शांतिं प्रवक्ष्यामि पाशि

नीप्रीतयेरवे॥ एवंविधमुत्तलीं कृत्वा शरावे संनिवेशयेत्॥ शुक्लवस्त्रेण संवीतां शुक्लव
स्त्रेण वेष्टितो॥ पूजयेच्छुक्लपुष्पैश्च मंदाराद्यैः सुगंधिभिः॥ गंधार्थे घनसारेण युक्तं चंदनम
१०५ र्पयेत्॥ घनसारः कर्पूरः दशांगधूपोऽथ पोत्र ततो दीपान्प्रकल्पयेत्॥ नववासस्तवादः
पायोलिकानान वैवद्य॥ तावंतो मुष्टिकाश्चैव ध्वजाश्चैव विशेषतः॥ नवप्रस्थमितेनैव तं
डुलौदनमुत्तमं॥ दध्नाक्षीरेण चाभ्यक्तं नैवेद्यं परिकल्पयेत्॥ ग्रामाद्दक्षिमध्यरात्रे पश्चि
मे प्रक्षिपेद्बलिं॥ एतावताविधानेन रोगमुक्तो भवेच्छिशुः॥ पंचानां पल्लवानां तु विदध्यात्॥
एवं क्रिया॥ इति नवमविधानं॥ अथ दशमे॥ दशमे दिवसे मासे वर्षे चैव दिवाकरा शाकि- राम: १०६
रेवती महामारी राक्षसी घोररूपिणी॥ मत्युकल्पं ज्वरं शूलं विधाति दिवानिशं॥ विष्टंभं कुरुतेयं
तं हिक्काकासमतिक्षयं॥ तस्याः शांतिं प्रवक्ष्यामि बालानां हितकाम्यया॥ एवंविधमुत्तलीं कृत्वा
शरावे संनिवेशयेत्॥ स्नापयेच्छरितो वारि चंदनेनानुलेपयेत्॥ पीतवस्त्रेण संवेष्ट्य पुष्प
मालोपशोभितां॥ दशांगधूपनेप्र पंमहामार्ष्य प्रकल्पयेत्॥ दीपस्तु पंचविज्ञेयास्तावंतः

श्चैरपष्टिकाः॥ मुष्टिकाः पंचवैशस्ता ध्वजाः पंच सुशोभनाः॥ संस्कृतं सर्पिषा भक्तं तंडुलानां च
पोक्तं॥ नैवेद्याचैव सत्त त्र शरावे सुमनोहरं॥ तांबूलसहितं नानो दक्षिणासहितं तथा॥ दक्षि
णार्थे नवं वस्त्रं रजतं वा यथाशक्तितः॥ पक्वान्नैः पंचभिर्युक्तं बलिं सर्वं समर्पयेत्॥ मध्यरात्राद्दव
द्धीतं बलिं कुर्याद्दिनत्रये॥ दक्षिणादिशामाश्रित्य प्रक्षिपेन्नरा गतू बहिः॥ स्तोत्रेणानेन मार्क
मार्कंडेयवक्ष्यमाणेन तेमया॥ स्तोत्रं स्तोत्रं तु॥ ॐ नमो रक्तवर्णाक्षिरक्तपद्मनिभानने॥ रक्ते
क्षणे रक्तमहामारी महाभये॥ यहा बालं महाकाये महाभयनिवारके॥ ॐ ऐं अनेन बलि
दानेन तुष्टा भव शुभानने॥ व्याधिना पीडितं बालं रक्ष मे परमेश्वरी॥ इमं मंत्रं समुच्चार्य सर्वं बलि
मुपाहरेत्॥ क्षेमाय बालकानां हि नात्र कार्या विचारणा॥ इति दशमविधानं॥ अथैकादशे॥
एकादशे दिने मासे वर्षे चापि दिवाकर॥ कालिकानाम देव्यत्र तस्यो जायते शिशोः॥ ज्वरस्तु
प्रथमं तावद्रोगस्तदनंतरं॥ मुखशोषो महाग्लानिस्ततः स्याच्चित्तविभ्रमं॥ रोदनं सर्व
गात्राणि कंपते च पुनः पुनः॥ तत्र शांतिं प्रवक्ष्यामि बालानां हितकाम्यया॥ एवंविधमुत्तली २

कृत्वा शरावे संनिवेशयेत्॥ गंगातोयेन संस्नाप्य चंदनेनानुलेपयेत्॥ करवीरस्य पुष्पैस्तु
पूजयेद्दूर्वादले॥ धूपयेत्तु च केशैश्च सर्पनिर्मोकसर्षपैः॥ वचालशुनफलैश्चैव घृतयुक्तैः
१०६ सर्जकैः॥ दीपैस्तु पंचभिस्तस्य तैस्तु नीराजयेच्च तां॥ नैवेद्यं पायसं क्षीरं षष्टिकास्तिलमोद
काः॥ अपूपाः शष्कुलिकाः पोलीः पंच पंच प्रकल्पयेत्॥ ध्वजाश्च पंच विज्ञेयाः शरावे सर्वमेव तत्
॥ निवेश्य सकलं देव्यै कालिकायै निवेदयेत्॥ मंत्रेणानेन सत्तार्श्व वक्ष्यमाणेन तेन या
मंत्रस्तु॥ ॐ नमो घोररूपायै विकटे घोरदर्शने॥ आहिस्स्व जगद्धात्रि बलिं मुंच बलिप्रिये॥ ए
वं विधाविधिं कुर्यात्सर्वत्र्य छत्र च क्रियां॥ बलिः प्रदोषसमये ग्राम॥ दक्षिणतो बहिः॥ निधेयो मं
त्रमुच्चार्य मरणे चास्य देतिना॥ स्वखड्गेने सार्थं॥ इत्येकादशविधानं॥ अथ द्वादशे॥ द्वा रामः १०६
दशे दिवसे वर्षे चैव दिवाकर॥ भामीनी नाम देव्य च पीडयत्वनिशं शिशुं॥ आदो ज्वरं प्र
कुर्याच्च दुष्प्रोगं तदनंतरं॥ कासं श्वासमनीर्स्वर प्रद्धापजंमणं तथा॥ कंपते सर्वगात्रा
णि तथा जाड्यं च नेत्रयोः॥ इत्थं नानाप्रकारैश्च शिशूनां जायते गदः॥ तत्र शांतिं प्रवक्ष्या

बालानां हितकारिणीं॥ पूर्ववत्पुत्तलीं कृत्वा शरावे सन्निवेशयेत्॥ गंधपुष्पाक्षताधूपदीपाश्च
विविधामता॥ ॥ नैवेद्यं विविधं चात्र भामिन्यै परिकल्पयेत्॥ वस्त्रं दद्यात्र ध्वजाः स्त्रग्मो
दनं च सान्वितं॥ अपूपैः पायसं क्षीरं षष्टिकाभिश्च संयुतं॥ नैवेद्यं कल्पयेत्सम्यग्गत्वा संध्या
काले निशामुखे॥ ग्रामादुत्तरतो देशे बहिरेव बलिं क्षिपेत्॥ इत्थं पंचदिने ष्वेवं कर्तव्यं रोग
हृतये॥ मंत्रेणानेन सत्तार्श्व मंत्रये सर्वतो बलिं मंत्रस्तु॥ ॐ बलिं गृह्ण बालस्य व्याधीन्सं
हर संहर॥ पंचवक्त्रप्रसादेन प्रसन्ना भव भामिनि॥ एवं कृते विधाने स्मिन्बालकः क्षेम
मामुयात्॥ इत्थं ते कथितं सम्यक् शांतिकृच्छुभजातकं॥ अनुष्ठितेन येतस्याद्बालानां दुः
खमोचनं॥ इति श्री स्कंदपुराणे स्कंदसूर्यसंवादे ब्रह्मयामले सांवादितं बालानां प्रथमा
दिनमासाब्दादि द्वादशदिनमासाब्दपीडाशमनं विधानं समाप्तं॥ अथ प्रकारांतरेणारा
वणोक्तं बालापीडाशमनं विधानं॥ दर्शनं नमतं वक्ष्ये बालानां सुखकारणं॥ अथास्य
प्रथमे दिने मासि वर्षे वा बालं गृह्णाति मातानंदा नाम॥ तया गृहीतमात्रस्य शिरोव

क्ष्यामि लक्षणं। ज्वरः आलस्य॥ रुनुदितं दुर्बलत्वं छर्दिः अतिसारो गात्रसंकोचः अरुचिस्त
नपाने॥ एते भवंति॥ बलिं तस्याः प्रवक्ष्यामि येन संपद्यते सुखं॥ नद्या उभयतटमृदमा
१०७ नीय पुत्तलिकां कृत्वा पीतवस्त्रसूत्राभ्यां वेष्टयित्वा गंधपुष्पादिभिरभ्यार्च्य प्रस्थतंडुल
स्यौदनं दधिगुडमिश्रितं पंचपोलिकाः दीपद्वयं ध्वजत्रयं शरावे दत्वा बालं संप्रोक्ष्य वि
जयधूपेन धूपयित्वा पंचहस्ते वा संस्थाप्य ॐ नमो रावणाय नंदे बलिं गृह्ण गृह्ण बा
लं मुंच स्वाहेति मंत्रेण बलिमभिमंत्र्य अपराह्णे प्रदोषसमये वा दिनत्रयमेवं मामा द्दहिः
पूर्वदिशि मंत्रमुच्चार्य बलिं हरेत्॥ एवं कृते सुखी बालः संपद्यते तेचान्यथेति प्रथमे राम:
बलिः॥ अथातः स्याद् द्वितीये दिने मासे वर्षे बालं गृह्णाति सुनंदा नाम मातृका॥ तया गृहीतमा १०७
त्रस्य प्रथमं जायते ज्वरः॥ अरुचिश्छर्दिर्हस्तपादादिसंकोचो रोदनं। नमतिसारो दुर्ब
लत्वं॥ सुनंदया गृहीतमात्रे बाल एतद्भवति लक्षणं॥ बलिं तस्याः प्रवक्ष्यामि येन संपद्यते
सुखं॥ पूर्ववत्पुत्तलीं कृत्वा पीतवस्त्रादिना वेष्ट्य स्वस्तिकापद्मकं मे स्थंडिलस्य नत्रतो

निधाय सुगंधपुष्पादिभिरभ्यर्च्य पूर्णप्रस्थतंडुलोदनं दधिगुडमिश्रं पंचपीलिकाः दीपद्वयं
ध्वजत्रयं च शरावे निधाय पंचहस्ते बलिं प्रोक्ष्य सुगंधधूपेन धूपयित्वा॥ ॐ नमो रावणाय सुनंदे
मातर्बलिं गृह्ण बालं चैं मुंमुच स्वाहेति मंत्रेणापराह्णप्रदोषसमये वा उत्तरे बलिं हरेत्॥
एवं कृते सुखी बालः संपद्यते न तच्चान्यथेति द्वितीयं॥ अथ तृतीये॥ अथातः स्यात्तृतीये दि
ने मासे वर्षे वा पूतनानाम मातृका गृह्णाति बालं॥ तया गृहीतमात्रस्य प्रथमं जायते ज्वरः॥
गात्रसंकोचः कंठशोषः प्रलापोतिसारो रोदनं च॥ तया गृहीतमात्रस्य प्रथमं जायते ज्व-
रः॥ गात्रसंकोचः कंठशोषः प्रलापोतिसारो रोदनं च। तया गृहीमात्रस्यैतद्भवति लक्षणं
॥ बलिं तस्याः प्रवक्ष्यामि येन संपद्यते सुखं॥ पूर्ववत्पुत्तलीं कृत्वा पीतवस्त्रेण वेष्ट्य गंधा
दिभिरभ्यर्च्य प्रस्थतंडुलोदनं दधिगुडयुतं पोलिकाः पंच पंच मुष्टिका दीपत्रयं ध्वजत्रयं तु
ष्टयं तिलचूर्णं च शरावे निधाय पंचहस्तेन बलिं संप्रोक्ष्य सर्जरसधूपेन धूपयित्वा ॐ न
मो रावणाय पूतने बलिं गृह्ण गृह्ण बालं मुंच मुंच स्वाहेति मंत्रेण पश्चिमायां दिशि प्र

चैक्तिकाले त्र्यं बलिं हरेत्॥ ॥इति तृतीयम्॥ अथ चतुर्थे॥ अथास्य चतुर्थे दिवसे मासे वर्षे
वा मुखमंडिका नाम मातृका बालं गृह्णाति। तया गृहीतमात्रस्य प्रथमं जायते ज्वरः॥ गा
१०८ त्रसंकोचो मुष्टिबंधः श्वासः कासश्छर्दिरतिसारः दुर्बलत्वं चेति। बलिं तस्याः प्रवक्ष्यामि
येन संपद्यते सुखं॥ पूर्ववत्पुत्तलीं कृत्वा पीतवस्त्रेणा वेष्ट्य गंधपुष्पादिभिरभ्यर्च्य प्र
स्थतंडुलौदनं दधिगुडयुतं पोलिकाः पंच पंच मुष्टिकाः दीपद्वयं ध्वजं चतुष्टयं च शरावे
निधाय बालं प्रोक्ष्य दशांगेन धूपयित्वा ॐ नमो रावणाय मुखमंडिके मातृ बलिं गृह्ण बा राम:
लं मुंच मुंच स्वाहेति दक्षिणायां दिशि दर्वकाले बलिं हरेत्॥ इति चतुर्थी॥ अथ पंचमे॥ १०८
अथास्य पंचमे मासे दिवसे वर्षे बालं गृह्णाति बिडाली नाम माता॥ तद्ग्रस्तं ज्वरः च
क्षूरोगः गात्रसंकोचः आहाराग्रहणं अतिसारः कृच्छ्रादिः रोदनं चेति। पूर्ववत्पुत्तलीं कृ
त्वा पीतवस्त्रेणा वेष्ट्य गंधादिभिरभ्यर्च्य बालं प्रोक्ष्य पद्मैवैः विजयधूपेन धूपयित्वा
ॐ नमो रावणाय विडालि बलिं गृह्ण गृह्ण बालं मुंच मुंच स्वाहेति प्रस्थौदनं दधिगुड

युतं दश पोलिका ध्वजं चतुष्टयं शरावे निधाय पश्चिमदिशि पंचरात्रं बलिं हरेत्॥ ॥इति पंच
मं॥ ॥अथ षष्ठे॥ अथास्य षष्ठे दिवसे मासे वर्षे वा बालं गृह्णाति शकुनी नाम माता॥ तद्गृही
तचिह्नानि॥ ज्वरादि हस्तपदसंकोचः कासोतिसारो मुखशोषश्चेति॥ बलिं तस्याः पुत्त
लीं वस्त्रेणा वेष्ट्य गंधादिनाभ्यर्च्य प्रस्थतंडुलौदनं पोलिका दश तिलचूर्णं दीपद्वयं
ध्वजत्रयं च शरावे निधाय बालं मार्जयित्वा सुगंधेन धूपयित्वा ॐ नमो रावणाय मातः
शकुनि बलिं गृह्ण २ बालं मुंच २ स्वाहेति पश्चिमदिशि त्रिरात्रं बलिं हरेत्॥ इति षष्ठं॥
अथ सप्तमं॥ अथास्य सप्तमे दिवसे मासे वर्षे बालं गृह्णाति सुखनाम माता॥ तद्गृहीतचि
ह्नं ज्वरादि पूर्ववत्सीतवर्णता च। बलिं तस्याः पुत्तलीं गंधादिनासंपूज्य गुडमिश्रौदनेन। जालि
का चारिकाश्चैव पोलिकाः पूरिकास्तथा। सोहितकाघृतपक्वाश्च शरावे संनिधापयेत्॥ ध्व
जत्रयं दीपपंचकं च॥ बालं मार्जयित्वा विजयेन धूपयेत्। ॐ नमो रावणाय सुखनाम मा
तः बलिं गृह्ण २ बालं मुंच २ स्वाहेति पश्चिमदिशि बलिं त्रिरात्रं हरेत्॥ इति सप्तमं॥ अथाष्टमे॥

१०९

अथास्याष्टमे दिवसे मासे वर्षे वा बालं गृह्णाति कुलिका नाम माता॥ तद्गृहीत चिह्नं ज्वरा
दि पूर्ववत्॥ बलिं तस्याः॥ पुत्तलीं वस्त्रेण वेष्टयेत् पूजयित्वा॥ क्षीर कापूरिका चैव दीपकद्वय
मेव च॥ तैलेन स्रो मुष्टिकं उरिका ॐ दनगुडमिश्रितं॥ ध्वजत्रयं च शरावे निधाय बालं पश्च
त्पैवे प्रोक्ष्य धूपयित्वा ॐ नमो रावणाय कुलिके बलिं गृह्ण गृह्ण बालं मुंच स्वाहेति दक्षिणादिशि चं
चरात्रं बलिं हरेत्॥ इत्यष्टमं॥ अथ नवमे॥ अथास्य नवमे दिवसे वर्षे वा बालं गृह्णाति आर
डिका नाम माता॥ तद्गृहीत चिह्नं ज्वरादि पूर्ववत्॥ बलिं तस्याः॥ पुत्तली वस्त्रादिना ममता
पूजयित्वा ॐ दनं दधिमिश्रं पंचपोलिका स्तिलचूर्णं संकुलिका पायरिका दीपद्वयं ध्वजचत्वार
तुष्टयं च शरावे दत्वा बालं समाज्य धूपयित्वा ॐ नमो रावणाय आरडिके बलिं गृह्ण गृह्ण बालं
मुंच स्वाहेति उत्तरदिशि त्रिरात्रं बलिं हरेत्॥ इति नवमं॥ अथ दशमे॥ अथास्य दशमे दिव
से मासे वर्षे वा बालं गृह्णाति रेवती नाम माता॥ तद्गृहीत लक्षणं॥ ज्वरादि अतिसारः श्लेष्मा
॥ कंठशोषः॥ रोदनं च॥ बलिं तस्याः पुत्तलीं वस्त्रेणावेष्ट्य गंधादिना अर्च्य पूर्णप्रस्थ तंडुलो राम: १०९

दनं दधि गुडमिश्रितं तिलचूर्णपोलिका दश शर्करा दीपद्वयं॥ ध्वजत्रयं चैतिः शरावे निधाय पं
चपल्लवै बलिं संप्रोक्ष्य विजयधूपेन धूपयित्वा ॐ नमो रावणाय रेवतिमातृ बलिं गृह्ण गृह्ण बालं
मुंच स्वाहेति मंत्रेण पश्चिमदिशि बलिं हरेत् त्रिरात्रं॥ ॥अथास्यैकादशे दिवसे मासे वर्षे वा बालं
गृह्णाति पिप्पलिका नाम माता॥ तया गृहीतमात्रस्य ज्वरः शोषश्च जायते॥ सीदंति सर्वगात्रा
णि आहारश्च न रोचते॥ रक्तं च स्रवते विष्टोमूत्रं कुक्षिशूलं च जायते॥ ऊर्ध्वदृष्टिः प्रलापं च रो
दनं च पुनः पुनः॥ पिप्पलीगृहीतमात्रस्य एतन्दे लक्षणं॥ बलिं तं पुत्तलीं पीतवस्त्रेणावे
ष्ट्य संपूज्य पूर्णप्रस्थौदनं दधिगुडमिश्रितं पोलिका॥ पूरिका पायरिका वटकाः पंच पंच तिलचू
र्णं दीपद्वयं ध्वजत्रयं च शरावे निधाय पंचपल्लवैर्बलिं संमार्ज्य विजयधूपेन धूपयित्वा दक्षिणा
दिशामाश्रित्य पकान्न प्रदोष वा प्रकारात्रि बलिं हरेत्॥ ॐ नमो रावणाय पिप्पलि बलिं गृह्ण गृह्ण
बालं मुंच स्वाहेति मंत्रेण॥ इत्येकादशं॥ अथ द्वादशे॥ अथास्य द्वादशे दिवसे मासे वर्षे वा
बालं गृह्णाति षष्ठी नाम माता॥ तया गृहीतमात्रस्य ज्वरः शोषश्च जायते॥ सीदंति सर्वगा

त्राणि भ्रातरश्च न रोचते॥ कुक्षिशूलं प्रजायेत रोदनं तु निरंतरं॥ ऊर्ध्वदृष्टिः प्रलापश्च श्वासश्चैव
द पुनः पुनः पिप्पलीगंधिनि मात्रस्य एतद्भवति लक्षणं॥ बलिं तस्याः प्रवक्ष्यामि येन संपद्यते
 सुखं॥ नद्या उभय कूल मृत्तिकामादाय पुत्तलिकां कृत्वा पीनवस्त्रेण संवेष्ट्य गंधादिनाभ्यर्च्य द
धिमिश्रौदनं दधि गुड मिश्र पोलिकाः पंच तिलचूर्ण धारिका द्वयं शर्करा।

रात्रौ जागरणं कार्यं मन्त्रस्नानं तथा बलिः॥ पुरुषाः शस्त्रहस्ताश्च नृत्यगीतैश्च योषितः॥ रात्रौ जागर

णं कुर्युर्दशम्यां चैव सूतके ॥ इति ॥ अथ सूतिकास्नानं ॥ ज्योतिःशास्त्रे ॥ करेंद्रमैत्र्यानिलवासवां
त्यमैत्रे दिवा चित्रे च भे हि पुंसां ॥ तिथावरिक्ते शुभमासमंते प्रसूतिकास्नानविधिं मुनीन्द्राः ॥
१११ इ स्नानं तमहु विरचितं विधानपारिजाते प्रसूतिकास्नानं ॥ अथ नामकरणविधानं ॥ बृहस्पतिः
॥ द्वादशे दशमे वापि जन्मतो दिवसे शुभे ॥ षोडशे विंशतौ चैव द्वाविंशे वर्णतः ॥ क्रमात् ॥ याव
तोप्यक्षाः ॥ अहन्येकादशे नामेति ॥ भविष्ये पि ॥ नामधेयं दशम्यां तु द्वादश्यां मासिके च ने ॥ अ
ष्टादशेहनि तथा वदंत्यन्ये मनीषिणः ॥ कात्यायनसूत्रे पि ॥ दशम्यामुत्थाप्य ब्राह्मणान्भोज
यित्वा पिता नाम करोतीति ॥ दशम्यां कौमुत्थाप्य एकादशेह्नि नाम कुर्यादिति तद्व्याख्यानं ॥ राम:
आशौचापगमे नामधेयमिति विष्णुः ॥ आश्वलायनगृह्यपरिशिष्टे पि ॥ जननाद्दशरा १११
त्रे व्युष्टे शतरात्रे संवत्सरे वा नामकरणमिति ॥ व्युष्टे इतीने । ज्योतिर्निबंधे गर्गः ॥ अमासं
क्रांति विष्ट्यादौ प्राप्तकालेपि नाचरेत् ॥ गर्भाधानादिकर्माणि शुभे काले समाचरेत् ॥ श्रीधरः
मित्रादितिसमघोत्तराशतंभिषक्पूरवातीथानेष्ठाच्युतप्राजेशाश्विराशांकपौष्णदिनकृत्सुष्वेषु

राशौ स्थिरे ॥ द्विहीनां पंचदशीं विहाय नवमीं शुद्धे ष्टमे भार्गवेज्याचार्यामितपादभाग दिवसे नामानि
कुर्याद्विजोः ॥ मनुः ॥ शर्मांतं ब्राह्मणस्य स्यात् वर्मांतं क्षत्रियस्य तु ॥ वैश्ये गुप्तसमायुक्तं शूद्रे
स्य प्रेष्यसंयुतं ॥ स्मृतिसंग्रहे ॥ केशवो नंतोच्युतः श्रीकीर्वैकुंठोथ जनार्दनः ॥ उपेंद्रो यज्ञपुरुषो
वासुदेवस्तथा हरिः ॥ योगीशः पुंडरीकाक्षो मासनामान्यनुक्रमात् ॥ क्रमोत्र मार्गशीर्षादिः
तथा शिष्टाचारदर्शनात् ॥ तन्मातरा नाम प्रथमं दद्यात्संनु ध्यचेवहि देवाउयगजास्थानो
वृक्षाणां वापि कुर्ययोः ॥ सर्वापणानापत्यानां चिह्नार्थयोषितां नयो ॥ कन्यानां च कवीनां च
पश्वादीनां च सर्वशः ॥ राजप्रसादवस्तूनां नामकर्म विशिष्यते ॥ नाक्षत्रमपि नाम कार्यं ॥
अभिवादनीयं च समीक्षेत तन्मातापितरौ विद्यात् आमोपनयनादिति आश्वलायनसूत्रात्
॥ तच्च नक्षत्रपादाक्षरं कुर्यादिति परिशिष्टे ॥ स्वामीभीष्टं व्यावहारिकं नाम कुर्यात् ॥ तत्प्रका
रः कात्यायनसूत्रे । द्व्यक्षरं चतुरं वा घोषवदाद्यंतरंतस्थं दीर्घाभिनिष्ठानं कृतं कुर्यान्न तद्धि
तमयुजाक्षरं आकारांतं स्त्रियै तद्धितं शर्म ब्राह्मणस्य वर्म क्षत्रियस्य गुप्तेति वैश्यस्येति ॥

॥इति विधानपारिजाते नामविधानं॥ ॥अथाग्रंथस्थानि विधानानि मयासंग्रथितानि च॥ प
रोपकृतये विष्णुर्मे तेन प्रीणातु सर्वदा॥ विधानपारिजातके दशाङ्कगुच्छसंयुते॥ समासए
११२ ष आदिमःस्यात्तामनुमहाकिल॥ अंबा भागीरथी यस्य नागदेवः पिता सुधीः॥ तेनानंतेन रर
चितः प्रथमस्तवकः परः॥ ॥इति श्रीमत्परमवैदिक श्रीमन्नागदेवभट्टसूनुसकलविद्वज्ज
नेकृपापात्रभूतेन श्रीमदनंतभट्टेन प्रथमशाखिना विरचिते श्रीमद्विधानपारिजाते मि
थेनिबंधे प्रथमःस्तबकः समाप्तः॥ ॥श्रीरामचंद्रायनमः॥०॥ ०॥ ०॥

राम:
११२